TRIVANDRUM SANSKRIT SE

NO. XXIX.

SRI SHARADA P
SRINGEI
Acc No.
Cat No.

THE
NÂNÂRTHÂRṆAVASAMKSHEPA

OF

KESAVASWÂMIN

EDITED

BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit manuscripts,

TRIVANDRUM.

Part II—3rd Kanda.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1913.

(*All Rights Reserved.*)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः २९.

नानार्थार्णवसंक्षेपः

केशवस्वामिप्रणीतः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितः ।

द्वितीयः सम्पुटः—तृतीयः काण्डः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

कोळम्बाब्दाः १०८८, क्रैस्ताब्दाः १९१३.

नानार्थार्णवसंक्षेपः

केशवस्वामिप्रणीतः ।

व्यक्षरकाण्डः ।

स्त्रीलिङ्गाध्यायः ।

अथ खल्वयमत्यन्तः काण्डः प्रस्तूयतेऽधुना ।
नानार्थव्यक्षराणां यः सर्वस्वं काव्यकारिणाम् ॥ १ ॥
तत्रादौ तावदध्यायः स्त्रीलिङ्गानां प्रणीयते ।
अथ **स्त्रियामभिरूया** स्याच्छोभायां कीर्तिसंज्ञयोः ॥ २ ॥
प्रज्ञायामपि विख्यातावभिधा तृक्तिसंज्ञयोः ।
अहल्या तु सरोभेदे भार्यायां गौतमस्य च ॥ ३ ॥
अवका स्याज्जलतृणे ज्ञेया चिञ्चोटिकाह्वये ।
शैवले चाप्यथाध्यण्डा त्वामलक्यात्मगुप्तयोः ॥ ४ ॥
असिक्नी तु निशीथिन्यां नदीभेदे तु कश्चन ।
तथैवान्तःपुरप्रेष्यस्त्रियां स्यादवनिः पुनः ॥ ५ ॥
भूमिनद्यङ्गुलीषु स्यादङ्गुलिस्तु गजस्य च ।
कराग्रे कर्णिकासंज्ञे शाखास्वप्यङ्घ्रिहस्तयोः ॥ ६ ॥
अनुष्टुप् छन्दसो भेदे ज्ञेया द्वात्रिंशदक्षरे ।
तथा देवासुरादीनां छन्दोभेदेषु च स्मृता ॥ ७ ॥
वाचि सम्भावनायां तु स्यादाशङ्का भयेऽपि च ।
आकृतिस्तु शरीरे स्यादाकारव्यक्तिजातिषु ॥ ८ ॥
अष्टाशीत्यक्षरे च स्याच्छन्दोभेदेऽप्यथार्तनिः ।
अन्धकारे तथा मार्गे विस्तारे च प्रकीर्तिता ॥ ९ ॥

---

१. 'घु' ग. पाठः.

आयतिर्दीर्घतायां स्यात् प्रभावागामिकालयोः ।
आहर्तिर्यज्वनां स्याच्च सुगासादनकर्मणि ॥ १० ॥

ताडने चाप्यथालम्भिः कीर्तिता गीत्युपक्रमे ।
तथैवालपने विद्यात् **त्वासन्दी**मासनान्तरे ॥ ११ ॥

केचिद् वेत्रासनेऽन्ये तु वदन्त्यासनमात्रके ।
इन्द्राणी तु शचीदेव्यां रतबन्धान्तरे तथा ॥ १२ ॥

स्त्रीणां स्यात् सिन्धुवाराख्यवृक्षे च स्यादथोपधा ।
शब्दस्यान्त्यादलः पूर्ववर्णे च सुपरीक्षणे ॥ १३ ॥

उपधानक्रियायां चच्छन्दनायां च कीर्तिता ।
माघस्य कोपधेत्यत्र* मृग्योऽर्थ उपधापदे ॥ १४ ॥

उर्वरा सर्वसस्याढ्यभूमौ स्याद् भूमिमात्रके ।
ऋच्छरा त्वङ्गुलौ ज्ञेया वेश्यायां चाथ **कर्णिका** ॥ १५ ॥

करिहस्ताङ्गुलौ पद्मबीजकोशयां च भूषणे ।
कर्णस्य मध्यमाङ्गुल्यामपि कश्चिदभाषत ॥ १६ ॥

कर्णिका तिलमण्डे§ गोधूमे तच्चूर्णके लवे ।
कलशिर्भेषजस्तम्बे पृश्निपर्णीति विश्रुते ॥ १७ ॥

दधिप्रमथनस्थाल्यां स्यात् कृपाण्यां तु **कर्तरी** ।
इषोः पुङ्खे च **कर्णान्धूः**@ पुनरुत्क्षेपिकाह्वये ॥ १८ ॥

कर्णभूषणभेदे स्यात् कर्णपाल्यामपि स्मृता ।
काकणी मानदण्डस्य माषस्य च पणस्य च ॥ १९ ॥

तुर्येऽशे पादुकायां च कपर्दानां च विंशतौ ।
एकस्मिंश्च कपर्दे स्यादिति प्राहुर्मनीषिणः ॥ २० ॥

---

१. 'इया' ग पाठः.

---

* 'अयशोभिर्दुरालोके कोपधा मरणादृते' (स. १९. श्लो. ५८) इति माघः । उपधा उपायः । § 'काणका तिलकाण्डेऽपि' (पृ. २४७. श्लो. ४) इति तु वैजयन्ती । @ अन्धूः शब्दः पादभूषणार्थको वैजयन्त्यादिषु दृश्यते । बृहदभिधाने तु कर्णान्धूशब्दस्य कर्णभूषणार्थकत्वमुक्तम् ।

कारवी वाप्पिकासंज्ञभेषजे कृष्णजीरके ।
अजमोजाविशेषे च खराश्वासंज्ञके तथा ॥ २१ ॥
शतपुष्पासमाख्ये च भैषज्ये भाषिता बुधैः ।
कालिन्दी यमुनानद्यां कृष्णभार्यान्तरे तथा ॥ २२ ॥
किणिही स्यादगमार्गे गिरिकर्ण्यां च भाषिता ।
कुस्तितिस्तु कुमार्गे स्यात् कुगतौ शाठ्य एव च ॥ २३ ॥
कूर्चिका मस्तुपिण्डे स्यात् सूचितूलिकयोरपि ।
कवाटस्याङ्कुटे चापि **खलिनी** तु खलव्रजे ॥ २४ ॥
वाराहीमुसलीत्यादिपदैः स्तम्बे च विश्रुते ।
ग्रहणी तूदरव्याधिविशेषे मृत्युमेयोः ॥ २५ ॥
भद्राशंख्योस्तु **गन्धाली**त्येतद् रभसभाषितम् ।
गुडूची(त्यत्व)मृतानाम्नि वल्लयां कुतुम्बुरुण्यपि ॥ २६ ॥
गोजिह्वा दार्विकासंज्ञस्थावरे परिकीर्तिता ।
मनःशिलायां गोश्चापि जिह्वायां क्षुद्रधान्यके ॥ २७ ॥
गवीथुरिति विख्याते **गोलोमी** तु वचाह्वये ।
भेषजे सितदूर्वायां भूतकेशाख्यवस्तुनि ॥ २८ ॥
घटिका तु मुहूर्ताख्ये काले नाडीद्वयात्मके ।
गवादिदोहपात्रे च पारिसंज्ञे प्रकीर्तिता ॥ २९ ॥
घृताची त्वप्सरोभेदे निशायां च प्रकीर्तिता ।
चर्चरी चर्भटिरिति प्रसिद्धे हास्यवाक्यके ॥ ३० ॥
उक्ता कर्पटिकानां च गीतभेदे मनीषिभिः ।
चिरैण्टी त्ववगन्तव्या द्वितीयवयसि स्त्रियाम् ॥ ३१ ॥
सुवासिनीति प्रथिते स्त्रीविशेषे च कोविदैः ।
*चुलकी शिशुमा(रा)रे(शि)स्यात् कुण्डीभेदे कुलान्तरे ॥ ३२ ॥

---

१. 'ची' ख. ङ. पाठः. २. 'शा' क. ङ. पाठः. ३. 'रि' ग. ङ. पाठः.

---

* 'चुलकी शिशुमारे स्यात् कुण्डीभेदे कुलान्तरे' इति तु मेदिनी ।

जिगीषाशब्द उद्दिष्टो व्यवसायजयेच्छयोः ।
जुगुप्सा तु घृणायां च निन्दायां चाथ **झल्लरी** ॥ ३३ ॥

वाद्यभेदेऽजयस्त्वाह हुडुक्क इति चिन्त्यधीः ।
अवस्थाभेदमापन्ने केशभेदे च कीर्तिता ॥ ३४ ॥

झम्पटिक्षुविशब्दाभ्यां प्रसिद्धे शब्दवेदिनाम् ।
छत्रान्तालम्बिवस्त्रे च तृणता तु धनुष्यपि ॥ ३५ ॥

तृणत्वे चेति बहुभिः कविना चोररीकृतम् ।
तच्चास्मभ्यं न रोचिष्णु तृणतश्चेपशङ्कया ॥ ३६ ॥

दीधितिस्त्वङ्गुलौ रश्मावभिधिन्वोस्तु **धेनुका** ।
नालिका तु चतुर्हस्तप्रमाणे युगसंज्ञके ॥ ३७ ॥

नवहस्तप्रमाणे च मुनिभिः परिभाषिता ।
चुल्लीरन्ध्रे च रन्ध्रे च नाले काले तथैव च ॥ ३८ ॥

वेणुभाजनभेदे च जलशाकलतान्तरे ।
कलम्बीशतपर्वादिशब्दैः शास्त्रेषु विश्रुते ॥ ३९ ॥

निर्वृतिर्मनसस्तोषे मोक्षेऽस्तमयबाढयोः ।
नियतिः संयमे दैवे **निकृतिः** शठशाठ्ययोः ॥ ४० ॥

नितन्निस्तु तृतीयस्यां कृत्तिकायां निबोधत ।
सप्तानां कृत्तिकानां तु दूर्वीयामपि मन्वते ॥ ४१ ॥

निःश्रेणिस्त्वधिरोहण्यां खर्जूरीभूरुहेऽप्यथ ।
शेफालिकायां **निर्गुण्डी** सिन्दुवारेऽथ **नैचिकी** ॥ ४२ ॥

उत्तमायां गवि प्रोक्ता शिरोदेशे च सा गवाम् ।
प्रक्रिया त्वधिकारे स्याच्छब्दस्योत्पादनेऽपि च ॥ ४३ ॥

प्रकारे च **प्रतिष्ठा** तु स्थितौ माहात्म्य एव च ।
षोडशाक्षरके चापिच्छन्दोभेदे च गौरवे ॥ ४४ ॥

---

१. 'पि च' ग. पाठः.

क्षितौ ह्रस्वेऽपि पठिता समाम्नाये मनीषिणा ।
प्रतिमा तु प्रतिकृतौ गजानां दन्तबन्धने ॥ ४५ ॥

रभसोऽनुकृतौ चाह खेये तु **परिखाम्बुधौ** ।
भूभृत्यपि समाम्नाता समाम्नाये मनीषिणा ॥ ४६ ॥

प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे ।
कारणे शिश्नयोन्योश्च जन्त्वमात्यादिमातृषु ॥ ४७ ॥

प्रत्ययात् पूर्वभागे च च्छन्दसोश्चोभयोरपि ।
अष्टाक्षरेऽप्यत्युक्ताख्ये तथा सलिलसंज्ञके ॥ ४८ ॥

विज्ञेया चतुराशीतिस्वरे च **प्रसृतिः** पुनः ।
तन्तौ वाचि च जाले वा तात्पर्येऽपि च बन्धने ॥ ४९ ॥

अथ **प्रवृत्ति**र्वार्तायां व्यापारे हस्तिनां मदे ।
कुलत्थसंज्ञधान्ये चाप्युच्चारेऽपि च सज्जनः ॥ ५० ॥

प्रवाहे च **प्रसूति**स्तु पुत्रयोरपि जन्मनि ।
प्रसवाख्यक्रियायां च वल्लीविस्तारयोः पुनः ॥ ५१ ॥

प्रततिर्वैजयन्त्यां तु वीरुधीत्याह शब्दवित् ।
पक्षतिः पक्षमूलेऽपि प्रतिपत्संज्ञके तिथौ ॥ ५२ ॥

पद्धतिः पथि पङ्क्तौ च **परीष्टि**स्तु परीक्षणे ।
मार्गणे परिचर्यायामभितो यजनेऽपि च ॥ ५३ ॥

प्रवेणी तु कुथायां च वेण्यां चाथ **प्रतोल्य**सौ ।
पुरस्य गोपुरे चापि रथ्यायां प्रतिपत् पुनः ॥ ५४ ॥

स्याद् बहिष्प्रवमानस्य प्रथमायामृचि स्मृता ।
पक्षस्य प्रथमायां च तिथौ बाधेऽपि कीर्तिता ॥ ॥ ५५ ॥

प्राचिका तु भवेत् तत्र या भवेद् वनमक्षिका ।
श्येनासंज्ञविहङ्गे च पालङ्क्यां तु प्रकीर्तिता ॥ ५६ ॥

शाकभेदे च रभसः सलक्ष्यामप्यभाषत ।
पापर्द्धिर्मृगयायां स्यात् पापर्द्धौ च प्रकीर्तिता ॥ ५७ ॥

पाताली वागुरास्थाल्योर्जङ्घामांसे तु **पिण्डिका** ।
रथचक्रस्य नाभौ च गृहधिष्ण्येऽथ **पूतना** ॥ ५८ ॥

देवजातिविशेषे च हरीतक्यां च तेषु च ।
रवेः शतानि चत्वारि रश्मीनां वृष्टिसृष्टये ॥ ५९ ॥

तेषां तुर्यशते ये स्यू रश्मयः **पूतना** पुनः ।
सेनाभेदे च वाहिन्यास्त्रिगुणात्मनि सा तथा ॥ ६० ॥

सेनायामपि युद्धे च **पृथिवी** तु महीखयोः ।
पृथ्वीका पुनरेलायां स्यात् तथा कृष्णजीरके ॥ ६१ ॥

बलाका तूदिता सर्वैर्बिसकण्ठ्याख्यपक्षिणि ।
शाकटायनसूरिस्तु व्याचष्टे स्मादिशाब्दिकः[1] ॥ ६२ ॥

बन्धक्यां कुलटायां चेत्यथात्र रभसोऽपठीत् ।
स्याद् वारललनायां च व्रीहिभेदे च **बर्बटी*** ॥ ६३ ॥

भित्तिका तु नदीभेदे शरावत्याह्वये स्मृता ।
तथा माषादिचूर्णे च वैजयन्त्यां स्वभूद् भ्रमः ॥ ६४ ॥

लिपिसङ्करतः स्थाने शरावत्याः शतावरी ।
अस्यार्थत्वेन निर्दिष्टा स्थेयान् वै शाकटायनः ॥ ६५ ॥

ब्रवीति वज्रे रभसः पुनरत्र पठत्यमुम् ।
भूजम्बूरिति गोधूमे विकङ्कतफलेऽपि च ॥ ६६ ॥

मञ्जूषावाक् तु पेडायां पुरे च कथिता बुधैः ।
मर्यादा तु व्यवस्थायां सीमायां च प्रकीर्तिता ॥ ६७ ॥

अथो **मनाका** कामिन्यां हस्तिन्यां च प्रकीर्तिता ।
अथात्र रभसेनायमर्धश्लोक उदीरितः ॥ ६८ ॥

---

१. 'ति' ख. ग. ङ. पाठः ।

---

* मातृकासु बर्पटीत्येव पाठो यद्यपि दृश्यते, तथापि कोशान्तरधातुपाठाद्यनुरोधेनैवं निवेशितः ।

स्यात् कृत्रिमा **मातृका** या †दातृका कारणे स्त्रे (?) ।
इत्येवमथ **मीमांसा** वेदवाक्यार्थचिन्तके ॥ ६९ ॥

शास्त्रे विचारणायां च सूरिभिः परिभाषिता ।
मुरली वंशवाद्ये च काहलायाश्च भेदके ॥ ७० ॥

पुण्ड्रिकासंज्ञकेऽथ स्याद् **मेखला** कटिसूत्रके ।
काञ्च्यामिति तु सिंहाद्याः श्रोणिस्थाने तु केचन ॥ ७१ ॥

खड्गुत्सरुं निबध्नन्ति येन द्रव्येण तत्र च ।
पर्वतस्य नितम्बेऽपि **रशना** त्वङ्गुलावपि ॥ ७२ ॥

काञ्च्यां च **रेणुका** तु स्याद्धरेण्वाह्वयभेषजे ।
जमदग्नेश्च भार्यायामथ स्याद् रेवती गवि ॥ ७३ ॥

बलभद्रस्य पत्न्यां च पौष्णनक्षत्र एव च ।
तद्युक्तकालमात्रे च तत्र जातस्त्रियामपि ॥ ७४ ॥

मालत्यां भेषजस्तम्बे नागदन्तीति विश्रुते ।
केषुचित् सामभेदेषु रेवत्य इति भूम्नि च ॥ ७५ ॥

प्रत्येकं स्युस्तृचे चापि रेवतीर्नउपक्रमे ।
मातृष्वप्याह रभसः शब्दवेदी सुधीरथ ॥ ७६ ॥

पथ्यायां गव्युमाकन्यालोहिनीषु च **रोहिणी** ।
कण्ठरोगप्रभेदे च नक्षत्रे च प्रजापतेः ॥ ७७ ॥

तद्युक्ते कालमात्रे च तत्र जातस्त्रियामपि ।
श्रुतौ तु मूलनक्षत्रेऽप्याज्ञाता दृश्यते बुधैः ॥ ७८ ॥

कृष्णस्य पत्नीभेदेषु प्रधानेष्वेकयोषिति ।
लक्ष्मिका गवि गोधायां वाद्यभेदे च कीर्तिता ॥ ७९ ॥

---

१. 'ड' ख. ग. पाठः. २. 'क्ते' ख. ग पाठः.

---

† 'धातृका' इति स्यात् । तथा च मेदिनी 'मातृका धातृकामात्रोर्देवीभिद्वर्णमात्रयोः' इति ।

लुम्बिका तु स्त्रियां वाद्यभेदे भक्षान्तरे तथा ।
उलुम्बसंज्ञे **वनिता** पुनः स्निग्धस्त्रियामपि ॥ ८० ॥

स्त्रीमात्रे च **वरत्रा** तु वध्र्यां वर्तौ च कीर्तिता ।
वसतिस्तु गृहे रात्रावववस्थाने जिनाश्रमे ॥ ८१ ॥

वर्तनिस्तु भवेद् वृत्तौ मार्गे स्यात् तक्रपिण्डके ।
स्याद् **वल्लरिस्तु** मञ्जर्यां लतायां च धनञ्जयः ॥ ८२ ॥

वल्लभिस्तु पुरीभेदे कूटागारेऽपि कीर्तिता ।
वाशिता तु करिण्यां च स्त्रियां चाप्यथ **वाणिनी** ॥ ८३ ॥

मत्तयोषिति नर्तक्यां विदग्धायां च कीर्तिता ।
वाणीचिस्तु स्मृता योगे छायायामपि वाचि च ॥ ८४ ॥

विरजा तूड्देशस्थे पूर्वभेदे जम्बुपादपे ।
वितण्डा तु भवेत् कच्छीशाके रभसभाषिता ॥ ८५ ॥

स्वपक्षस्थापनाहीनवादे तार्किकविश्रुता ।
विपणिः पण्यवीथ्यां स्यादापणेऽपि प्रकीर्तिता ॥ ८६ ॥

स्याद् **विच्छित्तिस्तु** विच्छेदे भावभेदे च योषिताम् ।
स च चायं वस्त्रमाल्यादेर्न्यासोऽनास्थोपशोभितः ॥ ८७ ॥

अथो **विपञ्ची** वीणायां वीणाभेदे च सोऽप्यसौ ।
नवतन्त्रीकोऽल्पदण्डो **विदारी** तु रुगन्तरे ॥ ८८ ॥

क्रोष्ट्रीसंज्ञलताभेदेऽप्युक्ता वेद्यां तु **वेदिका** ।
तथैवाङ्गुलिमुद्रायां **शर्करा** तु शिलान्तरे ॥ ८९ ॥

रोगभेदे सितायां च शकलाल्पकपालयोः ।
शर्करावत्प्रदेशे च गुडे चाप्याह यादवः ॥ ९० ॥

ब्रूते तु खण्डविकृतौ रभसो नाप्तभाषणः ।
शलाका तु भवेत् सूच्यां द्यूतोपकरणेऽपि च ॥ ९१ ॥

---

१. 'ड' क. ख. ड. पाठः.

अस्थूलदीर्घ[1]काष्ठादिमये वस्तुनि चाप्यथ ।
श्वदंष्ट्रा गोक्षुराभिख्यस्तम्बे यन्त्रान्तरेऽपि च ॥ ९२ ॥

परिखाया बहिर्भूमौ राज्ञां दन्तान्तरे शुनाम् ।
श्ववृत्तिस्तु शुनां वृत्तौ सेवायां चाथ **शष्कुली** ॥ ९३ ॥

अपूपभेदे कर्णस्य प्रदेशे च क्वचित् स्मृता ।
शकन्धुर्देवताभेदे तथैव स्याद् वनस्पतौ ॥ ९४ ॥

शिञ्जिनी नूपुरे मौर्व्यां **शुश्रूषा** तु कथानके ।
उपास्तौ श्रोतुमिच्छायां **षण्डाली** तु सरस्यपि ॥ ९५ ॥

स्त्रियामपि सरागायां तैलमानेऽथ **सप्तला** ।
सातलायां तथा गुञ्जानवमालिकयोरपि ॥ ९६ ॥

सन्धिला तु सुरङ्गायां नदी‡मन्दिरयोरपि ।
सरघा तु शुनीभेदे देवानां माक्षिकान्तरे ॥ ९७ ॥

मधुकारिण्यथ श्रेणौ **सरणि**र्मार्ग एव च ।
सन्ततिस्त्वन्ववाये स्यात् पारम्पर्येऽपि पुत्रयोः ॥ ९८ ॥

सम्मतिस्त्वपि वाञ्छायामनुज्ञापूजयोरपि[2] ।
समितिः परिषत्स्थाने युद्धे संसदि सङ्गमे ॥ ९९ ॥

स्यात् **संवित्तिस्तु** संवादे ज्ञाने **संसिद्धि**वाक् पुनः ।
सम्यक्सिद्धौ स्वभावे च मेदोऽग्रायां च कश्चन ॥ १०० ॥

स्यन्दिनी त्वपि लालायां गोभेदे च क्षरत्स्तने ।
सन्धिनी त्वप्यकाले या दुग्धा गौस्तत्र केचन ॥ १०१ ॥

---

१. 'र्घै' क. ख. ग. पाठः. २. 'र' ङ. पाठः.

---

‡ 'मदिरयोः' इति स्यात् । 'सन्धिला तु सुरङ्गायां नदीमदिरयोः स्त्रियाम्' इति दिनी ।

द्विकालदोह्या सत्येककालं गौर्दुह्यते हि या ।
तत्रेत्यन्ये परे त्वाहुर्वृषाक्रान्तगवीष्विति ॥ १०२ ॥

वत्सान्तरस्य सन्धानात् सन्धिनीत्यपरे विदुः ।
सिकतास्तु बहुष्वेकैर्वालुकार्थामुदीरिताः ॥ १०३ ॥

सिकतावति देशे च तथैव ब्रुवते परे ।
सिंहिका तु जनन्यां स्याद् राहोः किञ्च महार्णवम् ॥ १०४ ॥

लङ्घयन्तं हनूमन्तं याप्यगच्छज्जिघांसया ।
तस्यामपि च राक्षस्यां कन्याभेदेऽस्य लक्षणम् ॥ १०५ ॥

अविवाह्यासु कन्यासु नतजानुरिति स्मृतम् ।
एतत् त्वदृष्टपूर्वं च द्वेष्यं च रभसोदितम् ॥ १०६ ॥

सिथिला[२] तु नदीमद्यसुरङ्गासु भवेदिति ।
स्तिहिनी[३] तु महीजस्य फले स्याद्ङ्कुरे तथा ॥ १०७ ॥

सुषवी तु भवेत् कारवल्ल्यां कृष्णे च जीरके ।
हरिणिस्तु भवेन्मृत्यौ कुल्यायां **ह्लादिनी** पुनः ॥ १०८ ॥

वज्रे तटिति चेत्येवं व्यच्स्व्यध्यायः समाप्तवान् ॥ १०८½ ॥

इति व्यक्षरकाण्डे स्त्रीलिङ्गाध्यायः ।

अथ व्यक्षरकाण्डे पुल्लिङ्गाध्यायः[१] ।

अथ व्यक्षरपुल्लिङ्गशब्दाध्यायः प्रणेष्यते ।
अथ पुंस्यर्णवोऽम्भोधौ तथा षण्णवतिस्वरे ॥ १ ॥

---

१. 'यां मुनीरि' क. ग ङ. पाठः, २. 'धि' ख., 'फि' ङ. पाठः. ३. 'सि' ख. पाठः.

छन्दोभेदेऽन्वय**स्त्व**न्ववाये ऽनुगमने तथा ।
सम्बन्धे **चात्यय**स्तु स्यान्मरणे दोषदण्डयोः ॥ २ ॥

अतिक्रमे च कृच्छ्रे च मृग्यं त्वर्थान्तरं बुधैः ।
‡'नानात्ययानां वृक्षाणां' 'कामा नानात्यया' इति ॥ ३ ॥

एवमाद्यौपनिषदप्रयोगेषु मनीषिभिः ।
अनलश्चित्रके वह्नावनय**स्तु** विषघ्नपि ॥ ४ ॥

व्यसनेष्वशुभे दैवेऽप्यनीतौ च चतुर्ष्वपि ।
स्याद**भाव**स्त्वसत्तायां मृत्यौ च रभसोऽपठीत् ॥ ५ ॥

अस्य विष्णोश्च भावेऽर्थो **अलिन्दः** प्रघणाह्वये ।
गृहैकदेशे विद्वांस्तु व्याचष्टे शाकटायनः ॥ ६ ॥

तद्यथा भोजनस्थान इत्यर्थ स्यात् प्रसाधने ।
अलुमोऽर्थो नापितेऽर्थो अञ्जलिः करसम्पुटे ॥ ७ ॥

तथा कुडुवसंज्ञे च परिमाणेऽर्द्धितिः पुनः ।
अग्नौ च *शास्त्रभेदे च याच्ञायामवधिः पुनः ॥ ८ ॥

विवरे सीम्नि काले चाप्यथवा स्त्रीपभेदके ।
वेदभेदे च तत्रत्यमन्त्रेष्वपि तथास्य च ॥ ९ ॥

अध्येतर्यङ्गिरास्तु स्याद्दर्षिभेदे तथास्य च ।
वंश्येष्वङ्गिरसो भूम्नि शाकटायनदृक् † पुनः ॥ १० ॥

बृहस्पतावङ्गिरसं प्रोक्तवानथ कथ्यते ।
अनेहा काल इन्द्रे चाप्यनेधास्त्वग्निवातयोः ॥ ११ ॥

आम्नायस्तु भवेद् वेदे सम्प्रदायान्ववाययोः ।
पाठाभ्यासे **चागम**स्तु शास्त्रेऽप्यागमनेऽपि च ॥ १२ ॥

---

‡ 'नानात्ययानां नानाफलानाम्' नानात्ययाः, अत्ययोऽनागमनं, वस्तुस्वरूपमतीत्य विषयेषु प्रवेशः' (छा उ. १. १, ४. १०. ३) इति आनन्दगिरिः । * 'शास्त्रभेदे' इति स्यात् ।
† शाकटायनपण्डित इत्यर्थः ।

उपदेशेऽप्यथाकर्षो द्यूते च द्यूतपाशके ।
आकृष्टौ शारिफलके हस्तिनोऽवयवान्तरे ॥ १३ ॥

स चावयव एष स्यादूर्ध्वदेशं कराङ्गुलेः ।
विभज्य सप्तधा तेषां भागानामादितो हि यः ॥ १४ ॥

द्वितीयभागस्तत्र स्यात् पार्श्व आवर्त्तवाक् पुनः ।
नृत्तस्थाने जनपदप्रभेदे च जने युधि ॥ १५ ॥

आवर्त्तोऽम्भोभ्रमे रोमप्रभृतेर्वलिते चये ।
आवर्त्तनायामावृत्तावाक्रन्दस्तु प्रभौ नृपे ॥ १६ ॥

मित्रे च रभसस्त्रातर्याह्वाने रुदिते युधि ।
आरावेऽन्ये दारुणे च स्यादाकल्पस्तु कल्पने ॥ १७ ॥

वेषेऽप्याहुरथारम्भ उद्यमेऽपि वधेऽपि च ।
उपक्रमे च निर्माणेऽथालम्भः स्पर्शने वधे ॥ १८ ॥

आकरस्तु समूहे स्यादुत्पत्तिस्थान एव च ।
स्याद् रत्नलवणादीनामाकारस्त्वात्मवैकृते ॥ १९ ॥

आह्वाने चाकृतौ चापि स्यादथाहार ओदने ।
आनीतौ भक्षणे चाथो आरोहो दैर्घ्य उन्नतौ ॥ २० ॥

द्रुमाङ्गेऽप्यवरोहाख्ये हस्तिवाहे च कीर्त्तितः ।
श्रोण्यामारोहणेऽन्ये तु वरारोहाकटिस्थले ॥ २१ ॥

आग्रहस्तु स्वीकरणे निर्बन्धे निग्रहेऽपि च ।
आसङ्गे चाप्यथानाहो बन्धने चोदरस्य च ॥ २२ ॥

अधोवृद्ध्यात्मके व्याधावारट्टास्तु बहुष्वपि ।
नीवृद्भेदे द्वयोस्तु स्यात् तद्देशोद्भूतजन्तुषु ॥ २३ ॥

---

१. 'चा' ख. पाठः. २. 'स्त' क. ग. ङ. पाठः. ३. 'च' ख. पाठः.

तद्देशोद्भवघोटे स्यादाघाटः सीमघातयोः।
आघातस्ताडने घातेऽप्यापातः पतने तथा ॥ २४ ॥

तदात्वे चाप्यापतनेऽप्याधारस्त्वालवालके।
अम्बुबन्धेऽधिकरणे वाप्यां त्वजय उक्तवान् ॥ २५ ॥

आरामः स्यादुपवने विरामे परिकीर्त्तितः।
आयासस्तु *प्रसन्ने स्यात् क्लेशे चायामवाक् पुनः ॥ २६ ॥

दैर्घ्ये रज्जुपटादीनामभितश्च विकर्षणे।
आचामस्त्वोदनस्य स्यान्निःस्रावे मासराह्वये ॥ २७ ॥

आचान्तौ चाप्यथावाप आलवाले तथैव च।
प्रक्षेपे न्यसने त्वन्येऽथाश्वासो विश्रमे तथा ॥ २८ ॥

ग्रन्थावच्छेदभेदे च काव्यादीनां प्रकीर्त्तितः।
आशुक्षेपेऽप्यथातङ्को रोगे सन्तापशङ्कयोः ॥ २९ ॥

आलेपः पुनरालिप्तावनुलेपनवस्तुनि।
आक्षेपः पुनराकृष्टौ निन्दाभर्त्सनयोरपि ॥ ३० ॥

वातव्याधिविशेषेऽथो परिपूर्णत्वयत्नयोः।
आभोगो वारुणच्छत्रेऽप्यामोदः[2] पुनरुच्यते ॥ ३१ ॥

हर्षे गन्धविशेषे च स च गन्धोऽयमीदृशः।
विमर्दोत्थः परिमलो गन्धो जनमनोहरः ॥ ३२ ॥

स एव योऽतिनिर्हारी स स्यादालोकवाक् पुनः।
उद्द्योते दर्शनेऽपि स्यादिति प्राहुर्मनीषिणः ॥ ३३ ॥

आयोगोऽव्याप्तौ गन्धमाल्याद्युपहृतौ तथा।
आजीवस्तु क्षपणके जीविकायां च कीर्त्तितः ॥ ३४ ॥

---

१. 'रतावपि की' ख. पाठः. २. 'व' ङ. पाठः.

---

* 'प्रयत्ने' इति स्यात्।

आपीडः शेखरे जातिच्छन्दोभेदेऽप्यथासवः ।
पूगवृक्षे तथा मद्यसन्धाने यस्य चापरम् ॥ ३५ ॥

नाम स्यादासुतिरिति तत्र मद्यान्तरे तथा ।
अपक्वेक्षुरसैः सिद्धे स्यादावन्ध्यस्तु बन्धने ॥ ३६ ॥

योक्त्रे च स्यादथारक्षो हस्तिनः कुम्भयोरधः ।
प्रदेशे नगरादीनां चोराद्यपरिहारके ॥ ३७ ॥

आत्मभूर्मन्मथे विष्णौ विरिञ्चे चाप्यथोत्सवः ।
उत्सेकामर्षयोरिच्छाप्रसरे च महे तथा ॥ ३८ ॥

रभसस्तूत्सुके स्माह तदेतदसमञ्जसम् ।
उत्सेधो मकुटच्छत्रध्वजेपूष्णीषकाययोः ॥ ३९ ॥

प्रसोमदेववर्गस्य चतुर्थे साम्नि चोच्चतौ ।
उत्सङ्गः पुनरङ्के स्याद् गजस्यावयवान्तरे ॥ ४० ॥

गजस्य पूर्वपादस्य पिण्डिकान्तं नखात् परम् ।
विभज्य सप्तधा तत्र क्रमाद् भागश्चतुर्थकः ॥ ४१ ॥

अधः प्रारभ्य जानीयात् तच्चाप्यवयवान्तरम् ।
अग्न्याधाने च रभसोऽथोत्सर्गस्त्यागदानयोः ॥ ४२ ॥

सामान्यवाक्येऽथोद्घातः कुट्टङ्के समुपक्रमे ।
स्यात् पादस्खलने चापि स्यादुद्घननकर्मणि ॥ ४३ ॥

गजस्य कर्णमूलाच्च चूलिकासंज्ञकात् परे ।
प्रदेशे मानभेदे च प्राणायामस्य कालतः ॥ ४४ ॥

तस्य लक्षणमप्युक्तं योगविद्भिः पुरातनैः ।
चोटिका त्रिः परामृश्य जानु स्फोटक्रियाथ ताः ॥ ४५ ॥

षट्त्रिंशन्मन्द उद्घातो द्विगुणद्विगुणौ पुनः ।*
उत्पातस्तूदितः साद्रिरुपप्लव इति श्रुते ॥ ४६ ॥

---

१. 'तः' ख. पाठः.

---

* इतःपरं 'मध्यमश्चैवोत्तमश्च प्रथमो द्वादशैव वा' इत्यर्धमपेक्षितम् ।

अजन्ये स्याच्चोत्पतन उच्छ्वासः पुनरुच्यते ।
ग्रन्थावच्छेदभेदे स्यात् क्वचिदुच्छ्वसनेऽपि च ॥ ४७ ॥

उत्त्रासस्तु भये सम्भ्रमशारवेरणविधे ।
यूपस्य मूलादारभ्य द्वितीयेऽथ विवाहके ॥ ४८ ॥

उद्वाह ऊर्ध्ववहने पुत्रेऽप्युद्धारणाक् पुनः ।
ऋणे चावृद्धिके किञ्च भवेदुद्धरणेऽपि च ॥ ४९ ॥

उद्दालस्तु भवेद् वृक्षे श्लेष्मातक इति श्रुते ।
उन्नते मुकुलाकारे मत्स्यग्रहणसाधने ॥ ५० ॥

दाशानां स्यादथोद्गीनः साम्नि स्यात् पञ्चधा कृते ।
द्वितीयभक्तौ विद्वांस्तु व्याचष्टे शाकटायनः ॥ ५१ ॥

सामगाने गुणामूर्ध्वमुखानां च विगर्वके ।
उद्कर्ष भाविकालस्यफलेऽन्तावयवेऽपि च ॥ ५२ ॥

रभसस्त्वाह मदनकण्टके शब्दचिन्तकः ।
उदयस्तूदयाद्रौ स्याद् धनोत्पत्तौ तथोद्भवे ॥ ५३ ॥

उन्नतौ चाह रभस उपरिस्थेऽप्यधीयते ।
उच्चयो वस्त्रनीव्यां स्याद्धस्तादाने च चौर्यतः ॥ ५४ ॥

अधः स्थितस्य पृष्पादेरूर्ध्वमुच्चिक्षिपे यथा ।
उपायः पर्वभेदे स्यात् पूर्वस्मिन् सामपर्वणाम् ॥ ५५ ॥

निधनात् कर्मणां सिद्धेर्लघुमार्गणसाधने ।
राज्ञां च सामदानादौ विशेषाच्चोपसर्पणे ॥ ५६ ॥

उपवस्तु रवौ दाहेऽप्युपाधिः पुनरुच्यते ।
उपधानक्रियायां च रथस्यावयवान्तरे ॥ ५७ ॥

औपधेयसमाख्ये च व्याजे चोपाधिवाक् पुनः ।
कुटुम्बव्याप्तते धर्मचिन्तायां च यदप्यदः ॥ ५८ ॥

कार्यान्वयव्यवच्छेत्तृ तत्राथोदयनोऽपठीत् ।
साधनाव्यापकत्वे स्यात् समव्याप्तिकता तु या ॥ ५९ ॥

साध्येनायमुपाधिः स्यादित्येवमथ ऋक्षरः ।
कण्टके च जलस्थानेऽप्यृत्विज्यपि तथापरे ॥ ६० ॥

पठन्ति तोयधारायामित्येधितुपदं* पुनः ।
अग्नौ समुद्रे शैले च ककुभस्त्वर्जुनद्रुमे ॥ ६१ ॥

वीणाप्रसेवके गेयभेदे च कलमः पुनः ।
लेखन्यामङ्कुरे शालिप्रभेदे तस्करेऽपि च ॥ ६२ ॥

कल्लोलस्तु महत्यूर्मौ शत्रौ च रभसोदितः ।
कपर्दस्तु जटाजूटे देवदेवस्य शूलिनः ॥ ६३ ॥

दृश्यते च जटाजूटमात्रे स्याच्च वराटके ।
कर्दमस्त्वत्र पङ्कारे पङ्के च रभसोदितः ॥ ६४ ॥

कलङ्कस्त्वपवादे च चिह्ने च कलहः पुनः ।
युद्धे द्वन्द्वे च करभः पुनः कीर्त्तित आतपे ॥ ६५ ॥

तथोक्तो धान्यपवने कटहः पुनरुच्यते ।
पर्जन्ये कर्णवति च कालायसविनिर्मिते ॥ ६६ ॥

जलपात्रेऽथ कणयः शरभेदे च भाषितः ।
क्रतुभेदे च कचपः पुनः शाकपलालयोः ॥ ६७ ॥

पत्रे तिले करूशास्तु नीवृद्भेदे हि भूमनि ।
स्यात्तु क्षत्रियभेदेऽसौ सर्वैश्च वचनैर्युतः ॥ ६८ ॥

वैद्यस्तु तण्डुलकणे कश्चिद् ब्रूते तु सज्जनः ।
कुसूले रभसस्त्वाह कदरः खदिरे सिते ॥ ६९ ॥

---

१. 'स्य विच्छेद त' (?) ङ. पाठः.

---

* 'एधतुः पुरुषेऽग्नौ ना' इति तु मेदिनी ।

रोगक्रकचयोश्चाथ कटभेदे **कटोलवाक्** ।
तथा वादित्रभेदे च **कर्कारस्तु** महीरुहे ॥ ७० ॥

नवनीतेन मिश्रे च तक्रे नवविलोलिते ।
क्षवथुस्तु क्षुते कासे **कारुजः** पुनरुच्यते ॥ ७१ ॥

*नाकौ च कलभे चापि जानीयात् पण्डितो जनः ।
किरणस्त्वश्वरश्मौ च रश्मौ च कथितो बुधैः ॥ ७२ ॥

किंशारुस्तु शरे धान्यशूके च स्यात् तु **कीचकः** ।
वातोद्धूतस्वनद्वेणौ दैत्यभेदे च यः किल ॥ ७३ ॥

स्यालो विराटराजस्य तत्र स्यात् **कुडुबैः** पुनः ।
परिमाणे पक्षिनीडे **कुबेरस्तु** द्रुमान्तरे ॥ ७४ ॥

नान्दीवृक्षाह्वये राजराजे च **क्षुरकः** पुनः ।
कोकिलाक्षाह्वयस्तम्बे तिलकाख्ये च पादपे ॥ ७५ ॥

कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ।
†**केनारः** कुम्भिनरके शिरःकापालसन्धिषु ॥ ७६ ॥

इत्येवं रभसेनोक्तमुत्तरार्धे च तद्वचः ।
§**कोट्टारो** नरके कूपे पुष्करिण्याश्च पाटके ॥ ७७ ॥

खजकस्त्वपि मन्थाने घृते चाप्यथ **खर्बरः** ।
भिक्षापात्रे कपाले च करे चाप्यथ **खण्डिकः** ॥ ७८ ॥

---

१ 'र्ता' ङ., 'र्करास्तु' ग. पाठः. २. 'भौ' क. पाठः. ३. 'व' क. ख. ग. च. पाठः. ४. 'क्त' क. पाठः. ५. 'र्थे' ख. ग. घ. पाठः.

---

* 'कारुजः कलभे फेने वल्मीके नागकेसरे । गैरिके शिल्पिनां चित्रे स्वयञ्जाततृणेऽपि च ॥' इति हेमचन्द्रः । 'कारुजः शिल्पिनां चित्रे वामलूरे गजार्भके' इति मेदिनी । 'कारुजः कलभे नाके' (पृ. २४०. श्लो. १८) इति तु वैजयन्ती । † 'केनारः कुम्भिनरके शिरःकपोलसन्धिषु' इति मेदिनी । § कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके' इति तु मेदिनी ।

हरेणुसंज्ञधान्ये च कलायाख्ये च धान्यके ।
गमथस्तु पथि ज्ञेयो जलधाने च कीर्तितः ॥ ७९ ॥

गालवस्त्वृषिभेदे च लोध्रे च **गिरिणः** पुनः ।
आचार्ये जलदे ग्रामे रभसस्त्वाह **गुण्डकः** ॥ ८० ॥

कलोक्तौ[1] मलिने धूलौ स्नेहपात्र इतीदृशम् ।
गोधूमस्तूदितो नागरङ्गधान्यप्रभेदयोः ॥ ८१ ॥

गोपीथो गोनिपाने च तीर्थे कालान्तरेऽपि च ।
गोकीलो[2] मुसले सीरे **गोविन्द**स्त्वपि शार्ङ्गिणि ॥ ८२ ॥

गवामधिकृते चाथ **गोसर्जः** सर्जने गवाम् ।
प्रभाते **गोरस**स्तु स्यात् कालशेये च दध्नि च ॥ ८३ ॥

गोपतिस्तु रवौ शण्डे शिवे च रभसः पुनः ।
नम्रे वन्दिनि **गोरङ्कु**रित्याह **घुटिकः** पुनः ॥ ८४ ॥

गुल्फे गजतुरङ्गादेः पश्चाच्चरणबन्धके ।
शङ्कावथ स्याज्**जम्बीरो** जम्भलाह्वयपादपे ॥ ८५ ॥

तथा मरुवकाख्ये च स्तम्बेऽथ स्याज्**जरूढ**वाक् ।
अग्नौ संवत्सरे मासे शरीरेऽप्यथ **जर्तिलः** ॥ ८६ ॥

ऋषिभेदे तथैव स्यादरण्यजतिलेऽपि च ।
जसुरिस्त्वरुणौ[3] पैत्रे वह्नौ चाथ **जटायु**वाक् ॥ ८७ ॥

रामायणप्रसिद्धे स्याद् गृध्रराजेऽपि गुग्गुलौ ।
जनिमा मातापितरावुत्पत्तिस्तनयोऽपि च ॥ ८८ ॥

जागृविस्त्वग्निनृपयोर्**जामाता** त्वात्मजापतौ ।
तथा श्वेततिले चापि सूर्यावर्ते च कश्चन ॥ ८९ ॥

---

१. 'क्ति' ङ. पाठः. २. 'कीले गो' ग. पाठः. ३. 'रुणौ' क. ख. ङ. पाठः. ४. 'पा' ख., 'पत्रव' ग. पाठः.

जीमूतस्तु गिरौ मेघे देवताडाख्यवल्लिषु ।
अथोत्तरार्धं रभसः पपाठ बहुवित्तमः ॥ ९० ॥

तमालो वरुणे खड्गे तापिञ्छे तिलकेऽपि च ।
तपनस्तु रवौ चन्द्रे घर्मेऽपि च पशावपि ॥ ९१ ॥

†**त्र्यङ्गः** शिक्यभेदे च विधौ जन्यां च कीर्तितः ।
तन्यतुस्तु रवावुक्तौ गिरौ च परिकीर्तितः ॥ ९२ ॥

तमोनुत् त्वग्निचन्द्रार्केष्वथ **तापिञ्छ** इत्ययम् ।
सिंहेनोक्तस्तमालद्रौ काकतुण्डचां तु यादवः ॥ ९३ ॥

त्रिवर्गो धर्मकामार्थत्रयेऽप्योषे फलत्रिके ।
स्थितिवृद्धिक्षये राज्ञां त्रयाणां वर्ग एव च ॥ ९४ ॥

त्रिककुत् तु त्रिकूटाख्यपर्वतेऽपि च शार्ङ्गिणि ।
त्रिधामा वासुदेवेऽग्नौ **दलवस्तु** दलान्तरे ॥ ९५ ॥

धनञ्जयस्तु विदले प्राह प्रहरणेऽप्यथ ।
कुलालचक्रे वहने **दण्डारः** स्थिरयन्त्रके ॥ ९६ ॥

दरथो विवरे भीत्यां दिक्षु चापि प्रसारणे ।
दध्नास्तु रवौ वह्नावुत्तरार्धं तु राभसम् ॥ ९७ ॥

स्यान्मयूरशिखायां च यवान्यामपि **दीव्यकः** ।
दुघणस्तु विरिञ्चे च मुद्गलेऽप्यथ **देवलः** ॥ ९८ ॥

ऋषिभेदे तथा देवाजीवे चाप्यथ **देवयुः** ।
धार्मिके याजके होमे **दैत्यारिर्**विष्णुदेवयोः ॥ ९९ ॥

नरेन्द्रस्तु नृपे मन्त्रवादिन्याह तु यादवः ।
विषवैद्येऽथ **नभस** ऋतौ व्योम्नि सरित्पतौ ॥ १०० ॥

---

† 'त्र्यङ्गटं शिक्यभेदेऽपि धौताज्जन्यां च न द्वयोः' इति तु मेदिनी ।

नर्मठस्तु भवेत् षिद्धे चूचुके **नमसः** पुनः ।
वेत्रे प्रणामे **नमुचिः** पुनर्दैत्यान्तरे स्मरे ॥ १०१ ॥

नदनुस्तु मृधे मेघे **नाथी**[1]**तस्तु** प्रजापतौ ।
आहारे चाथ **निगमो** नगरे च वणिक्पथे ॥ १०२ ॥

वेदे च निश्चये मार्गे पदानामर्थशासके ।
ग्रन्थभेदेऽथ रभसो वणिज्यपि कटेऽपि च ॥ १०३ ॥

निवापस्तु भवेदुप्तौ पितॄणामपि तर्पणे ।
निपातः स्यादधःपाते चादिप्रभृतिषु स्मृतः ॥ १०४ ॥

निघातस्त्वनुदात्ताख्यस्वरे निहननेऽपि च ।
निकायस्तु शरव्ये स्यात् समूहेऽपि सधर्मणाम्[2] ॥ १०५ ॥

गृहे बहूनामेकत्रकरणे परमात्मनि ।
निष्कुटस्तु गृहारामे कवाटे च प्रकीर्तितः ॥ १०६ ॥

सहस्रांशुतुरङ्गे तु ***निर्नर**स्तुषपावके ।
निकारस्तु तिरस्कारे धान्यस्योत्क्षेपणेऽपि च ॥ १०७ ॥

नितम्बस्तु वधूकट्याः पश्चाद्भागे परे पुनः ।
श्रोणिमात्रेऽद्रिकटके **निर्यू**[3]**हस्त्वपि** शेखरे ॥ १०८ ॥

द्वारे काथे च निर्यासे नागदन्त्याख्यशङ्कुषु ।
निष्क्रमो बुद्धिसामर्थ्ये निर्गतौ दुष्कुले तथा ॥ १०९ ॥

निर्वेश उपभोगे स्याद् वेतने मूर्च्छनेऽपि च ।
स्या**न्निषङ्ग**स्तु तूणीरे सङ्गेऽप्यथ **निसर्ग**वाक् ॥ ११० ॥

स्वभावे सर्जने न्यासे निर्गमेऽप्यजयोऽपठीत् ।
निष्पावः शिम्बिसंज्ञे स्याद् धान्ये ब्रूते तु यादवः ॥ १११ ॥

---

१. 'माणे न' क. ग. पाठः. २. 'धा' ग. पाठः. ३. 'मिं' ग. पाठः.

---

* 'निर्झरस्तु सहस्रांशुतुरङ्गे तुषपावके' इति तु मेदिनी ।

श्वेतशिम्बौ च निष्पूतिक्रियायां रभसः पुनः ।
कडङ्गरे तथा प्राह्ण पवने निर्विकल्पके ॥ ११२ ॥

निःस्रावणक्रियायां तु **निःस्रावो** भक्तमण्डके ।
निवेशस्तु विवाहे स्याच्छिबिरे च निवेशने ॥ ११३ ॥

निवेशनं च रचना स्थितिर्निषदनं तथा ।
निमेषोऽष्टादशांशे स्यात् काष्ठायाश्च निमीलने ॥ ११४ ॥

निक्षेपस्तु निधाने स्यात् तथोपनिधिसंज्ञके ।
द्रव्यभेदे परवशस्थापितेऽथ **निषेधवाक्** ॥ ११५ ॥

प्रसोमदेववर्गस्य पञ्चमे साग्नि कीर्तिता ।
प्रतिषेधे **निरोधस्तु** रोधे संक्षयनाशयोः ॥ ११६ ॥

निचोलः प्रच्छदपटे कञ्चुके **निलयः** पुनः ।
गृहे निलयने चाथ **नियमः** स्यान्नियन्त्रणे ॥ ११७ ॥

आज्ञायां च प्रतिज्ञायां व्रतनिश्चययोरपि ।
निवहस्तु समूहे स्याद् वायुस्कन्धान्तरेऽपि च ॥ ११८ ॥

निह्नवस्त्वपलापे स्याद् विश्वासे निकृतावपि ।
यादवस्तु सुविश्वासे नमस्कारेऽपि साञ्जलौ ॥ ११९ ॥

निग्रहो भर्त्सने सीम्नि रभसो बन्धनेऽपि च ।
निशीथस्त्वर्धरात्रे स्यात् प्रदोषे कश्चिदब्रवीत् ॥ १२० ॥

निकुम्भः कुम्भकर्णस्य पुत्रे स्तम्बान्तरेऽपि च ।
नागदन्तीसमाख्येऽथ हिमानिलनिवारणे ॥ १२१ ॥

प्रावारभेदे **निस्तारस्तृणीरे** कश्चिदब्रवीत् ।
प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ॥ १२२ ॥

---

१. 'ङ्ग' क. ग. घ. पाठः. २. 'ने' ख. पाठः. ३. 'णे' क. ङ. पाठः.

रन्ध्रे च प्रथितत्वे चाप्याचारप्रतियानयोः ।
सनादिशब्दावयवे तथैव स्यात् सुबादिषु ॥ १२३ ॥

प्रभवः स्यादपां मूले विक्रमे जन्मकारणे ।
आद्योपलब्धिस्थानेऽथ प्रतापे स्यात् **प्रभाव**वाक् ॥ १२४ ॥

माहात्म्ये च **प्रग्रह**स्तु बन्धामारग्वधद्रुमे ।
तुलासूत्रेऽश्वादिरश्मौ रश्मौ नियमनेऽर्चने ॥ १२५ ॥

प्रग्राहस्तु तुलासूत्रे तथैवाश्वादिरश्मिषु ।
प्रवहो वायुभेदे स्याद् वायुमात्रे बहिर्गतौ ॥ १२६ ॥

प्रवाहस्तु प्रकृष्टाश्वे जलवेगे प्रवर्तने ।
परम्परायामपि च **प्रकर**स्तु कदम्बके ॥ १२७ ॥

तथैव ततपुष्पादौ भेदसादृश्ययोः पुनः ।
प्रकारोऽथ **प्रमाथः** स्याद्धिंसायां च प्रमन्थने ॥ १२८ ॥

वैजयन्तीसमुद्दिष्टो धन्विनां *लस्तकग्रहे ।
प्रस्तरो मणिपाषाणकुशेषु कथितो बुधैः ॥ १२९ ॥

प्रस्तारस्तु प्रस्तरणे वृत्तविन्यसनेऽपि च ।
प्रस्तावः स्यादवसरेऽधिकारे सामवेदिनाम् ॥ १३० ॥

साम्नः प्रथमभक्तौ च **प्रक्रमः** स्यादुपक्रमे ।
प्रमाणभेदे सोऽप्युक्तो द्विपदस्त्रिपदोऽपि वा ॥ १३१ ॥

अथ **प्रयामो** नीवाके प्रयात्यो[1] च[2] प्रकीर्तितः ।
प्रसवो जननानुज्ञापुत्रेषु फलपुष्पयोः ॥ १३२ ॥

पारम्पर्यप्रसङ्गेऽपि† प्राणिनां गर्भमोचने ।
प्रेरणे प्रसृतौ चाथ **प्रसरः** प्रणवे स्मृतः ॥ १३३ ॥

---

१. 'न्ना' क. ख. पाठः. २. 'व' क. ङ. पाठः.

---

* 'लस्तको धनुषो मध्यम्' (पृ. ११८. श्लो. १७७) इति वैजयन्ती । † 'प्रायश्ये' इति स्यात् । ‡ 'पारम्पर्ये प्रसङ्गेऽपि' (पृ. २४३. श्लो. ४८) इति तु वैजयन्ती ।

वेगे च **प्रणय**स्तु स्याद् याच्ञायां सौहृदेऽपि च ।
विस्रम्भे स्यात् परिचये निर्माणे रभसः पुनः ॥ १३४ ॥

प्रसरे चाप्यभाषिष्ट **प्रणव**स्तु स्तुतावपि ।
ओङ्कारे **प्रलय**स्तु स्यान्मृत्यावस्पन्दनस्थितौ ॥ १३५ ॥

मूर्च्छायामपि कल्पान्ते श्लेषे चापि क्षयेऽपि च ।
प्रदरस्तु भवेद् भङ्गबाणयोः स्त्रीरुजान्तरे ॥ १३६ ॥

रक्तस्रुत्यात्मके दीर्णौ **प्रपञ्च**स्तु विपर्यये ।
विस्तारे सञ्चये च स्यात् प्रवेष्टस्तु भुजे भवेत् ॥ १३७ ॥

गजस्य दन्तमूलाच्च करीर्यास्यात् परे भवेत् ।
प्रदेशेऽथ **प्रकोष्ठ**ः स्यादलिन्दे राजसद्मनाम् ॥ १३८ ॥

कक्ष्यान्तरे च हस्तस्य कफोणिमणिबन्धयोः ।
मध्ये चाथ **प्रयोग**ः स्यात् सुरतर्णप्रतानयोः ॥ १३९ ॥

कर्मणां च विधौ चापि प्रयुक्तौ प्रेरणात्मनि ।
उच्चारितेषु शब्देषु शब्दस्योच्चारणेऽपि च ॥ १४० ॥

प्रदेशस्त्वेकदेशे स्यादुपदेशप्रदानयोः ।
प्रादेशेऽप्याह रभसः **प्ररोह**स्तु प्ररोहणे ॥ १४१ ॥

अङ्कुरेऽथ **प्रतोद**ः स्यात् तोत्रे चापि प्रतोदने ।
सामप्रभेदयोश्चापि परीतेत्यृचि गीतयोः ॥ १४२ ॥

प्रसादस्तु प्रसत्तौ स्यात् स्वच्छत्वेऽप्यनुरोधने ।
काव्यालङ्कारभेदे च **प्रभास**स्तु प्रभासने ॥ १४३ ॥

तीर्थभेदे **प्रचार**स्तु प्रायशश्चरणे तथा ।
खड्गे चाथ **प्रताप**ः स्यात् प्रभावभृशतापयोः ॥ १४४ ॥

प्रपातस्तु प्रपतने तथा सौत्रिकरोधसोः ।
गिरेर्भृगौ च **प्रस्राव**ः पुनः प्रस्रुतिमूत्रयोः ॥ १४५ ॥

भक्तमण्डे **प्रघाण**स्तु तरुस्कन्धेऽप्यलिन्दके ।
प्रघणस्तु तथालिन्दे लोहमुद्गरयोः स्मृतः ॥ १४६ ॥

प्रतिघस्तु प्रतिहतौ स्यात् क्रोधवधयोरपि ।
परिघस्त्वर्गले दण्डे परिघातास्त्रयोरपि ॥ १४७ ॥

कालयोगविशेषे च मूढगर्भे च मुद्गरे ।
पराकस्तु द्वादशाहोपवासात्मव्रतान्तरे ॥ १४८ ॥

अहीनक्रतुभेदानां त्रिरात्राणां तथा क्वचित् ।
दूरे खड्गे **पराग**स्तु पुष्परेणौ रजस्यपि ॥ १४९ ॥

स्नानीयादौ च रभसस्त्वद्रिभेदोपरागयोः ।
विख्यातौ चाथ सम्प्रोक्तः **पर्याय**ोऽवसरे क्रमे ॥ १५० ॥

सामस्तोत्रगतस्तोमतृतीयांशेऽप्यथ स्मृतः ।
पर्यस्तिकायां खट्वायां **पर्यङ्क**ः स्याच्चतुर्ष्वपि ॥ १५१ ॥

ज्ञेय ‡आसनभेदेषु **पर्जन्य**स्तु पुरन्दरे ।
गर्जदभ्रेऽभ्रनिनदे वास्तुदेवान्तरे तथा ॥ १५२ ॥

अस्त्रयन्त्रे **पर्वत**स्तु मुनिभेदे गिरावपि ।
मेघेऽप्यथ **पटीर**ः स्यात् कन्दर्पे चापि चन्दने ॥ १५३ ॥

कन्दरे त्वपरे चाहुः **पत्सल**स्तु प्रकीर्तितः ।
प्रहारेऽन्यैः प्रहासेऽन्यैः **पणव**स्त्वपि डिण्डिमे ॥ १५४ ॥

गजस्कन्धेऽप्यथो चारे **प्रणिधि**ः प्रार्थनेऽपि च ।
प्रणिधाने च रभसः प्राहार्धश्लोकमुत्तरम् ॥ १५५ ॥

खड्गधेनुदले फेने **परञ्ज**स्तैल†पत्रके ।
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ॥ १५६ ॥

प्राकारे दृश्यते चापि षट्सु शुक्रियसामसु ।
परिधानक्रियायां च **परशु**स्तु परश्वधे ॥ १५७ ॥

---

‡ पद्मार्धपद्मनिगूढचरणपादोपवेशात्मकेषु । † 'यन्त्रके' इति स्यात् । 'परञ्जस्तैलयन्त्रे स्याच्छुरिकाफलफेनयोः' इति मेदिनी ।

वज्रे च टङ्कणे क्षारे **पलाण्डु**स्तु निरूपितः ।
कन्दभेदे सुकन्दाख्ये दुर्गन्धे त्यक्तभक्षणे ॥ १९८ ॥

दशानामपि तज्जातिभेदानां कुत्रचित् स्मृतः ।
परिव्वा तु मरुद्वह्न्योश्चन्द्रे **प्राग्भार**वाक् पुनः ॥ १९९ ॥

विज्ञेयो गिरिशृङ्गाग्रे तथैवातिशयेऽपि च ।
प्रकृष्टासादने तु स्यात् **प्रासादो** मन्दिरान्तरे ॥ १६० ॥

नृपाद्यदेवतादीनां **प्राणथ**स्तु प्रजापतौ ।
मदनाख्यद्रुमे चाथ **पार्यरो**† रभसोदितः ॥ १६१ ॥

भक्तसिक्थे कदम्बस्य केसरे रभसः पुनः ।
पाटीरो मूलके[1] वज्रे[2] वातिके[3] लितहेन्यपि(?)[4]* ॥ १६२ ॥

केदारे वेणुसारे च प्राह वारिधरेऽपि च ।
इत्येवं **पुलक**स्तु स्याच्छत्रस्थास्वणुराजिषु ॥ १६३ ॥

हीरके रभसस्त्वत्र पठति श्लोकमुत्तरम् ।
कृमिप्रभेदे गल्वर्कमणिदोषप्रभेदयोः ॥ १६४ ॥

रोमाञ्चे हरिताले च रत्नभेदेऽप्यथोदितः ।
स्यात् **पुलाक**स्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥ १६५ ॥

पुद्गलस्तु शरीरे स्यात् परमाणौ तथात्मनि ।
पुन्नागवस्त्वृषभे पुंसां श्रेष्ठे **पुन्नाग**वाक् पुनः ॥ १६६ ॥

केसराख्यद्रुमे पुंसां श्रेष्ठे जातिफलेऽपि च ।
पुरन्ध्रि[5]ः पुनरिन्द्रे च वरुणे चाथ **बण्ठर**[6]ः ॥ १६७ ॥

करीरकोशे तालस्य पल्लवे रभसोदितः ।
बिन्दुलस्तु भवेदम्बुवेतसे वेतसेऽपि च ॥ १६८ ॥

---

१. 'रा' ख., 'ल' ग. पाठः. २. 'च' ग. पाठः. ३. 'ज्ञो' क. पाठः. ४. 'पालिके' क. ग. ङ. पाठः. ५. 'ह्रा' ग. पाठः. ६. 'न्ध्री' ग. पाठः.

† 'पार्परो भक्तसिक्थे स्यात् कीनाशे राजयक्ष्मणि । जराटेऽपि कदम्बस्य केसरे च गदान्तरे' इति तु मेदिनी । * 'तितउन्यपि' इति स्यात् । 'पाटीरो मूलके वज्रे तितऔ वार्तिकेऽम्बुदे' इति हेमचन्द्रः ।

भरतस्त्वृत्तिविजि नटे रामस्य च कनीयसि ।
आद्यक्षत्रियभेदे च वर्षेऽस्मिन् नृत्तशास्त्रके ॥ १६९ ॥

भास्करस्तु भवेद् वह्नावादित्ये रभसः पुनः ।
भाकूटः शैलभेदे स्यात् तथैवानिमिषान्तरे ॥ १७० ॥

भुवन्युर्भास्करे वह्नौ **भूतात्मा** तु विरिञ्चने ।
जीवात्मनि शरीरे च पवने चाथ **मन्दरः** ॥ १७१ ॥

अब्धिमन्थनशैले च हारभेदेऽष्टयष्टिके ।
महेन्द्रस्तु भवेच्छैलविशेषेऽपि पुरन्दरे ॥ १७२ ॥

मगधस्तु भवेद् राजभेदे तस्य तु नीवृति ।
मगधा भूम्नि च स्यात्तु वाद्यभेदे च मङ्गके ॥ १७३ ॥

मुष्टौ च फलकादीनां **मारिष**स्तु निरूपितः ।
जीवशाकाह्वये शाकस्तम्बे नाट्योक्तिगोचरे ॥ १७४ ॥

आर्ये स्यादथ **मारीचः** काकोले याजके द्विपे ।
रक्षोभेदे **मास**रस्तु भक्तमण्डे तथैव च ॥ १७५ ॥

मद्यस्य साधनद्रव्ये बल्कसाख्येऽथ **मारुतिः** ।
भीमसेने हनुमति **मुदिरो** मेघसूर्ययोः ॥ १७६ ॥

मुकुरस्तु कुलालस्य दण्डे चादर्शनेऽपि च ।
वकुले चाथ **मुरवः** खण्डिकाद्वितयात्मके ॥ १७७ ॥

मानभेदे वाद्यभेदे **मुर्मुर**स्तु तुषानले ।
ज्वलदङ्गारपूर्णाग्नौ त्वपरेऽथ **मुकुन्द**वाक् ॥ १७८ ॥

नवानां निधिभेदानामेकस्मिंश्च निधावपि ।
वासुदेवेऽथ **मुहरिः** सूर्ये चाप्यनडुह्यपि ॥ १७९ ॥

मोरटः कृष्णजीरे च रम्भास्थि मलयोद्भवे ।
यजतस्तु शशाङ्के स्याद् यज्ञद्रव्येऽथ मन्मथे ॥ १८० ॥

---

१. 'हु' क. ङ. पाठः.

रमतिः स्वर्गसभयोर्लुब्धकस्तु निगद्यते ।
आर्द्रायां मृगयौ चाथ **लोहित्यो** दक्षिणाम्बुधौ ॥ १८१ ॥

व्रीहौ च नदभेदे च **वञ्चुलस्तु** द्रुमान्तरे ।
तिमिशाख्येऽप्यशोके च वेतसेऽथ **वरूथवाक्** ॥ १८२ ॥

रथगुप्तौ मृगे चाथ **वण्डालः** स्यात् खनित्रके ।
नौकायां शूरयोर्युद्धे **वरण्ड**स्त्वपि संहतौ ॥ १८३ ॥

तृणकाष्ठादिभारे च मुखरोगान्तरे तथा ।
पुम्बलाख्ये†ऽन्तरावेदौ प्राकारेऽथ **वटम्बवाक्** ॥ १८४ ॥

शैले च तृणपुञ्जे च **वन्दी**[2]**कस्तु** पुरन्दरे ।
तथैव तोरणस्तम्भे **वराण**स्तु पुरन्दरे ॥ १८५ ॥

वात्स्यायनमुनौ चाथ **व्यवायो** मैथुनेऽपि च ।
व्यवधानेऽथ **वहतिः** कुटुम्बेऽमात्यपुत्रयोः ॥ १८६ ॥

वहतुस्तु बलीवर्दे कालेऽग्नौ **वमथुः** पुनः ।
वमने गजहस्तोत्थशीकरे चाथ वारिदे ॥ १८७ ॥

अमोघ उत्पत्तिक्षेत्रेऽप्युक्तो **वार्वी**[3]**र** इत्यथ ।
व्यायामः पौरुषे व्यामे स्पर्धायां दुर्गसञ्चरे ॥ १८८ ॥

आकर्षणे च वस्त्रादेः स्याद् दीर्घीकरणेऽपि च ।
आयासेऽप्यथ विज्ञेयो **व्याघातो** व्याहतावपि ॥ १८९ ॥

आरग्वधद्रुमे कालयोगभेदे च भाषितः ।
वाग्योनिर्वचने कल्पे **व्याघ्रपात्** तु विकङ्कते ॥ १९० ॥

ऋषिभेदेऽथ **विस्रम्भो** विश्वासस्नेहयोरपि ।
स्यात् केलिकलहाभिख्यविप्रलम्भे च संस्तवे ॥ १९१ ॥

---

१. 'चु' क. ख. ग. पाठः. २. 'न्दि' ख. ग. ङ. पाठः. ३. 'र्पा' क., 'र्वी' ङ. पाठः.

---

† 'मुखजः पुनः । पुंहलोऽपि वरण्डोऽपि' (पृ. १८३. श्लो. १२५) इति तु वैजयन्ती ।

विष्कम्भः प्रतिबन्धे च प्रतिबन्धस्य साधने ।
अर्गलादौ मूढगर्भभेदयोः शस्त्रदार्ययोः ॥ १९२ ॥

कूपकाङ्गप्रभेदे च कालयोगान्तरे तथा ।
विस्तारे चाथ **विष्टम्भः** प्रतिबन्धे प्रकीर्तितः ॥ १९३ ॥

महावैराजनाम्नश्च साम्नः प्रस्तावभक्तितः ।
परेषु दशसु स्तोभेष्वथ क्रान्तौ च **विक्रमः** ॥ १९४ ॥

तथैव शक्तिसम्पत्तौ क्षान्तौ च रभसोऽपठीत् ।
विष्टरस्त्वासने वृक्षे दर्भमुष्टौ च भाषितः ॥ १९५ ॥

रभसस्त्वाह **विस्तारं** विस्तृतिस्तम्बयोरथ ।
विपाकः पचने स्वेदे* विरुद्धे कर्मणः फले ॥ १९६ ॥

विस्मयस्त्वद्भुते दर्पे **विशयस्त्वपि** संशये ।
वे(श्या?श्रा)पि शयने ज्ञेयो **विषयस्त्वपि** गोचरे ॥ १९७ ॥
देशे रूपरसादौ च तथा स्यान्नित्यसेविते ।

पृथक् तु रभसः प्राह देशाज्जनपदेऽप्यमुम् ॥ १९८ ॥
विदुलस्तु भवेदम्बुवेतसे वेतसेऽप्यथ ।
विद्रुमः पादपे च स्याद् प्रवालेऽप्यजयः पुनः ॥ १९९ ॥

ब्रूते किसलये चापि तथैव मणिभूरुहे ।
विलम्बस्त्वपरैरुक्तो विषभेदे विलम्बके ॥ २०० ॥

विटङ्कः पादपाङ्गे च गृहस्यावयवेऽपि च ।
विसर्गस्तु परित्यागे पुरीषेऽथ **विवेकवाक्** ॥ २०१ ॥

पृथक्कारे पृथग्भावे जलद्रोण्यां विचारणे ।
विश्लेषस्तु पृथक्कारे विरहेऽथ **विलासवाक्** ॥ २०२ ॥

लीलायां भावभेदे च स च स्याच्छ्लिष्टविक्रिया ।
विकुक्षस्तु समुद्रे च चन्द्रे चाथ **विकारवाक्** ॥ २०३ ॥

---

* 'स्वेदे' इति तु मेदिनी ।

रोगे चाप्यन्यथाभावे **विवधस्तूदितः** पथि ।
पर्याहारे च भारे च **विश्वप्सा** त्वन्तरेऽनिले ॥ २०४ ॥

पुरन्दरेऽथ **विश्वात्मा** विरिञ्चेऽपि च भास्करे ।
वीवधस्तु भवेन्मार्गे स्यात् पर्याहारभारयोः ॥ २०५ ॥

वीकाशस्तु रहस्युक्तः प्रकाशे **वृषभः** पुनः ।
उक्षिण श्रेष्ठेऽथ **वृत्तान्तः** प्रकारे कार्त्स्न्यवार्तयोः ॥ २०६ ॥

भवेत् प्रकरणे चाथ भल्लाते स्याद् **वृषाङ्कवाक्** ।
महादेवेऽथ **वेशन्तः** पल्वलाकाशयोरथ ॥ २०७ ॥

वैकुण्ठः केशवे शक्रे **शपथस्तु** सुतादिभिः ।
शपने कार आक्रोशे **शमथः** पुनरप्सु च ॥ २०८ ॥

शान्तौ[1] चाप्याश्रमपदे **श्वयीचिं**[2]**स्तु** निशाकरे ।
श्वयथौ च **शिखण्डस्तु** चूडायां बर्हिबर्हके ॥ २०९ ॥

श्रीवत्सः श्रीपतौ तस्य लाञ्छनेऽप्यथ शार्ङ्गिणि ।
श्रीपिष्टाख्ये च निर्यासे **श्रीवासो** वसतौ श्रियः ॥ २१० ॥

श्रीगर्भस्तु श्रियो गर्भे **खड्गे श्रीहृदवाक्** पुनः ।
ह्रदे श्रियः प्रपायां च **श्रीकण्ठस्तु** महेश्वरे ॥ २११ ॥

द्वितीयमर्थमाचष्टे **रभसः** कुरुजाङ्गले ।
इत्येवमथ **शुद्धान्तो** गुह्ये कक्ष्यान्तरे तथा ॥ २१२ ॥

अन्तःपुरे च जानीयादथ विद्याद् विचक्षणः ।
सम्भवः कारणोत्पत्त्योः सङ्केते सङ्गमेऽपि च ॥ २१३ ॥

मात्यर्थे मापयत्यर्थे तौ चार्थौ सद्विरीरितौ ।
अकर्मको मातिधातुः प्रस्थादीनां घटादिषु ॥ २१४ ॥

प्रवर्ततेऽन्तर्भावेऽसौ सम्भूत इति सूत्रगः ।
सकर्मको मापयतिः स्थाल्याद्याधारवस्तुना ॥ २१५ ॥

---

१. 'क' ग. पाठः. २. 'न्ते' क. पाठः. ३. 'ची तु' ग. घ. ङ. पाठः.

ग्रहणेऽन्तर्भावनायामाढकादेः प्रवर्तते ।
स चायं ‡सम्भवत्यादिसूत्रे सूत्रकृतोदितः ॥ २१६ ॥

तत्र ह्याकृष्यते कर्म *तद्धरत्यादिसूत्रतः ।
'असम्भवो हेमम(यो ?य)जन्तो' 'रेषामसम्भवे' ॥ २१७ ॥

इत्यादिषु प्रयोगेषु भूयिष्ठेषु कृतात्मभिः ।
अर्थः सम्भवशब्दस्य चिन्तनीयो विचक्षणैः ॥ २१८ ॥

संरम्भः पुनराटोपे क्रोधे **सम्भेद**वाक् पुनः ।
भेदे च मिश्रणे चाथ **सम्भोगो** रतभोगयोः ॥ २१९ ॥

कश्चित् करिकरे ब्रूते वयं तु ब्रूमहे ध्रुवम् ।
गजस्य करमङ्गुल्या विभज्योर्ध्वं हि सप्तधा ॥ २२० ॥

अङ्गुल्याः परतो भागे तृतीये **सम्भ्रमः** पुनः ।
अत्यादरे च संवेगे व्यग्रतायां च साध्वसे ॥ २२१ ॥

सङ्ग्रहस्तु महोद्रङ्गे† स्वीकारे च समुच्छ्रये ।
स्त्रीसङ्ग्रहेऽपि संक्षेपे **सङ्ग्राह**स्तूदितः परैः ॥ २२२ ॥

प्रदेशे फलकादीनां ग्रहणार्थे परैः पुनः ।
मुष्टिमात्रेऽथ **सन्तानः** कल्पवृक्षान्तरे कुले ॥ २२३ ॥

परम्परायां चापत्ये **सञ्चार**स्त्वपि सङ्गतौ ।
अपि सङ्क्रमणे चारभेदे सोऽपीदृशः स्मृतः ॥ २२४ ॥

संस्थाचराख्यचाराणां गत्वा गत्वा परं प्रति ।
जिज्ञासते यः **संवालः** पुनश्चन्द्रस्य दीधितौ ॥ २२५ ॥

विभज्य गजलाङ्गूलं चतुर्धारभ्य मूलतः ।
द्वितीयभागे **संवासः** पुनः स्याद् वसने सह ॥ २२६ ॥

राजधान्यां च **संयावः** पुनः सम्मिश्रणे तथा ।
भक्ष्यभेदे च तस्यापि तज्ज्ञैर्लक्षणमीरितम् ॥ २२७ ॥

---

‡ 'सम्भवत्यवहरति पचति' (५. १. ५२) । * तद्धरति वहत्याहरति भारादंशादिभ्यः (५. १. ५०) । † 'सङ्ग्रहो बृहदुद्रङ्गे' इति मेदिनी । 'सङ्ग्रहो बृहदुद्धारे' इति तु हैमः ।

शमिता¶ त्वम्लदुग्धार्द्रा पक्का खण्डे घृतोत्तरे ।
संयावोऽयं युतश्चूर्णैः खण्डैलामरिचार्द्रकैः ॥ २२८ ॥

इत्येवमथ **सङ्घातः** समूहे हननेऽस्थनि ।
काव्यजातिविशेषे च तथैव नरकान्तरे ॥ २२९ ॥

संस्त्यायस्तु गृहे चैव सन्निवेशसमूहयोः ।
रभसो विस्तृतौ चाथ **सं(स्ता?स्त)रः** सुस्तरेऽध्वरे ॥ २३० ॥

स्वस्तरम्तु स्तृतौ स्वस्य विक्षिप्ततृणसञ्चये ।
संस्कार उत्कर्षाधाने सतः सङ्कल्प एव च ॥ २३१ ॥

स्यमीकस्त्वपि वल्मीके नृपगोत्रे च कुत्रचित् ।
वृक्षेऽप्यथ **समीकः** स्यादर्णवे मिथुनेऽपि च ॥ २३२ ॥

सम्मर्दो मर्दने युद्धेऽप्यथ **सन्दंश** इत्ययम् ।
लोहकारोपकरणभेदे सन्दंशनेऽपि च ॥ २३३ ॥

एकाहक्रतुभेदे चाप्यभिचारात्मके द्विषाम् ।
सन्नयः समवाये च पृष्ठस्थायिबलेऽपि च ॥ २३४ ॥

संवर्तस्त्वृषिभेदे स्याद् वत्सरे च जगत्क्षये ।
संवर्तनायां संवृत्तौ **सङ्घर्षः** स्पर्धने तथा ॥ २३५ ॥

सङ्घर्षणे **संपुट**स्तु समुद्रे मन्त्रवादिनाम् ।
मन्त्राक्षरप्रग्रथनप्रभेदे चाजयः पुनः ॥ २३६ ॥

कैलिकायां ‡शवरुकेऽप्यथ **संमर्श** इत्ययम् ।
तर्के संमर्शने चाथ **सन्देहः** संशये तथा ॥ २३७ ॥

आत्मसंज्ञे मध्यकाये **सहोर**स्तु महीधरे ।
विष्णौ चाप्यथ **संरोधः** क्षये संरोधनेऽपि च ॥ २३८ ॥

---

१. 'श्रु' ख. पाठः. २. 'त' ख. ग. पाठः.

¶ शमिता गोधूमचूर्णम् । ‡ 'कुरवके' इति स्यात् ।

समिधस्तु समूहेऽग्नौ युद्धगोधूमपिष्टयोः ।
स्वापे तु **संलयश्चैकीभावे** च **स्वधितिः** पुनः ॥ २३९ ॥

वज्रे कुठारे **स्थपतिः** पुनः स्यात् सौविदल्लके ।
तक्षण्यधिपतौ चापि बृहस्पतिसवेष्टिनि ॥ २४० ॥

धनपे शिल्पिभेदे चेत्यजयः **सन्निधिः** पुनः ।
सन्निधाने चेन्द्रियाणां गोचरे **सहुरिः** पुनः ॥ २४१ ॥

अन्धकारे च युद्धे च **सप्तर्षि**स्त्वपि दीधितौ ।
सप्तर्षयस्तु स्याच्चित्रशिखण्डिष्वथ कीर्त्यते ॥ २४२ ॥

स्वाध्यायस्तु भवेद् वेदे वेदस्य च जपे तथा ।
स्थासकस्त्वपि चर्चिक्ये बुद्बुदे हस्तिनामपि ॥ २४३ ॥

ज्ञेयो नक्षत्रमालाख्यभूषणे **स्नातकः** पुनः ।
गृहस्थे स्यात् कृतसमावर्तनेऽप्यथ **सानसिः** ॥ २४४ ॥

ऋणे नखे हिरण्येऽथ **स्त्रीवासो** वामलूरके ।
स्त्रीणां वासे **सुस्तर**स्तु भवेच्छयनमानयोः ॥ २४५ ॥

सौप्तिकस्तु प्रपाताख्यशत्रुनिग्रहकर्मणि ।
तद्वर्णनपरे चापि भवेद् भारतपर्वणि ॥ २४६ ॥

हर्यश्वस्तु भवेत् पूर्वराजभेदे पुरन्दरे ।
हरिद्रुस्तु कलाप्यन्तेवासिनि प्रथमे स्मृतः ॥ २४७ ॥

तथा दारुहरिद्रायां वृक्षमात्रे तु कश्चन ।
हिमारिस्तु रवौ वह्नौ हृच्छ्रयस्त्वपि मन्मथे ॥ २४८ ॥

कुक्ष्यग्नौ **हेरुक**स्तु स्यान्महाकालाह्वये गणे ।
बुद्धभेदे च रभस इत्यध्यायः समाप्तवान् ॥ २४९ ॥

इति त्र्यक्षरकाण्डे पुल्लिङ्गाध्यायः ।

अथ त्र्यक्षरकाण्डे नपुंसकलिङ्गाध्यायः ।

अयनं निलये मार्गे सूर्योदग्दक्षिणागतौ ।
स्यात् सांवत्सरिकाद्येषु सत्राख्यक्रतुकर्मसु ॥ १ ॥

एषां प्रयोगभेदे च गतिमात्रे च दृश्यते ।
अम्बरं वाससि व्योम्नि सुगन्धिद्रव्यकान्तरे ॥ २ ॥

अंशुकं वस्त्रमात्रे च सूक्ष्मवस्त्रोत्तरीययोः ।
अलीकं त्वनृते च स्यादप्रियेऽथो **अनूक**वाक् ॥ ३ ॥

शीलिऽन्वये च प्राण्यङ्गभेदे कण्ठसमीपगे ।
अवनं रक्षणे तृप्तौ याचनादिष्वपि स्मरेत् ॥ ४ ॥

अञ्चनं त्वर्चने गत्या**मङ्ग**नं त्वङ्गने भवेत् ।
अर्थे सोऽप्यतियोगः स्याच्छस्त्राणां च निवारणे ॥ ५ ॥

वेत्रादिरचिते खेटभेदेऽ**थाशन**मोदने ।
भुक्तौ च व्यापने चाथो **अकुलं** जलपोतयोः ॥ ६ ॥

अपत्यं तु भवेत् तोके सामगानां च विश्रुते ।
आरण्यके सामभेदे 'उ**च्च**तेजे'त्यृचि स्थिते ॥ ७ ॥

आस्पदं तु भवेत् कृत्ये स्थाने **चालान**वाक् पुनः ।
आदाने स्तम्भमात्रे च बन्धनार्थे च हस्तिनाम् ॥ ८ ॥

स्तम्भ **आदान**वाक् तु स्याद् ग्रहणे चोत्तरायणे ।
आधानं तु निधाने स्यात् त्रेताग्न्याधान एव च ॥ ९ ॥

आपानं तु सुरापानगोष्ठ्यामाकृष्य पानके ।
आयानं स्वश्वभूषायामागतौ वचने पुनः ॥ १० ॥

आख्यानं स्यात् कथायां च स्या**दाग्रं** त्विषोर्भवेत् ।
अग्रे तथाग्र आराया इन्द्रियं धनरेतसोः ॥ ११ ॥

'वि' क. पाठः.

हृषीक इन्धनं तु स्याद् दीपनाग्न्यर्थकाष्ठयोः ।
ईक्षणं तु क्रियायां स्यात् पश्यतेर्नयनेऽपि च ॥ १२ ॥

उदकं तु भवेत् तोये हीबेरे द्विशतस्वरे ।
छन्दोभेदे भगवता निदानोक्तं प्रतीयताम् ॥ १३ ॥

उत्थानमुद्गमे वास्तौ तन्त्रेहापौरुषेषु च ।
औदरस्य मलस्यापि स्रुतौ स्याद् रभसः पुनः ॥ १४ ॥

हर्षमुस्तकयोराजावङ्गणे चोद्यमेऽपि च ।
उद्यानं सङ्ग्रहोद्वत्योर्वनभेदे प्रयोजने ॥ १५ ॥

तथा निःसरणेऽथ स्यादूवध्यं हि गुदानिले ।
वृक्षायुर्वेदसिद्धे च भूरुहादेर्गदान्तरे ॥ १६ ॥

ऋजीषं[1] पिष्टपचनसाधनान्तर एव च ।
वैद्युताग्नौ च नैरुक्ता **औशीरं** पुनरासने ॥ १७ ॥

चामरे शयने दण्डे **कटीरं** त्वपि कन्दरे ।
जघने च जले चाथ **कटित्रं** यत्र तद्विदः ॥ १८ ॥

द्यूते रमन्ते सुस्यूते तस्मिंश्चर्मणि किञ्च तत् ।
रशनायां च रभसः कटिवेष्टनचर्मणि ॥ १९ ॥

अथ श्रोण्यां च भार्यायां **कडत्रं** स्यात् कलत्रवत् ।
कलत्रं तु नृपादीनां दुर्गस्थाने च कीर्तितम् ॥ २० ॥

क्रन्दनं पुनराह्वाने रोदनेऽप्यथ **कज्जलम्** ।
कंसोत्पलाख्ये[2] वनज उत्पलेऽप्यञ्जनान्तरे ॥ २१ ॥

धूमयोनिन्यथ ज्ञेयं **कश्मलं** मोहविष्ठयोः ।
अथ स्यात् **कत्तृणं** कुट्यां तृणभेदेऽथ **काननम्** ॥ २२ ॥

ब्रह्मास्ये च वने चाथ **कीलालं** रुधिरे जले ।
अन्ने पक्वान्ननिःष्यन्देऽप्यमृते रभसोऽपठीत् ॥ २३ ॥

---

१. 'बीसं' क. ख. ङ. पाठः. २. 'ख्य' ग. पाठः.

स्यात् **कुत्राणं** तु कुण्डे च शिक्ये चाथ **कुपीटवाक्** ।
उदरे सलिले चाथ ध्वजे चोपनिमन्त्रणे ॥ २४ ॥

केतनं स्यादकार्ये च चापे कृत्येऽथ **कैतवम्** ।
द्यूते च कपटे चाथ **कैवल्यं** मोक्ष एव च ॥ २५ ॥

केवलत्वेऽथ **कोदण्डं** वेणुचापे धनुष्यपि ।
चापे चतुररत्नौ च **कौतुकं** तु कुतूहले ॥ २६ ॥

मङ्गले विषयाभोगे कामे ख्याते तथैव च ।
हस्तसूत्रेऽथ **कौपीनं** गुह्ये चाकार्य एव च ॥ २७ ॥

केचित् कक्षापुटेऽप्याहुश्चीरे त्वन्येऽध्यगीषत ।
स्यात् **कौलीनं** लोकवादे युद्धे पश्वहिपक्षिणाम् ॥ २८ ॥

अपवादे कुलीनत्वे **ग्रहणं** त्विन्दुसूर्ययोः ।
उपरागे चोपलब्धौ वन्द्यादानादरेषु च ॥ २९ ॥

प्रत्यये **गैरिकं** तु स्यात् पीतधातौ च हेम्नि च ।
गोपुरं तु पुरद्वारे द्वारमात्रे तथैव च ॥ ३० ॥

मुस्ताभेदे च कैवर्तिमुस्तकाख्येऽथ **गोरुतम्** ।
गवां रुते च गव्यूतौ **गोशीर्षं** त्वपि चन्दने ॥ ३१ ॥

ताम्रसारे गवां मूर्ध्नि **चमकं** तु प्रकीर्तितम् ।
ह्रीबेरेऽपि यजुर्मन्त्राध्यायभेदेऽथ **चामरम्** ॥ ३२ ॥

प्रकीर्णके च ह्रीबेरे **छदनं** तु तरुच्छदे ।
पक्षिपक्षेऽथ **जघनं** स्त्रीकट्याः पूर्वभागके ॥ ३३ ॥

कटिमात्रे परे पश्चाद्भागे कस्यापि वस्तुनः ।
जयनं तु रथादीनां सन्नाहे विजयेऽपि च ॥ ३४ ॥

अश्वचर्मणि तु प्राह रभसोऽथ **जनित्ववाक्** ।
कुले द्यावापृथिव्योश्च मातापित्रोश्च कीर्तिता ॥ ३५ ॥

---

१. 'कू' ख. ग. ङ. पाठः.

तालिमं कुट्टिमे तल्पे द्वारयन्त्रे तु **तालकम्** ।
कर्णभूषणभेदे च तालपत्राह्वयेऽप्यथ ॥ ३६ ॥

तालितं *तूलितपटे गुणवादित्रभाण्डयोः ।
वाद्यभेदेऽजयः प्राह व्यञ्जने त्वपि **तेमनम्** ॥ ३७ ॥

क्लेदेऽथ **तोदनं** तोत्रे व्यथने **द्रविणं** पुनः ।
धने बले **दुकूलं** तु क्षौमेऽन्ये सूक्ष्मवाससि ॥ ३८ ॥

शुक्लवस्त्रे परेऽथ स्याद् **दौहृदं** दोहलाह्वये ।
इच्छाविशेषे गर्भिण्या द्विहृत्त्वे रभसः पुनः ॥ ३९ ॥

दौर्वीणं †म्लिष्टपर्णे च दूर्वायाश्च रसेऽभ्यधात् ।
नाभीलं नाभिगन्धे स्याद् वङ्क्षणे च वरस्त्रियाः ॥ ४० ॥

अजयो नाभिगर्ताण्डे रभसस्त्वाह शब्दवित् ।
गन्धर्वकृच्छ्लूयोः स्यात्तु **निमित्तं** हेतुलक्षयोः ॥ ४१ ॥

शुभादेः सूचके चाथ **नियुतं** लक्षसंज्ञके ।
सङ्ख्याभेदे परे त्वाहुर्लक्षाणां दशके तथा ॥ ४२ ॥

उशीरेऽथ **निदानं** स्यात् कारणेऽप्यादिकारणे ।
सूत्रभेदे च भगवत्पतञ्जलिमुनीरिते ॥ ४३ ॥

खण्डनेऽप्यवदाने च **निर्याणं** त्वपि हस्तिनः ।
नेत्रान्ते निर्गमे मोक्षे मरणे च प्रकीर्तितम् ॥ ४४ ॥

प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ।
सम्यग्वक्तरि नित्ये स्यादेकताबोधयोरपि ॥ ४५ ॥

छन्दोवृत्तविशेषेऽथ **प्रयाणं** मरणे गतौ ।
नेत्रपूर्वप्रदेशे च हस्तिनामिति यादवः ॥ ४६ ॥

---

१. 'क' क. पाठः.

---

* रञ्जितपटे । † 'दौर्वीणं मृष्टपर्णे स्याद्' इति तु मेदिनी ।

आदौ प्रधाने **प्रमुखं प्रज्ञानं** बुद्धिचिह्नयोः ।
प्रसूनं पुष्पफलयोः **प्रपदं** तु पदाग्रके ॥ ४७ ॥

निगदाख्ययजुर्वेदविशेषे **प्लवनं** पुनः ।
उन्मज्जने प्लुतीभावे क्रमणे च प्रकीर्तितम् ॥ ४८ ॥

पञ्चत्वं पञ्चतायां च मरणेऽथ **पचत्रवाक्** ।
स्थाल्यां स्याद् रन्धनार्थायां तथैवापूपकारके ॥ ४९ ॥

पतत्रं गरुति व्योम्नि **पत्राङ्गं** रक्तचन्दने ।
भूर्जे च **पतनं** तु स्यात् पा(त्रे?ते) तरुपलाशके ॥ ५० ॥

द्विजातिकर्मभ्यो हानौ **पत्तनं** तु पुरे विदुः ।
पुटभेदनसंज्ञे तु क्षुद्रग्रामे परे विदुः ॥ ५१ ॥

क्रयविक्रयंभूमौ तु केचिदन्ये तु सूरयः ।
नौभिरेव तु यद् गम्यं पत्तनं तत् प्रचक्षते ॥ ५२ ॥

पट्टनं तु पुरेऽन्ये तु पुटभेदनसंज्ञके ।
क्षुद्रग्रामे परे त्वाहुः सर्वशब्दार्थकोविदाः ॥ ५३ ॥

पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च ।
पद्मकं पद्मकाष्ठे स्याद्धस्तिनां बिन्दुजालके ॥ ५४ ॥

परीरं तु हले ज्ञेयं तथा हलमुखेऽपि च ।
पवीरं तु हले केचिद् रङ्गस्थाने परे विदुः ॥ ५५ ॥

प्रान्तरं तु वने ज्ञेयं दूरशून्ये च वर्त्मनि ।
रसातले तु **पातालं** बडवानल एव च ॥ ५६ ॥

पीयूषं त्वमृते दुग्धे नवसूतगवीभवे ।
पुरीषं मृत्तिकाचूर्णे विष्ठायां सलिलेऽपि च ॥ ५७ ॥

मालाबन्धविशेषे तु भक्षभेदे च **पूरिमम्** ।
बडिशं त्वध्यमानस्य विशेषे स्याद् विरज्जुके ॥ ५८ ॥

---

१. 'प' ख. ङ., 'परे के' ग. पाठः. २. 'त' ग. पाठः.

मत्स्यवेधनयन्त्रे च **ब्राह्मण्यं** तु द्विजन्मनाम् ।
समूहे ब्राह्मणानां च जानीयाद् भावकर्मणोः ॥ ५९ ॥

अथ **बाह्लव**[1]*मित्येतद्विङ्गुकुङ्कुमयोः स्मृतम् ।
भस्मकं तु विडङ्गे स्याद् व्याधिभेदेऽथ **भण्डनम्** ॥ ६० ॥

परिहासे च दुग्धे च कवचे च प्रकीर्तितम् ।
भावित्रं तु भवेद् भद्रे त्रैलोक्ये चाथ **भूतिकम्** ॥ ६१ ॥

भूनिम्बे भूस्तृणे चैव यवान्यामपि कत्तृणे ।
भोजनं तु भवेद् भुक्तौ **मन्दनं** स्तुतिमोदयोः ॥ ६२ ॥

गतौ मदे च स्वप्ने च **मणीचं** त्वपि मौक्तिके ।
अग्रहस्ते च पुष्पेऽथ **महिनं**[2] राज्यशय्ययोः ॥ ६३ ॥

मैथुनं रतिसङ्गत्योर्यागोपकरणे पुनः ।
यजत्रसंज्ञे **यजनं** यागे चाप्यथ **यावसम्** ॥ ६४ ॥

मित्रे भक्ततृणे चाथ तारुण्ये **यौवनं** तथा ।
युवतीनां समूहे च **वचनं** तूक्तिवाक्ययोः ॥ ६५ ॥

आच्छादनक्रियायां तु **वसनं** वस्त्र एव च ।
स्यान्निवासक्रियायां च **वहनं** त्वपि धारणे ॥ ६६ ॥

भारस्य स्यन्दतेश्चार्थे रथादीनां च यापने ।
रथभेदे च विज्ञेयं चतुरश्रे सकूबरे ॥ ६७ ॥

वाहित्रं तु विजानीयाद् वहनाख्यरथान्तरे ।
यानपात्रे च पोताख्ये **वधत्रं** त्वायुधे स्मृतम् ॥ ६८ ॥

शूरे धवयिमर्माख्ये(?) कन्दुके च प्रकीर्तितम् ।
तन्तुवायस्य दण्डे च शाकटायन उक्तवान् ॥ ६९ ॥

---

१. 'ल्ह' ग. पाठः. २. 'ह्री' ङ. पाठः.

---

* 'बाह्लीकं रामठेऽपि च' इत्यमरः । कोशान्तरे तु कुङ्कुमार्थको बाल्हकशब्दो दृश्यते ।

व्यसनं सक्तिविपदोर्दैवानिष्टफलेंऽहसि ।
पैशुन्यादौ च कोपार्थे मृगयादौ च कामजे ॥ ७० ॥

निक्षेपे निष्फलोद्योगेऽप्यशुभे च प्रकीर्तितम् ।
वार्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्मणि ॥ ७१ ॥

उत्तरस्त्वद्भुतश्लोको रभसेन समीरितः ।
*काकचिण्डीभवे बीजे वारिक्रिमिजनीरयोः ॥ ७२ ॥

दक्षिणावर्तशङ्खे च †**वार्दूरं** स्यादितीदृशम् ।
विधानं हस्तिकबले प्रेरणेऽभ्यर्चने धने ॥ ७३ ॥

वेदनायामुपाये च प्रकारे वैरकर्मणि ।
विष्टपं त्वपि देवानां विमाने भुवने तथा ॥ ७४ ॥

व्युत्थानं प्रतिकूलत्वे स्वातन्त्र्यकरणेऽपि च ।
सिंहस्तु प्रतिरोधे च विरोधाचरणेऽपि च ॥ ७५ ॥

वेष्टनं मुकुटोष्णीषवाटेषु श्रोत्रशष्कुलौ ।
तथा परिवृतौ चाथ **वैकक्ष्यमु**रसि स्थिते ॥ ७६ ॥

तिर्यक्क्षिप्ते पुष्पमाल्ये तथा प्रावरणेऽपि च ।
शमलं तु भवेत् पापे विष्ठायां च प्रकीर्तितम् ॥ ७७ ॥

शासनं निग्रहे लेख्ये वेदवाक्येषु कर्मणि ।
वाङ्नियोगे प्रहरणे शास्त्रे ग्रामे च निष्करे ॥ ७८ ॥

आज्ञायामुपदेशे च **शालूकं** तूत्पलादिनः ।
कन्दे स्यात् पङ्कगन्धे च जले **शालार**वाक् पुनः ॥ ७९ ॥

सोपाने स्याद्धस्तिनखे पक्षिणामपि पञ्जरे ।
अथो **शिताम**(?) दोष्णि स्याद् योनौ यकृति मेदसि ॥ ८० ॥

---

* गुञ्जापर्यायोऽयं 'काकचिञ्ची' इति पठ्यते कोशान्तरे । † 'वार्दूरं कृष्णलाबीजदक्षिणावर्तशङ्खयोः' इति तु मेदिनी ।

श्रीपुष्पं तु श्रियः पुष्पे सितपद्मेऽथ भोजने ।
आस्वादने च **स्वदनं** शोभनेऽप्यदने विदुः ॥ ८१ ॥

सदनं तु गृहे तोये सीदत्यर्थे च कीर्तितम् ।
स्तननं स्तनिते ध्वाने **स्तरणं** छादने वधे ॥ ८२ ॥

संस्थानं तु समाप्तौ[1] च सन्निवेशे चतुष्पथे ।
सम्यक्स्थितौ च मरणे **संव्यानं** तूत्तरीयके ॥ ८३ ॥

तथा संवरणे चापि **सन्दानं** त्वपि बन्धने ।
पशुबन्धनरज्जोश्च विशेषे **सलिलं** पुनः ॥ ८४ ॥

जले छन्दोविशेषे च प्रकृत्याख्येऽक्षराणि वै ।
यस्य चत्वार्यशीतिश्च तत्र स्याच्च **बहून्यपि** ॥ ८५ ॥

स्वरसं तु दिने गेहे **स्थानकं** त्वालवालके ।
लङ्घनं कर्तुकामानां सिंहादीनां क्रमाह्वये ॥ ८६ ॥

अवस्थानविशेषे च **स्थानीयं** तु पुरे तथा ।
स्थातव्येऽपि महाग्रामे **सामर्थ्यं** तु बले भवेत् ॥ ८७ ॥

शक्तिसंज्ञे तथैकार्थ्ये सम्बन्धार्थत्व एव च ।
कश्चित्तु योग्यतायां च कथयामास नामवित् ॥ ८८ ॥

साधूतं *बर्हिसङ्घाते पण्यवीथ्यातपत्रके ।
सुलोहं त्वारकूटे स्याच्छस्तलोहेऽथ **सेचनम्** ॥ ८९ ॥

नावः स्यात् सेकपात्रे च सिक्तौ चाप्यथ **सौष्ठवम्** ।
अवष्टम्भे प्रशस्तत्वे **हयनं** तु गतावपि ॥ ९० ॥

कर्णीरथाख्ये च तथा रथभेदेऽथ काञ्चने ।
हिरण्यं मानभेदे च धने चापि कपर्दके ॥ ९१ ॥

---

१. 'धौ' ग. पाठः.

---

* कोशान्तरे 'साधृतम्' इति पदमुक्तार्थकं दृश्यते ।

अक्षये चाप्यकुप्ये च रेतस्यप्यथ बोधत ।
वराटहेमरेतस्सु हिरण्यं रभसोऽपठीत् ॥ ९२ ॥

हृदयं तूरसि स्वान्ते वृके च रभसोऽपठीत् ॥ ९२½ ॥

इति त्र्यक्षरकाण्डे नपुंसकलिङ्गाध्यायः ।

अथ त्र्यक्षरकाण्डे वाच्यलिङ्गाध्यायः ।

अथाभिधेयलिङ्गानां त्र्यक्षराणां प्रणीयते ।
अध्यायोऽध्यक्षशब्दोऽयं प्रत्यक्षेऽधिकृतेऽप्यथ ॥ १ ॥

अभ्यग्रोऽभिमुखे नव्ये समीपेऽप्यधमः पुनः ।
न्यूनेऽपि गर्हितेऽधीरः पुनर्भीरौ च चञ्चले ॥ २ ॥

अवरस्त्वप्रशस्ते स्यादर्वाच्यप्यखिलं पुनः ।
कृत्स्ने गर्ह्येऽनुगस्तु स्यादनुगामिनि सेवके ॥ ३ ॥

अगाढोऽनवगाढे चाप्यभृशे च प्रकीर्तितः ।
अथानक्षरवाक्ये चाप्यवक्तव्येऽप्यवाच्यवाक् ॥ ४ ॥

अगर्ह्ये चाथ रभसः प्रमादीदमवोचत ।
अवद्यमपशब्दे च गर्ह्ये चेत्याप्तुतः पुनः ॥ ५ ॥

स्नाते चापि समावृत्तेऽथात्मीयो निजमित्रयोः ।
आविद्धं कुटिले क्षिप्ते रभसस्तु पराहते ॥ ६ ॥

आहार्यमाहर्तव्ये चाभिनये भूषणादिभिः ।
कृते स्यादाहतं तु स्यात् ताडिते गुणिते हते ॥ ७ ॥

मृषार्थवाक्येऽप्याहाथो **आहतः** सादरेऽर्चिते ।
आपन्नस्तु विपन्ने च प्राप्ते च कथितो बुधैः ॥ ८ ॥

आयस्तः कुपिते क्षिप्ते क्लेशिते तेजितेऽपि च ।
अनुज्ज्वले त्वाविलं[1] स्यात् कलुषे चेतरः पुनः ॥ ९ ॥
अन्यस्मिन् पामरे चाथ स्यादुत्कृष्टः प्रकृष्टके ।
ऊर्ध्वस्थानं प्रापिते चाप्युत्क्षिप्ते **तूद्धृतं** विदुः ॥ १० ॥
भुक्तोज्झितेऽप्यथोत्तानं निम्नस्य प्रतियोगिनि ।
ऊर्ध्वीकृतपुरोभागेऽप्युच्छ्रितं तून्नतेऽपि च ॥ ११ ॥
प्रवृद्धोत्पन्नयोरूर्ध्वस्थापितेऽप्युदितं पुनः ।
उद्गते कथितेऽथ स्यादुद्दूढं विपुलेऽपि च ॥ १२ ॥
ऊढे च पीवरे चाथो **उपोढो** निकटोढयोः ।
उषितं न्युषिते दग्ध इति सर्वे निघण्टवः ॥ १३ ॥
उषितं न्युषिते युक्तं दग्धे त्वेतदसाम्प्रतम् ।
*उषित्वा(?)दोषतेरेतच्छाकटायन उक्तवान् ॥ १४ ॥
प्रत्युष्टं‡ रक्ष इति च प्रयोगः शाश्वतस्तथा ।
उत्थितं प्रोद्यते जाते वृद्धिमत्यपि दृश्यते ॥ १५ ॥
उदारो महति ख्याते दानशौण्डविदग्धयोः ।
उत्तालं पुनरुत्तान उन्नतोच्चण्डयोरपि ॥ १६ ॥
उत्कटस्तूद्भटे मत्ते तीव्रेऽपि रभसोऽपठीत् ।
उज्जटः शून्यदेशे स्यादूर्ध्वीभूतजटादिषु ॥ १७ ॥
उज्झकस्त्वपि निःस्नेहे स्यादुज्झितरि च स्मृतः ।
उन्निद्रस्तु भवेत् फुल्ले निद्रया हीन एव च ॥ १८ ॥
उद्बुद्धस्तु भवेत् फुल्ले प्रवृद्धे च प्रकीर्तितः ।
एकाग्रमग्रं यस्यैकं तत्र तत्पर एव च ॥ १९ ॥

---

१. 'लः' ङ. पाठः.

---

* 'उष्टमित्योषतेरेतद्' इति पाठः स्यात् । ‡ 'आदितश्च (७. २. १६) इति चकारस्यानुक्तसमुच्चयार्थत्वादिट्प्रतिषेध' इति भट्टभास्करः । आगमशासनानित्यत्वाद्वेडभावः ।

अनाकुलेऽथ **कलितं** सङ्ख्याते ज्ञातबद्धयोः[1]।
आप्ते च विहिते चाह रभसः **कमरः** पुनः ॥ २० ॥

मूर्खे च कामुके चाथ **कनीयांस्तु** जघन्यजे।
युवतरे चाल्पतरे **क्षुल्लक**स्त्वल्पनीचयोः ॥ २१ ॥

दरिद्रे चाथ **कुचरः** कुवादे भूचरेऽपि च।
गान्धिको लेखके चापि सुगन्धव्यवहारिणि ॥ २२ ॥

जठरः कठिने जीर्णे कुक्षौ च **ज्वलितं** पुनः।
दीप्ते च ज्वलिते चाथ **डिङ्गरौ** क्षेप्यगङ्गरौ ॥ २३ ॥

तलिनं विरलेऽल्पेऽथ **तीरितं** पारिते तथा।
तीरं च प्रापिते तीरीकृते च व्यवहारगैः ॥ २४ ॥

सदेवासत्कृतं सभ्यैर्यत् तत्राप्यथ **दुर्विधः**।
नीचे दरिद्रे **दोषज्ञः** पुनर्भिषजि पण्डिते ॥ २५ ॥

दोषस्य बोधके चाथ **नदीष्णः** कुशले मतः।
तरणे यः पटुस्तस्मिन् **नदीष्ण** इति सज्जनः ॥ २६ ॥

नश्वरं नाशशीलादौ दैन्यगर्भवचस्यपि।
निवातस्त्वाश्रये शस्त्राभेद्यवर्मण्यमारुते ॥ २७ ॥

निकृतो विप्रलब्धेऽपि हते विप्रकृतेऽपि च।
निसृष्टं जनिते न्यस्ते **निरस्त**स्तु निराकृते ॥ २८ ॥

निष्ठ्यूते प्रास्तबाणे च वचने च द्रुतोदिते।
निहतस्तु हते नीचस्वरयुक्तेऽक्षरेऽपि च ॥ २९ ॥

निर्ग्रन्थः स्यात् क्षपणके दरिद्रे ग्रन्थवर्जिते।
निर्दयः परदोषोक्तिपरे निष्ठुरभाषिणि ॥ ३० ॥

प्रहृष्टस्तु सरोमाञ्चे प्र(क?ह)र्षवति विस्मिते।
तथा प्रतिहते चाथ **प्रमीतः** प्रोक्षिते मृते ॥ ३१ ॥

---

१. 'नबन्धयोः' क. ख. ङ. पाठः.

प्रतीतो हर्षिते ख्याते ज्ञाते प्रत्ययिते बुधे ।
सादरे प्रतियातेऽथ **प्रणीतः** स्यात् प्रवेशिते ॥ ३२ ॥

उपसम्पन्नौदनादौ निर्मितक्षिप्तयोरपि ।
स्थानात् स्थानान्तरं नीते वह्नौ च विधिना स्मृतः ॥ ३३ ॥

प्रबुद्धो विरतस्वापे सावधानेऽपि पण्डिते ।
प्रवृद्धस्त्वेधिते चापि प्रसृतेऽथ **प्रसिद्धवाक्** ॥ ३४ ॥

ख्यातभूषितयोः सिद्धे **प्रभिन्नस्तु** विदारिते ।
मत्तहस्तिनि चाथ स्याद् व्युत्पन्नक्षुण्णयोरयम् ॥ ३५ ॥

प्रहतः प्रयतस्तु स्यात् संस्कृते पूत एव च ।
प्रततं विततेक्षुण्णे **प्रदीप्तं** त्वपि भासिते ॥ ३६ ॥

दग्धेऽप्यथ **प्रगाढः** स्याद् भृशे कृच्छ्रेऽप्यथ स्मृतः ।
प्रतीक्ष्यः प्रतिपाल्ये च पूज्ये चाथ **प्रणाय्यवाक्** ॥ ३७ ।

असम्मते च निष्कामे **प्रसव्यं** पुनरुच्यते ।
प्रतिकूलेऽनुकूले च सव्यदक्षिणयोरपि ॥ ३८ ॥

आयत्ते **पतितस्त्वेष** धर्मशास्त्रैनिरूपितः ।
द्विजातिकर्मभ्यो हीने प्रस्कन्ने **परुषः** पुनः ॥ ३९ ॥

अस्निग्धे कर्बुरे मिश्रे तथा निष्ठुरभाषिते ।
प्रयोक्ता तूत्तमर्णे स्यात् तथैव स्यात् प्रयोजके ॥ ४० ॥
प्रत्यर्थी त्ववगन्तव्यः शात्रवप्रतिवादिनोः ।
पामरस्तु भवेदज्ञे नीचे च रभसः पुनः ॥ ४१ ॥

खण्डेऽप्याह **प्रार्दितं** तु हतयाचितयोरपि ।
अभियुक्ते **पेशलस्तु** चारौ दक्षे च कीर्तितः ॥ ४२ ॥

प्रोक्षितं निहते सिक्ते **बहुलं**[2] त्वपि पुष्कले ।
सान्द्रे च **बालिशस्तु** स्याद् बाले मूर्खेऽथ **बेटकः** ॥ ४३ ॥

सञ्जातयौवने चापि तथा वैकटिकेऽपि च ।
भङ्गुरो नश्वरे नम्रे **भावितं** त्वपि वासिते ॥ ४४ ॥

---

१. 'स्त्रै' ङ. पाठः. २. 'ह' क. ङ. पाठः.

तथैवोत्पादिते लब्धे **मलिनं** तु मलीमसे ।
कृष्णे च **मत्सरी** तु स्यात् परसम्पदसोढरि ॥ ४५ ॥
कदर्याढ्ये **मूर्छितस्तु** मूढसोच्छ्राययोरपि ।
अजयस्तु प्रवृद्धेऽपि **वदान्य**स्त्वपि दातरि ॥ ४६ ॥
वल्गुवाग्वाग्मिनोश्चापि **वरद**स्तु समर्धके ।
प्रसन्ने **वल्लभ**स्तु स्यादध्यक्षे दयितेऽपि च ॥ ४७ ॥
वर्णाटो गायने चित्रकरे स्त्रीकृतजीवने ।
वक्तव्यः कुत्सिते नीचेऽप्यधीनकथनीययोः ॥ ४८ ॥
वठरस्तु भवेत् स्थूले रभसस्तु शठेऽपि च ।
वरीयान् स्यादुरुतरे प्रशस्ततर एव च ॥ ४९ ॥
व्यायतं व्याप्ते दीर्घे दृढे **विगत**वाक् पुनः ।
वीते च निष्प्रभे चाथ **विस्मृतं** विगते तते ॥ ५० ॥
विदितं संश्रुते ज्ञाते **विधुतं** त्वपि कम्पिते ।
त्यक्ते च **विकृतं** तु स्याद् दूरूपे व्याधितेऽपि च ॥ ५१ ॥
तथा विकारापन्ने च बीभत्सेऽथ **विविक्त**वाक् ।
निर्जने च पृथग्भूते शुद्धे चापि विचारिते ॥ ५२ ॥
असम्बाधेऽथ **विच्छिन्नं** समालब्धे द्विधाकृते ।
विस्रब्धं निभृते शस्ये तथा विश्वसितेऽपि च ॥ ५३ ॥
विवशस्त्वस्वतन्त्रात्मन्यवश्ये रभसोऽपठीत् ।
अरिष्टदुष्टबुद्धौ च कथयन्ति मनीषिणः ॥ ५४ ॥
विज्ञेयं **विधुरं** सद्भिः कष्टविश्लिष्टयोरपि ।
विकले §प्रत्यवेते च **विलीनं** त्वपि विद्रुते ॥ ५५ ॥
लीनेऽथ **वेल्लितं** वक्रे कम्पिते स्याद् रथे पुनः ।
व्याघ्रचर्मावृते ज्ञेयो **वैयाघ्रो** व्याघ्रयोगिनि ॥ ५६ ॥

---

§ 'पत्न्यपेते' इति स्यात् । 'विधुरः पत्न्यपेते स्यात् क्लिष्टविश्लिष्टयोरपि' (पृ. २५६. श्लो. १७) इति वैजयन्ती ।

शिरःस्थो व्यवहारस्थेऽभियोक्तरि शिरःस्थिते ।
समर्थस्तु समानार्थे सम्बन्धार्थे हितेऽपि च ॥ ५७ ॥
न्याय्ये शक्ते **सदस्य**स्तु यज्ञानां विधिदर्शिनि ।
सभ्ये च **संस्थित**स्तु स्यात् समाप्ते च मृतेऽपि च ॥ ५८ ॥
सम्यक्स्थिते **सत्तम**स्तु श्रेष्ठे चाप्यतिशोभने ।
तथा पूज्यतमे चाथ **सङ्कीर्णो** निचितेऽपि च ॥ ५९ ॥
अशुद्धव्याप्तयोश्चापि कुत्रचिद् वर्णसङ्करे ।
सङ्कुलं तु भवेद् व्याप्ते परस्परपराहते ॥ ६० ॥
वचने स्यादविस्पष्टवचनेऽन्येऽथ मिश्रिते ।
संसृष्टशब्दं जानीयाच्छुद्धे च वमनादिभिः ॥ ६१ ॥
समूढः पूजिते भुग्ने सद्योजातेऽप्युपप्लुते* ।
संहतं दृढसन्धौ च सङ्गते **स्यायुक्तः** पुनः ॥ ६२ ॥
स्याद् ग्रामाधिकृते स्थास्नावथ **साधिष्ठ** इत्ययम् ।
भवेद् भृशतमे चैव तथा साधुतमेऽपि च ॥ ६३ ॥
अथो भृशतरे साधुतरे **साधीय** इत्यदः ।
स्तिमितं निश्चले क्लिन्ने तृप्ते तु **सुहितो** भवेत् ॥ ६४ ॥
तथा सुष्ठु हितेऽपि स्यात् सेनारक्षे तु **सैनिकः** ।
स्यात् सेनासमवेते च **हृषित**[1]स्तु मनोहरे ॥ ६५ ॥
सरोमाञ्चे प्रतिहृते सहर्षे विस्मितेऽपि च ।
तथा स्तब्धे च रोमादावित्यध्यायः समाप्तवान् ॥ ६६ ॥

इति त्र्यक्षरकाण्डे वाच्यलिङ्गाध्यायः ।

---

१. 'हर्षित' क. ङ. पाठः.

* 'समूढः पुञ्जिते भुग्ने सद्योजातेऽनुपप्लुते' इति तु मेदिनी ।

अथ त्र्यक्षरकाण्डे नानालिङ्गाध्यायः ।

अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने ।
अयाचिते जले जग्धौ[1] मोक्षेऽन्ने हेम्नि गोरसे ॥ १ ॥

धारोष्णदुग्धेऽप्यमृतौ क्षीरमात्रे धनञ्जयः ।
एतेष्वर्थेषु जानीयात् क्लीबं वेदे तु पुंस्ययम् ॥ २ ॥

देवे तु द्वे स्त्रियां तु स्यादमृता मद्यभिक्षयोः ।
आमलक्यां हरीतक्यां गुडूच्यां रभसः पुनः ॥ ३ ॥

मागध्यां चाह सूर्यस्य पुनस्तेषु गभस्तिषु ।
ये वृष्टिसर्जने प्रोक्ता येषां सङ्ख्या चतुःशती ॥ ४ ॥

त्रिस्त्वप्र(तीःमी)त एकान्तसुन्दरे स्वादुनित्ययोः ।
ह्यवे चा**थाक्षरः** पुंसि विरिञ्चे विष्णुखञ्जयोः ॥ ५ ॥

क्ली तु वाचि विधौ धर्मे वर्णेऽम्बुतमसोः क्रतौ ।
अक्षराख्ये सामभेदे खे मोक्षे मूलकारणे ॥ ६ ॥

परमाणौ ब्रह्मणि च प्रणवे तु नृशण्डयोः ।
त्रिस्त्वक्षरितरि स्याच्चाविद्यमानक्षरे तथा ॥ ७ ॥

अनन्तः पुंसि विष्णौ स्यान्नागराजे हलायुधे ।
क्लीबं तु व्योम्न्यनन्ता तु पौर्णमास्यां मरुद्दिशि ॥ ८ ॥

शारिवाभूमिदूर्वासु विशल्यानाम्नि चौषधौ ।
दुःस्पर्शे च स्त्रियां भेद्यलिङ्गं त्वन्तवि(सःव)र्जिते ॥ ९ ॥

अन्तरं तु नपि प्रत्यासत्तौ मध्यावकाशयोः ।
तादर्थ्येऽवसरे कालभेदे मन्वन्तराह्वये ॥ १० ॥

विशेषविवरान्तर्धिष्ववसानविनार्थयोः ।
अवधौ च त्रिषु पुनस्तुल्येऽल्पपरिधानयोः ॥ ११ ॥

---

१. 'ग्धे' ङ. पाठः.

बाह्ये स्वीये प्रतिभुवि नृनपोस्त्वन्तरात्मनि ।
अर्जुनस्तु पुमान् कार्तवीर्ये मध्यमपाण्डवे ॥ १२ ॥
मातुरेकसुते शौक्लचे यमे दृष्टिरुजान्तरे ।
ककुभाख्यद्रुमे क्ली तु तृणे रूपे च हेम्नि च ॥ १३ ॥
स्त्रियां तु सुरभौ रात्रावुषस्यप्यापगान्तरे ।
बाहुदाख्येऽर्जुनी च स्यात् त्रि तु स्यादग्रयशुक्लयोः ॥ १४ ॥
रभसस्तु द्वयोराह केकिनि क्ली तु दृग्भुजि ।
अरिष्टस्तु पुमान् निम्बे फेनिलाख्ये महीरुहे ॥ १५ ॥
लशुने दैत्यभेदे च कृष्णेन विनिपातिते ।
स्याद् दंशबन्धने चाथ क्लीबं मरणलाञ्छने ॥ १६ ॥
अप्यारण्यकयोः साम्नोः 'पवित्रं त'ऋगुत्थयोः ।
अशुभे च शुभे वर्णविकारे सज्जनः पुनः ॥ १७ ॥
अञ्जनाभे वर्ण इति निकार इति चापठीत् ।
सुरायां सूतिकागेहे स्त्रियां त्वेकोऽपठीद् भिषक् ॥ १८ ॥
कटुकानागबलयोस्तक्रे तु नृनपोस्तथा ।
भेषजद्रवभेदे च द्वे तु काके त्रिषु त्वयम् ॥ १९ ॥
अहिंसिते तथा व्याधिनिर्मुक्ते निरुपद्रवे ।
अदृष्टं वह्नितोयादिदैवभीतौ महीभुजाम् ॥ २० ॥
क्ली त्रि त्वनीक्षितेऽथ स्यादक्षतं क्लीबलिङ्गकम् ।
धान्येऽपि तण्डुलेऽथ स्त्रीनपोर्लोजेषु ना यवे ॥ २१ ॥
अन्यस्मिंस्तु क्षतात् त्रि स्यादक्षितं तु जले नपि ।
सङ्ख्याविशेषे चान्यस्मिन् क्षितात् त्रि स्यादथाच्युतः ॥ २२ ॥
पुमान् विष्णौ त्रिषु पुनश्च्युतादन्यत्र वस्तुनि ।
‡**अन्तस्था** तु स्त्रियां प्रोक्ता यरलेषु वकारके ॥ २३ ॥

---

‡ कान्तोऽयम् । विबन्तस्तु विश्वपावत् पुंसि बोद्धव्यः ।

तथा छन्दोविचित्यां च व्यक्षरप्रभृतिष्वपि ।
षड्विंशतौ चच्छन्दस्सु चतुर्वृद्धेषु दृश्यते ॥ २४ ॥
प्रयोगे ब्राह्मणेनोपास्थानीयां[1] जीयके[2] तथा(?)[3] ।
त्रिष्वन्तावस्थिते चापि तथैवान्तरवस्थिते ॥ २५ ॥
अरुणा स्त्री विषायां च मञ्जिष्ठात्रिवृतोरपि ।
क्ली तु ताम्रे पुमांस्तु स्यात् सूर्ये सूर्यस्य सारथौ ॥ २६ ॥
शशिजे चाप्युषसि च काण्डर्षिष्वपि केषुचित् ।
अव्यक्तरागवर्णे च सन्ध्यारागे तु केचन ॥ २७ ॥
लोहितेऽन्यस्तु कपिले त्रि त्वत्र कथिता गुणाः ।
अव्यक्तरागादयो ये तेषामन्यतमेन यत् ॥ २८ ॥
युक्तं वस्तु भवेत् तत्र निःशब्दे चाजयादयः ।
अजिरं क्ली शरीरे च विषये चाङ्गणेऽपि च ॥ २९ ॥
शैघ्र्ये च नगरे चास्य प्रयोगोऽर्थान्तरेऽपि च ।
दृश्यते भारते कौञ्चधरणीधरवर्णने ॥ ३० ॥
कुरङ्गारुतनिर्घोषमुद्भ्रान्तसृमराजिरम् ।
इत्यत्रार्थश्चिन्तनीयोऽथ नद्यामजिरा स्त्रियाम् ॥ ३१ ॥
उमायामपि च प्राह रभसः शब्दवित्तमः ।
त्रि तु शीघ्रे जर्जरे च स्यादथो **अमरा** स्त्रियाम् ॥ ३२ ॥
गुडूचीन्द्रपुरीस्थूणास्वमर्तरि तु वाच्यवत् ।
द्वे तु देवेऽथ पुंसि स्याद्**ररः** सोमसंज्ञके ॥ ३३ ॥
यज्ञाङ्गेऽग्नौ च युद्धे तु लोहलोहशलाकयोः ।
अपि क्लीबं कवाटे तु स्यात् स्त्रीशण्डेऽररी इति ॥ ३४ ॥
आरायामररा स्त्र्येव शीघ्रे स्याद् भेद्यलिङ्गकम् ।
अर्गला तु न ना द्वारकवाटद्वयबन्धने ॥ ३५ ॥

---

१. 'पा' ग. पाठः. २. 'यं' ग. पाठः. ३. 'ते' ख. ग. पाठः.

क्लीबं तु द्वारपटले विदण्डे तु त्रिलिङ्गिका[1] ।
रभसस्त्वाह कल्लोले दण्डिकान्तःकपोलयोः ॥ ३६ ॥
अचलो ना गिरौ विष्णौ पृथिव्यां त्वचला स्त्रियाम् ।
देव्यां च काञ्चिकस्थालमधितिष्ठति या सदा ॥ ३७ ॥
निश्चले तु त्र्यमात्यस्तु राज्ञो धीसचिवे पुमान् ।
त्रिस्त्वमाभवजातादावहतं त्रिर्नवांशुके ॥ ३८ ॥
अहिंसितेऽप्यहिंसायां पुनः क्लीबेऽहितः पुनः ।
ना रिपौ त्रि त्वपथ्येऽथ स्यादषाढा स्त्रियामियम् ॥ ३९ ॥
अब्देवते च नक्षत्रे वैश्वदेवे च भे तथा ।
तद्युक्ते कालसामान्ये ताभ्यां यज्ञद्विजन्मनाम्(?) ॥ ४० ॥
अग्निचित्येष्टकाभेदेऽप्यथ स्याद् भेद्यलिङ्गकम् ।
असोढरि तथाषाढायुक्तकालजवस्तुनि ॥ ४१ ॥
अभिज्ञा तु स्त्रियां स्मृत्यां निपुणे त्वभिधेयवत् ।
अन्नादो ना व्रतान्ताग्नावन्नस्यात्तरि तु त्रिषु ॥ ४२ ॥
मनुष्ये तु द्वयोराह शब्दवेदी धनञ्जयः ।
अजितस्तु पुमान् विष्णौ दूर्वायामजिता स्त्रियाम् ॥ ४३ ॥
अनिर्जिते पुनस्त्रि स्यादव्यक्तस्तु पुमान् हरौ ।
परमात्मनि च क्ली तु साङ्ख्यतत्त्वान्तरेऽपि च ॥ ४४ ॥
प्रधानाख्ये त्रिषु पुनरस्पष्टे मूर्खे एव च ।
रभसस्तु प्रमाद्याह परमात्मन्यमुं नपि ॥ ४५ ॥
अव्ययोऽस्त्री स्वराद्यादेष्वीश्वरस्य दशस्वपि ।
ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः ॥ ४६ ॥
स्रष्टृत्वमात्मसम्बोधो ह्याधिष्ठातृत्वमित्यपि ।
एतेषु त्रि तु यस्यास्ति न व्ययस्तत्र वस्तुनि ॥ ४७ ॥

---

१. 'क्ली' क. ङ. पाठः.

पार्वत्यां त्वद्रिजा स्त्री स्यात् क्ली शिलाजतुनामनि ।
धातुभेदे त्रिषु पुनरद्रिजाते नपि त्वदः ॥ ४८ ॥

शिलाजतुन्यश्मजं स्यादश्मजाते पुनस्त्रिषु ।
अनीकं तु नृशण्डे स्यात् सेनायां समरेऽपि च ॥ ४९ ॥

बाणावयवभेदे चाप्यथानूकं नपुंसकम् ।
देहावयवभेदे च शीले चान्वय एव च ॥ ५० ॥

गते जन्मनि नाथ स्यादनूपो महिषे द्वयोः ।
जलप्राये तु देशे त्रिरथाहीनो नृलिङ्गकः ॥ ५१ ॥

द्विरात्रादिषु यज्ञेषु प्राक् त्रयोदशरात्रतः ।
अथ त्रिषु स्यादन्यूने स्यादहीनामिनेऽपि च ॥ ५२ ॥

अक्षीवं त्वब्धिजे क्लीबं लवणे ना तु शिग्रुके ।
अमत्ते तु त्रिरमतः पुनर्मृत्यौ नृलिङ्गकः ॥ ५३ ॥

द्वे तु मर्त्येऽधरस्तु स्यादोष्ठे पुंस्यथ भेद्यवत् ।
अवाचीने च हीने क्ली त्वध्वरं खे मखे तु ना ॥ ५४ ॥

अत्वरस्तु त्वराहीने त्रि द्वे तु महिषे स्मृतः ।
अधृष्या तु नदीभेदे स्त्री त्रिषु त्वप्रधृष्यके ॥ ५५ ॥

नाद्भुतो वैश्वदेवाम्नौ महदाश्चर्ययोस्त्रिषु ।
अखातं क्ली देवखातजलाधारेऽथ भेद्यवत् ॥ ५६ ॥

खातादन्यत्र पुल्लिङ्गस्त्वपायोऽपगमे तथा ।
पलायनेऽथापेताये त्रिरपाङ्गः पुनः पुमान् ॥ ५७ ॥

नेत्रान्तेऽपगताङ्गे तु त्रिरलिङ्गं तु नप्यदः ।
प्रधानाख्ये साङ्ख्यतत्त्वे निर्लिङ्गे त्वभिधेयवत् ॥ ५८ ॥

त्रिस्त्वनङ्गोऽङ्गरहिते क्ली तु व्योम्नि स्मरे तु ना ।
अङ्गनाशब्द आख्यातः कल्याणाङ्ग्यां स्त्रियां स्त्रियाम् ॥ ५९ ॥

---

१. 'म्रा' ख. पाठः.

गतिप्राङ्गणयोस्त्वन्ये कथयन्त्यङ्गनं बुधाः ।
ग्रन्थावच्छेदभेदे तु **नाध्यायो**ऽध्ययनेऽपि च ॥ ६० ॥
ध्यातुरन्यत्र तु त्रिः स्याद्**व्यथा** तु स्त्रियामियम् ।
हरीतक्यां स्तम्बभेदे यस्याख्या पद्मचारिणी ॥ ६१ ॥
महाश्रावणिकायां च वैद्यः कश्चिदभाषत ।
पीताझिण्ट्यां तु पुंस्येष निर्व्यथे त्वभिधेयवत् ॥ ६२ ॥
पन्नगेऽपि पठत्येनं रभसस्तद् विचार्यताम् ।
अश्वत्थस्तु नृलिङ्गः स्याद् वृक्षे पिप्पलसंज्ञके ॥ ६३ ॥
अश्विनीसंज्ञनक्षत्रे स्यान्मुहूर्तान्तरेऽपि च ।
पौर्णमास्यां त्वाश्वयुज्यामश्वत्था स्यात् स्त्रियामियम् ॥ ६४ ॥
अशोकः पुंसि कङ्केलिसंज्ञवृक्षे स्त्रियां पुनः ।
अशोका कटुरोहिण्यां वीतशोके तु भेद्यवत् ॥ ६५ ॥
पथ्याविडङ्गयोः स्त्री स्याद्**मोघा** सफले त्रिषु ।
अर्शोघ्नः सूरणे पुंसि तक्रे तु स्यान्नपुंसकम् ॥ ६६ ॥
अर्शोघ्नी मुसलीसंज्ञस्तम्बे स्त्री भेद्यवत् पुनः ।
अर्शसो घातकेऽथ स्याद्**योगः** पुंसि कीर्तितः ॥ ६७ ॥
वियोगे विधुरे तु त्रियोगहीनेऽपि लोहगे ।
अन्तिका तु स्त्रियां चुल्लचां समीपे भेद्यलिङ्गिका[1] ॥ ६८ ॥
अण्डजस्तु द्वयोर्मत्स्ये कृकलासपतत्रिणोः ।
स्त्री त्वण्डजा स्यात् कस्तूर्यामण्डजाते पुनस्त्रिषु ॥ ६९ ॥
अब्धिजा तु स्त्रियां लक्ष्म्यां भेद्यवत् तु समुद्रजे ।
अञ्जनः पुंसि वरुणदिग्गजेऽथाञ्जना स्त्रियाम् ॥ ७० ॥
हालाहलाख्यजन्तौ स्याद् जनन्यां च हनूमतः ।
लेप्यनार्यां तु रभस ईदन्तामाह चाञ्जनीम् ॥ ७१ ॥

---

१. 'ङ्ग' ख. ग. पाठः.

क्ली त्वनक्तिक्रियायां स्यान्नेत्रसंस्कारवस्तुनि ।
रसाञ्जने च रभसो विशेषादिदमब्रवीत् ॥ ७२ ॥

नप्स्त्रियोस्त्वञ्जयत्यर्थे त्रिषु त्वञ्जनसाधने ।
अम्बुजं पङ्कजे क्लीबं पुंस्यपि स्माह वाक्पतिः ॥ ७३ ॥

अनास्तत्वादनाट्यत्वं तद् ना निचुलशङ्खयोः ।
अम्बुजा तु स्त्रियां लक्ष्म्यामिति केचित् त्रिषु त्वदः ॥ ७४ ॥

जलजाते नपि त्वेष सङ्ख्याभेदे च सेदृशी ।
कोटेरारभ्य याः सङ्ख्याः क्रमाद् दशगुणोत्तराः ॥ ७५ ॥

सप्तमी तासु या सङ्ख्या सा ज्ञेयाथाङ्गजः स्मरे ।
केशे च ना द्वे तु पुत्रे क्ली तु रोगेऽपि शोणिते ॥ ७६ ॥

त्रिस्त्वङ्गजातेऽथाबद्धेस्त्रिर्निरर्थकवाचि च ।
अनन्यबन्धेऽबन्धे तु क्लीबेऽथ स्यात् स्त्रियामियम् ॥ ७७ ॥

अपर्णा गिरिजायां स्यात् पर्णहीने तु भव्यवत् ।
असनो ना पीतसालसंज्ञवृक्षे नपि त्वदः ॥ ७८ ॥

क्षेपणे गतिदीप्त्योश्च स्यादादानेऽप्यथार्जकः ।
सिते कठिञ्जरे पुंसि स्यादार्जयितरि त्रिषु ॥ ७९ ॥

अरूढस्तु यवे पुंसि त्रिषु त्वकृतरोहणे ।
रूढादन्यत्र **चास्थानं** पुनस्त्रिषु जलाश्रये ॥ ८० ॥

अगाधे स्थानहीने च क्ली तु स्थानात् परत्र च ।
अङ्गुलोऽस्त्री तिर्यगष्टयवमाने पुमांस्तु सः ॥ ८१ ॥

†पक्षिलस्वामिसंज्ञर्षावङ्गुष्ठेऽश्वत्थपादपे ।
हर्षनन्दी तु पर्यायमङ्गुलेरिममामनत् ॥ ८२ ॥

---

१. 'द्वं त्रिरनर्थ' ग. २. 'नबद्धेऽपबद्धे तु' ख. ङ. पाठः. ३. 'त्रि' क. पाठः. ४. 'ले' ग. पाठः.

† 'द्राविलः पक्षिलस्वामी मल्लनागोऽङ्गुलोऽपि च' (पृ. ९६. श्लो. १५९) इति वात्स्यायने वैजयन्ती ।

अङ्गारस्तु पुमान् भौमे स्यादुष्णगुण एव च ।
त्रिस्तु तद्वति निर्वाणज्वाले त्वग्नौ नृशण्डयोः ॥ ८३ ॥

निर्वाणाग्नाविन्धने च स्यात् **त्वपानं** गुदेऽपि च ।
वृषणे च पुमांस्तु स्याच्छारीरपवनान्तरे ॥ ८४ ॥

आरण्यके सामभेदेऽप्यथ स्यादक्षयो नरि ।
विष्णोरकारवाच्यस्य गृहादौ च त्रिषु त्वयम् ॥ ८५ ॥

क्षयहीनेऽष्टका तु स्त्री मार्गशीर्ष्याः परत्र या ।
तामिस्राष्टमिकास्तिस्रस्तासु च कर्म यत् ॥ ८६ ॥

पितॄनुद्दिश्य कर्तव्यं तत्र च क्ली तु सूत्रके ।
अष्टावयवके त्रिस्तु तस्याध्येतरि यस्य च ॥ ८७ ॥

सङ्ख्यावयवा अष्टौ तस्मिन्नध्ययनस्य च ।
यस्याष्टावृत्तयस्तस्मिन्**नष्टमी** तु स्त्रियामियम् ॥ ८८ ॥

तिथौ रुद्रस्याष्टमं स्यादष्टानां पूरणे त्रिषु ।
अम्बकं नयने क्लीबं पार्वत्यां त्वम्बिका स्त्रियाम् ॥ ८९ ॥

जनन्यामपि शब्दज्ञः पुनर्ब्रूते धनञ्जयः ।
स्त्रीमात्रे चाप्य**थागाध**मतलस्पर्शवारिणि ॥ ९० ॥

त्रिः क्ली तु विवरेऽहार्यः पुनर्नाधरणीधरे ।
अहर्तव्ये पुनस्त्रि स्याद**भ्यासो** गुणने पुमान् ॥ ९१ ॥

द्विरुक्तधातुपूर्वार्धेऽ*प्यभीतस्त्रिस्तु[1] निर्भये ।
अम्लानस्तु पुमान् पुष्पस्तम्बे यस्य महासहा ॥ ९२ ॥

इति संज्ञान्तरं तस्य पुनः पुष्पे नपुंसकम् ।
त्रिस्त्वम्लानवति त्रिस्तु स्याद**भीक**श्च निर्भये ॥ ९३ ॥

---

१. 'तु' ङ. पाठः.

---

* अभिगत इत्यर्थान्तरं तु प्रसिद्धमेव ।

कमितर्यपि ना तु स्याद्दृषि[1]भेदे च सामगे[2] ।
रभसस्तु कवौ चाह पुंस्येवैनं बहुश्रुतः ॥ ९४ ॥

अजिनं चर्मणि क्लीबं जिनहीने तु भेद्यवत् ।
अजपस्त्वसदध्येतर्ययं ना निर्जपे त्रिषु ॥ ९५ ॥

अजस्य पातर्यपि च क्लीबं त्वर्दि[3]तमामये ।
वातजे हिंसने गत्यां याचने च त्रिषु त्वदः ॥ ९६ ॥

गते हते याचिते च स्यादथो **अर्बुदो**ऽस्त्रियाम् ।
मांसकीलाह्वये रोगभेदेऽन्ये त्वाहुरक्षिजे ॥ ९७ ॥

रुग्भेद इति शण्डस्तु सङ्घ्चायां कोटिनामनि ।
ना तु सर्पान्तरे सर्पसत्रयाजिफणाभृताम् ॥ ९८ ॥

एकस्मिन्नपरे त्वेनं शैलभेदेऽपि चामनन् ।
अविषस्तु पुमानब्धौ गिरौ स्त्रीपुंसयोः पुनः ॥ ९९ ॥

दिवि स्त्री त्वविषी भूमौ निर्विषे त्वभिधेयवत् ।
तत्रापि स्यात् स्त्रियां वृत्तिर्यदा स्यादविषा तदा ॥ १०० ॥

अरुषस्तु पुमान् सूर्येऽरोषे वर्णेऽपरे पुनः ।
रूपवै[4]त्याहुरश्वे तु द्वयोरुषसि तु स्त्रियाम् ॥ १०१ ॥

अरुषी[5]त्यपुषस्त्वग्नौ नासारोगे पुनस्त्रिषु ।
अर्पि[6]षं बालवत्साया दुग्धे स्याद्ग्रमांसके ॥ १०२ ॥

क्लीबमन्ये पुनः प्राहुर्हस्तिनि द्वे अथो नपि ।
लाजेष्वभ्योषमाहान्यः साज्याम्भःपेयसक्तुषु ॥ १०३ ॥

पुमांसमँ[6]ङ्गुषस्तु द्वे पक्षिजातौ च हस्तिनि ।
धनञ्जयस्त्विमं प्राह पुमांसं हस्तवाचकम् ॥ १०४ ॥

---

१. 'ष्टि' ग. पाठः. २. 'गरे' ग. पाठः. ३. 'इ' क. ख. ङ. पाठः. ४. 'वि' क. गं., 'पि' ख. पाठः. ५. 'यां' क. ख. ङ. पाठः. ६. 'मंशुष' ग. पाठः.

अगस्त्यस्तु पुमान् कुम्भसम्भवे स्यान्महामुनौ ।
अगस्तिसंज्ञवृक्षे च क्लीबत्वस्य फलपुष्पयोः ॥ १०५ ॥
अजन्यं क्लीबमुत्पाते जन्यहीने तु तत् त्रिषु ।
अरालो यक्षधूपास्यनिर्यासे पुंसि कीर्तितः ॥ १०६ ॥
नटानां हस्तविन्यासभेदे भुग्ने तु भेद्यवत् ।
अतिप्रमाणकाये तु गजभेदे द्वयोरयम् ॥ १०७ ॥
अलातमुल्मुके[1] (क्लीब)मनात्ते त्वभिधेयवत् ।
अङ्गदं नपि केयूरे वालिपुत्रे तु पुंस्ययम् ॥ १०८ ॥
रभसो वामनाख्यस्य दिग्गजस्याह योषिति ।
अर्दनं तु गतौ क्लीबं याचने चापरे पुनः ॥ १०९ ॥
अर्दना याचने स्त्रीत्वे हिंसायां त्वर्दना न ना ।
अपटी स्त्री काण्डपटे पटहीने तु भेद्यवत् ॥ ११० ॥
तत्रापि च स्त्रियां वृत्तिर्यदा स्यादपटा तदा ।
अवटस्तु पुमान् गर्ते कूपे मानान्तरेऽपि च ॥ १११ ॥
चतुर्विंशत्यङ्गुलके वटहीने तु स त्रिषु ।
अगमस्तु गिरौ वृक्षे गतिहीने तु भेद्यवत् ॥ ११२ ॥
अनृतं तु कृषौ क्लीबमसत्ये(तुं[2] च) त्रिषु त्वदः ।
असत्ययुक्तेऽप्यनृतेऽप्यपुंस्त्वे त्वनृता स्त्रियाम्[3] ॥ ११३ ॥
असुरस्तु पुमान् मेघे वास्तुदेवान्तरेऽपि च ।
कोष्ठपङ्क्तौ पश्चिमायां षष्ठे दक्षिणतः स्थिते ॥ ११४ ॥
द्वे तु दैत्ये गजे च क्ली पुनः कांस्याख्यलोहके ।
असितस्तु पुमान् ज्ञेय इक्ष्वाकुकुलजे नृपे ॥ ११५ ॥

---

१. 'के मत्ते निचाते (?) त्व' ख. ग. पाठः. २. 'घु' क. ख. ङ. पाठः. ३. 'प्य' क. ग. पाठः.

शनैश्चरे च वर्णे च कृष्णे तद्वति तु त्रिषु ।
अबद्धे चाप्यथासाध्यजिह्वारोगान्तरेऽलसः ॥ ११६ ॥

पादरोगविशेषे च स्यादुष्ट्रस्य ज्वरेऽपि च ।
आलस्यवति तु त्रि स्यादलसा तु स्त्रियामियम् ॥ ११७ ॥

हंसपाद्यामथाध्वर्यावविनः पुंसि पावके ।
तथाविधाने[1] गुप्तावप्युदकेऽपि नपुंसकम् ॥ ११८ ॥

द्वयोस्तु विहगे भासे मृगे चाथाकृतं नपि ।
यवव्रीह्यादिसतुषहविष्यजनिते त्रिषु ॥ ११९ ॥

अधरस्तु पुमान् बन्धुसमूहे भूरुहान्तरे ।
क्ली तु युद्धे[2] द्वयोस्तु स्यान्मातृवाहाख्यजन्तुके ॥ १२० ॥

जलपक्षिविशेषे च स्यादथो **अतसः** पुमान् ।
वनस्पतिप्रभेदे स्यादतसी तु स्त्रियामियम् ॥ १२१ ॥

उमासंज्ञे धान्यभेदे वने तु स्याद् नपुंसकम् ।
अवसं क्ली भवेच्चापे ना पाथेयाशनीयके ॥ १२२ ॥

वसाहीने पुनस्त्रिः स्याद्**बला** तु स्त्रियामियम् ।
तथा चर्वितताम्बूलरसे भार्याप्रजे तु ना ॥ १२३ ॥

बलहीने पुनस्त्रिः स्यादजयस्योत्तरं वचः ।
अवेलः पुंस्यपालापे स्त्र्यवेला पूगचूर्णके ॥ १२४ ॥

इत्यन्यत्र च वेलाया वेलाहीने तु भेद्यवत् ।
अलर्कस्तु सितार्के ना क्लीं तु तत्फलपुष्पयोः ॥ १२५ ॥

शाकभेदेऽप्यैलर्कार्ख्यौ द्वे तु स्याद् रोहिते शुनि ।
अलका स्त्री कुबेरस्य नगरे मूर्धजे पुनः ॥ १२६ ॥

कुटिले पुंसि शण्डस्तु स्याद्**श्वीयं** कदम्बके ।
अश्वानां त्रिस्त्वश्वहिते स्त्री त्वश्वीयाश्वलाञ्छने ॥ १२७ ॥

---

१. 'पि' ङ., 'भि' ग. पाठः. २. 'वृ' क. पाठः. ३. 'त्व' ख. पाठः ४. 'ख्ये' ङ, पाठः.

अण्डीरः पुरुषे पुंसि सज्जने मुष्कवत्पशौ ।
त्रि तुं शक्तेऽथाण्डुको ना मुष्के स्याद् द्वे तु टिट्टिभे ॥ १२८ ॥

अङ्कुरस्त्वस्त्रियां बीजप्ररोहे किञ्च शाखिनाम् ।
प्रतानभेदे क्लीबं तु रुधिरे रोम्णि वारिणि ॥ १२९ ॥

अथापरं क्लीबलिङ्गं सिद्धान्ते मुनयो विदुः ।
गजपाश्चात्यभागेऽथ त्रिः पूर्वप्रतियोगिनि ॥ १३० ॥

अन्यस्मिन्नप्यथापारः समुद्रे ना त्रिषु त्वयम् ।
अविद्यमानपारे स्यादशित्रस्तु पुमानयम् ॥ १३१ ॥

अम्बौ क्लीं रश्मिहविषोरम्बष्ठस्तु द्वयोरयम् ।
वैश्यायां ब्राह्मणाज्जाते विवाहादपरे पुनः ॥ १३२ ॥

ब्राह्मणात् क्षत्रियाजाते विवाहेनेति मन्वते ।
सवर्णाख्ये नृपात् तूढवैश्यायामपरे विदुः ॥ १३३ ॥

जाते माहिष्यसंज्ञाके स्त्री त्वम्बष्ठा विधीयते ।
पाठाशार्ङ्गाष्ठयोर्यूथीचाङ्गेर्योः स्थावरान्तरे ॥ १३४ ॥

मयूरविदलासंज्ञे काकमाच्यां च कश्चन ।
वैजयन्त्यां तु पिप्पल्यामप्यम्बष्ठामभाषत ॥ १३५ ॥

अग्निष्ठः पुंस्युपस्थावेसंज्ञयूपद्वयान्तरे ।
स्थितयूपे त्रिषु त्वेष वह्निस्थे क्लीं **त्वपष्ठवाक्** ॥ १३६ ॥

अङ्कुशाग्रे पष्ठहीने पुनः स्यादभिधेयवत् ।
पष्ठश्च पर्वतप्रस्थ आख्यातः कृतबुद्धिभिः ॥ १३७ ॥

अत्यूहो गजभेदे ना त्रि त्वत्यर्थोहकादिषु ।
अत्यूहा नीलिकायां स्त्री नीलकण्ठखगे द्वयोः ॥ १३८ ॥

अणीचिस्तु पुमान् वेणौ त्रिषु शाकटिके मतः ।
असौम्येऽक्षण्यदृष्टिः स्त्री दृष्टिहीने तु भेद्यवत् ॥ १३९ ॥

---

१. 'त्व' ङ. पाठः. २. 'प' क. ख. ग., 'या' ग. पाठः. ३. 'णि' ङ. पाठः,

अरणिः पुंस्त्रियोर्यज्ञवह्निमन्थनकाष्ठयोः।
ना मुहुर्[1]वचने स्त्री तु या कन्या निःस्पृहा सतः ॥ १४० ॥
अविवाह्या भवेत् तस्यामथ स्याद्[2]ङ्कृतिः पुमान्।
वायौ प्रजापतौ च स्त्रीलिङ्गस्त्वर्थान्तरेऽस्त्ययम् ॥ १४१ ॥
इति बह्वादिपाठेन विज्ञेयमथ **नाञ्चतिः**।
अन्नावर्थान्तरे त्वस्ति स्त्रीलिङ्ग इति निश्चयः ॥ १४२ ॥
बह्वादिपाठादेवास्य स्यादथो **अंहतिः** स्त्रियाम्।
दाने व्याधौ च पिशिते पुल्लिङ्गस्त्वंहिधातुके ॥ १४३ ॥
अमतिस्त्वमिधातौ ना द्वयोस्त्वाहुर्विचक्षणाः।
छागचातकयोर्लिङ्गं त्वस्माभिर्नैव निश्चितम् ॥ १४४ ॥
रूपे प्रावृषि च त्रिस्तु निर्मता**वरतिस्तु** ना।
असुखक्रोधयोस्त्रिस्तु रतिहीनेऽ**दितिः** पुनः ॥ १४५ ॥
ज्ञेया शैलेन्द्रकन्यायां पृथिव्यामपि सूरिभिः।
देवमातरि गोवाचोर्हीमार्थसमिदुक्षणे ॥ १४६ ॥
द्यावापृथिव्योस्त्वदितिः स्त्री त्रिस्तु दितिवर्जिते।
अगास्तिस्तु पुमान् कुम्भसम्भवे मुनिपुङ्गवे ॥ १४७ ॥
अगस्त्यवृक्षे च क्ली तु स्यात् तस्य फलपुष्पयोः।
अवन्तिर्ना राजभेदे नीवृद्भेदे च भूम्नि च ॥ १४८ ॥
स्त्रियां त्ववन्तिराजस्य स्यादवन्ती स्त्र्यपत्यकं।
उज्जयिन्याख्यनगरेऽप्य**वतिस्तु** पथि स्त्रियाम् ॥ १४९ ॥
पुमांस्त्वततिधातौ स्या**दातिथिस्तु** पुमानयम्।
कुशस्य तनयेऽपि स्यात् तथैव गृहमागते ॥ १५० ॥
अबन्धौ भोक्तुकामे च तिथिहीने तु भेदवत्।
अरात्रिः पुंस्त्रियोर्हस्ते सप्रकोष्ठतताङ्गुलौ ॥ १५१ ॥

---

१. 'लपने' ङ. पाठः. २. 'स्त्वं' ख. ग. ङ. पाठः.

कीलकूर्परयोश्चान्ये पुनर्मानान्तरे विदुः ।
चतुर्विंशत्यङ्गुलेऽथ स्यादग्रावमनिः पुमान् ॥ १९२ ॥

कश्चित् त्वाह स्त्रियां रोगे पुंस्त्रियोस्त्वशनिः पवौ ।
वज्रनिर्घातयोश्च त्रिः पुनः स्याच्छनिवर्जिते ॥ १९३ ॥

अ(त्मः)निस्तु पुमानग्नौ जयहस्तिन्यथ स्त्रियाम् ।
पशूनां भक्षणे द्रोण्यां तालुन्यप्यथ दीधितौ ॥ १९४ ॥

अभीशुः प्रग्रहेऽश्वस्य बाहौ चाथाङ्गुलौ स्त्रियाम् ।
अविष्टस्तु द्वयोरश्वे पुल्लिङ्गस्त्वपहोतरि ॥ १९५ ॥

अजिष्णुस्तु पुमानम्बावुदके तु नपुंसकम् ।
अररुस्त्वसुरे द्वे स्यान्मन्थनेऽथायुधे नपि ॥ १९६ ॥

अगुरु क्ली शिंशपायां जोङ्गके पुन्नपुंसकम् ।
लघुनि स्याद् भेद्यलिङ्गमश्वयुक् तु स्त्रियामियम् ॥ १९७ ॥

अश्विन्याह्वयनक्षत्रे तद्युक्ते कालमात्रके ।
जाते तु तत्र त्रिरथो अहिभुग् गरुडे पुमान् ॥ १९८ ॥

द्वे मयूरे भेद्यलिङ्गस्त्वहिभोजिनि कीर्तितः ।
अंशुमांस्तु पुमान् सूर्ये चन्द्रे चाद्यमहीपतौ ॥ १९९ ॥

दिलीपाख्यस्य नृपतेस्तातेऽथांशुमती स्त्रियाम् ।
पृश्निपर्णीसालपर्ण्योरंशुयुक्ते तु भेद्यवत् ॥ २०० ॥

मुहूर्तभेदे त्वभिजित् क्रतुभेदे च पुंसि सः ।
नक्षत्रभेदे तद्युक्तकालमात्रे च स त्रि तु ॥ २०१ ॥

तत्र जाते पुमांस्तु स्यादहिजिद् विष्णुशक्रयोः ।
अहेस्तु जेतरि त्रि स्यादरुन्धत् त्वभिधेयवत् ॥ २०२ ॥

अरोधके वसिष्ठर्षिपत्न्यां तु स्यादरुन्धती ।
वचायां च स्त्रियामस्थिसंयुक्ते त्वभिधेयवत् ॥ २०३ ॥

अस्थिमानस्थिसङ्घातसंज्ञवल्लघ्वन्तरे तु ना ।
अङ्कुरी तु वसन्ते ना वृक्षे चाथ त्रि साङ्कुरे ॥ १६४ ॥

अहिद्विड् गरुडे पुंसि शक्रे च नकुले पुनः ।
द्वे मयूरे त्रिषु पुनरहेर्द्वेषस्य कारिणि ॥ १६५ ॥

अनड्वांस्तु बलीवर्दे नार्घ्यायां तु स्त्रियां द्विधा ।
अनड्वह्यप्यनड्वाहीत्याषांढा तु स्त्रियामियम् ॥ १६६ ॥

आषाढानक्षत्रयुक्तपौर्णमास्यां पुमांस्त्वयम् ।
आषाढः शुचिसंज्ञे स्यान्मासे शैलान्तरेऽपि च ॥ १६७ ॥

आचष्टे वैजयन्त्यां तं विद्वान् मलयभूधरे ।
पालाशे व्रतिनां दण्डेऽप्यथालीढं नपुंसकम् ॥ १६८ ॥

धानुष्कस्थितिभेदे स्यात् तस्योक्तं चापि लक्षणम् ।
वाममाकुञ्च्य चरणं दक्षिणे प्रततेऽग्रतः ॥ १६९ ॥

इत्येवमास्वादने च त्रिषु त्वास्वादिते भवेत् ।
आढकोऽस्त्री चतुष्प्रस्थपरिमाणे स्त्रियां पुनः ॥ १७० ॥

आढकी तुवरीसंज्ञधान्ये स्यात् **त्वाश्रमोऽस्त्रियाम्** ।
मुनिस्थाने ब्रह्मचर्यगार्हस्थ्यादौ मठेऽपि च ॥ १७१ ॥

आश्रवोऽङ्गीकृतौ पुंसि त्रि तु स्याद् वचनस्थिते ।
आग्नेयः पुंस्यगस्त्यर्षौ द्वापराख्ययुगेऽपि च ॥ १७२ ॥

संवत्सरे च क्लीबं तु रुधिरेऽप्युत्तरायणे ।
दशाहकार्यश्राद्धे च त्रेतायां तु युगे स्त्रियाम् ॥ १७३ ॥

आग्नेयी भेद्यवत् त्वग्निसम्बन्ध्यर्थे स्त्रियां पुनः ।
रजस्वलायामात्रेयी नदीभेदे च कीर्तिता ॥ १७४ ॥

क्ली तु सामविशेषे स्याद् द्वयोस्त्वत्रेरपत्यके ।
अबहुष्वेव धातौ तु शारीरे रससंज्ञके ॥ १७५ ॥

पुमानथ स्यादाश्लेषो नक्षत्रे सर्पदैवते ।
स्त्रीणां त्वालिङ्गनेऽथ स्यादास्फोता स्त्री वनोद्भवे ॥ १७६ ॥

मल्लिकायाः प्रभेदे च गिरिकर्ण्यां च ना पुनः ।
पलाशवृक्षे रभसस्त्वर्कवृक्षे प्रमादवान् ॥ १७७ ॥

भेद्यलिङ्गं तु विज्ञेयमायतं दीर्घवस्तुनि ।
स्यात् कृतायमने चाथ क्लीं शराकर्षणान्तरे ॥ १७८ ॥

आकर्णकर्षणाच्चेदमङ्गुलेनाधिकं विदुः ।
ज्ञेयमायमने चैतत् पीठादौ त्वासनं नपि ॥ १७९ ॥

पुंस्यप्येके क्रियायां तु स्यादास्तेरासना न ना ।
क्लीं तु गात्रस्य विन्यासभेदे पद्मासनादिके ॥ १८० ॥

गजस्य स्कन्धदेशे च स्यादास्थानी तु नपुंस्त्रियोः ।
सदस्यथ प्रतिज्ञायां क्लीबमाक्रमणेऽपि च ॥ १८१ ॥

आनकः पटहे भेर्यामपि स्यादस्त्रियामथ ।
द्राक्षायां स्त्रीत्व आनन्दी ना त्वानन्दः सुखे भवेत् ॥ १८२ ॥

आशयस्तु पुमान् स्थानेऽभिप्रायाधारयोरपि ।
कोष्ठागारे जलस्थाने त्वाह सारस्वतस्तथा ॥ १८३ ॥

सङ्खे चेतसि चेत्याह सज्जनो विभवे त्वमुम् ।
अजयः प्राह *रूपेण पुनर्जीर्णे च भेद्यवत् ॥ १८४ ॥

आमिषं त्वस्त्रियां मांसे तथा स्याद् भोग्यवस्तुनि ।
उत्कोचे च स्त्रियां तु स्यान्मांसीत्याख्ये तथामिषी ॥ १८५ ॥

गन्धद्रव्ये स्त्रियां तु स्यादाश्विनी पूर्णिमान्तरे ।
अश्विनीतारया युक्ते कार्तिकेष्टकासु सा ॥ १८६ ॥

अग्निचित्यगतासु स्यादाश्विनस्तु पुमानयम् ।
ज्ञेय आश्वयुजे मासि क्लीं तु शास्त्रान्तरे क्रतौ ॥ १८७ ॥

---

* 'कृपणे' इति स्यात् । 'कोष्ठारे कृपणे जीर्णे स्थानेऽभिप्राय आशयः' (पृ. २५८. श्लो. १७) इति वैजयन्ती ।

सम्बन्धिनि त्वदोऽश्विन्या अश्विनोश्चापि भेद्यवत्।
अथ प्रचक्षते धीराः स्यादावन्त्यः पुमात्मजे ॥ १८८ ॥

अवन्तिराजस्य पुमान् मर्त्यजात्यन्तरे पुनः।
विप्रपूर्वकविप्रस्त्रीजाते व्रात्याद् द्वयोर्भवेत् ॥ १८९ ॥

आहतं तु त्रिषु ज्ञेयं ताडिते गुणितेऽपि च।
मृषार्थके च वाक्येऽथ ताडने गुणने च नप् ॥ १९० ॥

आत्मजो मन्मथे पुंसि रुधिरे क्ली मनस्यपि।
द्वे तु पुत्रे स्वजे तु त्रि**रायुधं** तु जले नपि ॥ १९१ ॥

पुन्नपुंसकयोः शस्त्रे स्यादथार्द्रकमस्त्रियाम्।
शृङ्गिबेराख्यकन्दे स्यादथ स्याद् भेद्यलिङ्गकम् ॥ १९२ ॥

आर्द्रासंज्ञकनक्षत्रयुक्तकालोद्भवेऽथ नप्।
आर्तवं रजसि स्त्रीणां पुष्पे च रभसोऽपठीत् ॥ १९३ ॥

वस्तुमात्रे त्वृतूत्थे स्याद् भेद्यलिङ्गमिति स्मृतम्।
यस्य प्राप्त ऋतुः कालस्तस्मिंश्चाथ नपुंसकम् ॥ १९४ ॥

आर्षभं सामभेदे स्यात् त्रिषु त्वृषभयोगिनि।
आनद्धं मुरजाद्येषु वाद्येषु क्लीबलिङ्गकम् ॥ १९५ ॥

बद्धे तु भेद्यलिङ्गः स्यादिति शब्दविदो विदुः।
आसक्तमन्धकारे क्ली त्रि त्वासज्जनकर्मणि ॥ १९६ ॥

आयसं त्वयसि क्लीबमयःसम्बन्धिनि त्रिषु।
आविकस्तु नृलिङ्गः स्यादविरोमजकम्बले ॥ १९७ ॥

अविसम्बन्धिनि त्रिः स्यादार्प्रीत*स्तु द्वयोरयम्।
मर्त्यजात्यन्तरे विप्रादुग्रस्त्रीजनिते त्रि तु ॥ १९८ ॥

---

१. 'त्री' ग. पाठः.

---

* 'विप्रादावृतमुग्री' (पृ. ७२. श्लो. ५) इति तु वैजयन्ती।

ज्ञेयोऽभिनवमृत्पात्रे प्रीतेऽप्याख्यातमित्यदः ।
क्लीबं तिङन्ते त्रिस्तूक्तेऽथाचितं स्यान्नपुंसकम् ॥ १९९ ॥

तुलाविंशतिरूपाणां भाराणां दशके स्मृतम् ।
ना तु शाकटभारे स्यान्निश्चिते त्वभिधेयवत् ॥ २०० ॥

स्यादातिथ्यमतिथ्यर्थे त्रिः पुमांस्त्वतिथौ मतः ।
आचार्य उपनीत्यादिकारिणि स्यान्नृलिङ्गकः ॥ २०१ ॥

मन्त्रव्याख्याकृतीत्येक आचार्या तु स्त्रियामियम् ।
स्वतो या स्यादुपाध्याया तस्यां भार्या तु या भवेत् ॥ २०२ ॥

आचार्यस्य भवेत् तस्यामाचार्यानी स्त्रियां पुनः ।
ज्ञेया यवाग्वामाश्राणा पक्के त्वन्यत्र भेद्यवत् ॥ २०३ ॥

क्षीराच्च[1] हविषश्चापि स्यादथो आशरो द्वयोः ।
राक्षसे शरसम्बन्धहीनसम्बन्धिनि त्रिषु ॥ २०४ ॥

आशिरस्तु पुमान् विष्णौ सूर्ये वह्नौ च भोजने ।
तथा क्षीरविकारे स्यादथ वह्न्याशिनि त्रिषु ॥ २०५ ॥

*'नाशिरं दुह्र' इत्यत्र चिन्त्योऽर्थोऽथाशुगः पुमान् ।
अर्के वायौ शरे त्रिस्तु शीघ्रगेऽथ नृलिङ्गकः ॥ २०६ ॥

आलिङ्गो वाद्यभदे स्यादित्यूचे शाकटायनः ।
आलिङ्गने च त्रिषु तु स्यदलिङ्गस्य योगिनि ॥ २०७ ॥

आलिङ्ग्यः पटहे पुंसि मध्यमे भेद्यवत् पुनः ।
आलिङ्गनीये विज्ञेय आञ्जनः पुनरुच्यते ॥ २०८ ॥

---

१. 'ज्यहविषश्चापि' ग. पाठः.

---

* अयं च प्रयोगः ऋग्वेदे. ३. अष्टके. ५३. सूक्ते. १४. मन्त्रे दृश्यते । तत्र आशिरं सोममिश्रणयोग्यं पत्र इति तद्भाष्यम् ।

पुंसि सप्तदशारत्नेर्यूपस्य स्याच्चतुर्थके ।
आदितः स्यादरत्नौ च तथा चाञ्जन एव च ॥ २०९ ॥

त्रिषु त्वञ्जनसम्बन्धिन्यथ क्ली मत्तवारणे ।
आलम्बमालम्बने तु पुंस्यालस्यं तु नप्यदः ॥ २१० ॥

अलसत्वेऽलसे तु त्रिराचारस्तु पुमानयम् ।
चारित्रे स्त्री तु शक्तीनां नवानां शार्ङ्गिणः क्वचित् ॥ २११ ॥

शक्तौ तदा स्यादाचारा स्यादासारस्तु पुंस्ययम् ।
सार्थे स्याद् वेगवद्वर्षे नृपाणां च सुहृद्बले ॥ २१२ ॥

सैनिकानां प्रसरणे प्रसृतौ च स्त्रियां पुनः ।
आसारी स्यात् स्थलेऽथ स्यादाक्षिको नरलिङ्गकः ॥ २१३ ॥

व्याधौ दीव्यति तु त्रि स्यादक्षैरादित्यवाङ् तु ना ।
त्रिविक्रमावतारे स्याद् विष्णोश्च द्वादशस्वपि ॥ २१४ ॥

देवतागणभेदस्थेष्वर्के देवे तु स द्वयोः ।
अदित्यादित्ययोः पुत्रेऽप्येष तु स्यात् त्रिषु स्मृतः ॥ २१५ ॥

अदित्यादित्यसम्बन्धिन्यथ क्ली रजसि स्मृतम् ।
आभीलं क्ली भवेत् कष्टे त्रि तु तद्वति भीकरे ॥ २१६ ॥

आग्नीध्रस्तु पुमानृत्विग्विशेषेऽथ नपुंसकम् ।
अग्निधिष्ण्यविशेषे स्यादाग्नीध्री तु स्त्रियामियम् ॥ २१७ ॥

अग्निकार्येऽथ पुंसि स्यादाह्निको ग्रन्थकारिणाम् ।
प्रपाठकाख्ये ग्रन्थस्यावच्छेदे भेद्यवत् पुनः ॥ २१८ ॥

अहर्निर्वृत्तकादौ स्यात् क्ली तु नित्यक्रियाशने ।
इत्याह रभसः प्राज्ञ आधेयं तु नपुंसकम् ॥ २१९ ॥

अग्न्याधाने निधेये तु त्रिराधारधृतेऽपि च ।
आदेशके त्रिरादेष्टा नाध्वरव्रतिनि स्मृतः ॥ २२० ॥

---

१. 'ध्वे' ग. पाठः.

आत्माशी तु द्वयोर्मत्स्ये त्रि तु स्यादात्मभक्षिणि ।
इल्वका मृगशीर्षाख्यनक्षत्रे स्त्री तया युते ॥ २२१ ॥
कालमात्रे च नप् त्वेतत् सामभेदेषु केषुचित् ।
व्यापके तु त्र्यथ द्वे स्यादिल्वलो मत्स्यरक्षसोः ॥ २२२ ॥
यूपे तु पुंसीत्यपरे भ्रान्तिमूलास्तु केचन ।
मृगशीर्षाख्यनक्षत्रशिरोदेशस्थितोडुषु ॥ २२३ ॥
इल्वलाः स्त्रिय इत्येवममाषिषत तन्नृषा ।
इष्वासो न स्त्रियां चापे नप् त्विषोरसने त्रि तु ॥ २२४ ॥
इषोः क्षेप्तर्यथ पुमानिषिरो जातवेदसि ।
ऐषिराख्यस्य साम्नश्च द्रष्टरि स्यादिषावपि ॥ २२५ ॥
तृणे तु क्ली त्रिषु पुनरिरिणं शून्य ऊषरे ।
क्लीबं तु केचिन्मन्यन्ते क्लीबं दुर्गे वनेऽपि च ॥ २२६ ॥
इत्वरं गत्वरे त्रिः स्यात् पुंश्चल्यां त्वित्वरी स्त्रियाम् ।
इषीकास्तु[1] नृभूम्नि स्युर्दक्षिणापथवर्तिनि ॥ २२७ ॥
नीवृद्भेदे तृणस्तम्बे तूलिकायां त्वियं स्त्रियाम् ।
इषीका तृणजातौ तु शाकटायन उक्तवान् ॥ २२८ ॥
हलायुधस्य स्खलनमिषीका काश इत्यदः ।
इङ्गुदी तापसतरौ स्त्रियां पुंसि च भाषितः ॥ २२९ ॥
ज्योतिष्मत्यां स्त्रियामेव स्यादिक्ष्वाकुः पुनर्नरि ।
वैवस्वतमनोः पुत्रे राजन्ये मदनद्रुमे ॥ २३० ॥
तिक्तौ[2]लाब्वां पुनः स्त्री स्यादिराशांस्त्वियं युते ।
भेद्यलिङ्गो नदीमात्रे पुनः स्त्री स्यादिरावती ॥ २३१ ॥
बाह्लीकदेशप्रथितनदीभेदेऽप्यथ स्त्रियाम् ।
ईषिका हस्तिनो नेत्रकूटे स्याद् भेद्यवत् पुनः ॥ २३२ ॥

---

१. 'षि' क. ख. ङ. पाठः. २. 'त्तिलायां पु' ग. पाठः.

ईर्षको गन्तृहिंसित्रोर्द्वेष्टरि स्यात् तु मन्मथे ।
ईश्वरो ना महादेवे स्यात् तथा शण्डगोपतौ ॥ २३३ ॥
त्रिस्तु स्वामिनि तत्रापि यदा स्त्र्यर्थस्तदेश्वरा ।
पार्वत्यां तु स्त्रियां विद्याद् द्वे रूपे ईश्वरीश्वरा ॥ २३४ ॥
ईशानो ना महादेवे पार्वत्यां त्वाह यादवः ।
ईशानीति स्त्रियां त्रिस्तु प्रभौ तत्र यदा स्त्रियाम् ॥ २३५ ॥
ईशानेति[2] तदा भाव्यमिति शाब्दिकनिश्चयः ।
उत्सेधो मकुटच्छत्रध्वजोष्णीषतनूषु ना ॥ २३६ ॥
'प्रसोमदेव'वर्गस्य चतुर्थे साग्नि चोन्नतौ ।
अत्र तूच्छ्राय्यमाचष्टे रभसः स्वमनीषया ॥ २३७ ॥
नृशण्डलिङ्गमुच्छ्राये शरीरे तु नपुंसकम् ।
उत्पलं त्वस्त्रियां केचिद् विदुः कुवलयेऽथ नप् ॥ २३८ ॥
कुष्ठाख्यभेषजेऽथ स्यादुपरः पुंसि वारिदे ।
यूपस्य त्वक्षते मूले क्ली स्त्री स्यादुपरा दिशि ॥ २३९ ॥
उपलस्तु पुमान् मेघे पाषाणे पुन्नपुंसकम् ।
मणौ च शर्करायां तु दृषत्पुत्रेऽपि च स्त्रियाम् ॥ २४० ॥
उपला सज्जनस्त्वाह दिशि चायो(पलो?लो)[3]स्त्रियाम् ।
आदिसर्गस्थभूतानामन्नभेदे नपि त्वदः ॥ २४१ ॥
गुल्मिन्यां सलिले काष्ठेऽप्यूर्ध्वनालाह्वये पुनः ।
स्तम्बभेदे कलापाख्यमुनेः शिष्यान्तरे च ना ॥ २४२ ॥
हलायुधेन तूक्तं यदुलूपा बल्वजा इति ।
तत्प्रमादकृतं विद्यादुडुपं तु प्लवे नपि ॥ २४३ ॥

---

१. 'षि' क. पाठः. २. 'नी' ख. पाठः. ३. 'पला ब' ख. ग. पाठः.

---

† 'चन्द्रे पुंस्युलपो न स्त्री गुल्मिन्यां ना तृणान्तरे' इति मेदिनी ।

ना चन्द्रेऽथोटजोऽस्त्री स्यादृषीणां पर्णवेश्मनि ।
गृहमात्रेऽप्यु(दि?द)च्चस्तु पुमान् वादनदण्डके ॥ २४४ ॥
कोणाख्ये परपुष्टे[1] तु द्वे **उदात्त**स्तु पुंस्ययम् ।
उच्चैःस्वरे तद्वति तु महात्मनि च मेद्यवत् ॥ २४५ ॥
उद्वान्तो निर्मदगजे पुमानुच्छर्दिते त्रिषु ।
उद्भिदं कूप्यलवणे क्लीबं ना तु जलोद्गमे ॥ २४६ ॥
कूपादेस्त्रिषु तूद्भिज्जे तरुगुल्मादिवस्तुनि ।
उल्मुकं स्यादलाते स्त्री पूर्वराजान्तरं तु ना ॥ २४७ ॥
उत्तंसस्तु नृशण्डे स्यात् कर्णपूरेऽपि शेखरे ।
उत्तरं प्रतिवाक्ये क्ली त्रिस्तूर्ध्वोदीच्ययोस्तथा ॥ २४८ ॥
श्रेष्ठे चाप्यजयत्त्वाह परे चैतत् स्त्रियां पुनः ।
कौबेर्यां दिशि ना तु स्यान्निम्नादुत्तारणे तथा ॥ २४९ ॥
उत्तमस्तु विभक्तीनां पाश्चात्यत्रितये त्रि तुं ।
उत्कृष्टे दुग्धिकायां तु स्त्रियां स्यादुत्तमाथ ना ॥ २५० ॥
उद्धनो यत्र निक्षिप्य काष्ठे काष्ठस्य तक्षणम् ।
तत्रोद्धतघनादौ तु त्रिरुदक्या तु सा स्त्रियाम् ॥ २५१ ॥
ऋतुमत्यां प्रियाचारशूद्रे तु स पुमान् मतः ।
उदकार्हे पुनस्त्रि स्यात् तथैवोदकसाधुनि ॥ २५२ ॥
उपस्थोऽस्त्री भगे मेढ्रेऽप्युत्सङ्गेऽप्यौरसे पुनः ।
उरस्यो द्वे सुते ना तु स्तने त्रिस्तूरसा सह ॥ २५३ ॥
एकदिक्के तत्र साधावुरोभव उरोहिते ।
उचितं तु स्वभावे क्ली निश्चिताभ्यस्तयोः पुनः ॥ २५४ ॥
त्रिर्युक्तेऽनुमते चाथ प्रोक्तवाञ्छाकटायनः ।
योग्ये चिरानुयाते चेत्यथोद्धानं नपुंसकम् ॥ २५५ ॥

---

१. 'टि' क. ख. ङ. पाठः. २. 'वरपुष्पस्तु' ग. पाठः.

उल्लघ्यामुद्गमने च त्रिः पुनः स्यादुद्गते तथा ।
उष्णीषमस्त्री मकुटे शिरोवेष्टेऽप्यथ द्वयोः ॥ २५६ ॥
उच्छी[1]**तष्टिट्टिभे** स्वप्ने पुनर्नाथोपबर्हणे ।
उच्छीर्षं क्ली त्रिषु पुनरुन्मूर्धनि पुमान् पुनः ॥ २५७ ॥
उदारः काककङ्कौ स्यात् त्रिस्त्वग्राम्यमहात्मनोः ।
दानशौण्डेषु चैतेषु स्व्यर्थे वृत्तिर्यदा तदा ॥ २५८ ॥
उदारा चाप्युदारी चेत्येवं रूपद्वयं भवेत् ।
उदरं तु न ना ज्ञेयं जठरे क्ली तु संयुगे ॥ २५९ ॥
उद्दामो वरुणे पुंसि त्रिषु तु स्याद् विशृङ्खले ।
उल्लोलः पुंसि कल्लोले भृशं[2]लोले तु भेद्यवत् ॥ २६० ॥
उन्मत्तः पुंसि धुर्धूरे तत्फले क्ली त्रिषु त्वयम् ।
उन्माद(स्त्रिषु[3] वति) पूगस्य[4] पुनः क्लीबं फले भवेत् ॥ २६१ ॥
उद्वेगमिति सिंहोक्तं वैजयन्त्यां तु खण्डिते ।
पूगस्य फल इत्युक्तं पुमांस्तूद्वेजने त्रि तु ॥ २६२ ॥
भवेदुद्धतवेगादावुष्णिका तु स्त्रियामियम् ।
यवाग्वामुष्णकस्तु त्रिर्दक्षे क्लीबं तु चेतसि ॥ २६३ ॥
उच्चलं चापभेदे च त्रिषु तूच्चलितर्यदः ।
उद्धर्षस्तु महे पुंसि त्रिषु तूत्कटहर्षके ॥ २६४ ॥
उन्मदस्तु पुमाञ्छूर्पे **कच्छपे** तु द्वयोरयम् ।
उत्सृष्टस्त्रिषु दत्ते स्यात् त्यक्ते चाथ नृलिङ्गकः ॥ २६५ ॥
शाकजातिविशेषस्य मारिषाख्यस्य भेदके ।
देवमारिषसंज्ञेऽथो **उन्माथः** पाशयन्त्रके ॥ २६६ ॥
ना हिंसायामथोन्मार्गे त्रिः **स्तुवे** चाजयोऽब्रवीत् ।
उत्साहो[5]ऽध्यवसाये ना सूत्रे च रभसोऽब्रवीत् ॥ २६७ ॥

---

१. 'च्छि' क. ङ. पाठः. २. 'शं' क ग. ङ. पाठः. ३. 'गे स्यात् पु' ख. पाठः.
४. 'धु' ख. ग. ङ. पाठः. ५. 'हो व्यव' क. ख. ग. पाठः.

उत्साहा तु स्त्रियामुक्ता वैजयन्त्यां मनीषिणा ।
आरकूटाह्वये लोहभेदेऽथोत्कीर्ण इत्ययम् ॥ २६८ ॥
जलाशयविशेषे ना पुरीसंज्ञेऽथ स त्रिषु ।
भवेदुल्लिखितेऽथार्यम्(?)उपेन्द्रस्तु पुमानयम् ॥ २६९ ॥
विष्णावुपगते त्विन्द्रं त्रिरथो **उच्छुनः** पुमान् ।
वैशाखमासे त्रिषु तु स्यादुद्वृतशुनादिके ॥ २७० ॥
उद्वृता विषमे वृत्तविशेषे स्त्री त्रि तूत्सवे ।
उत्पिबो द्वे चकोराख्यपक्षिण्युत्पातरि त्रिषु ॥ २७१ ॥
उत्करस्तु पुमान् पुञ्जे यज्ञभूमेश्च कुत्रचित् ।
प्रदेशभेदे त्रिषु तु स्यादुद्वृतकरादिके ॥ २७२ ॥
उत्कटं तु भवेत् क्लीबं योगिनामासनान्तरे ।
उद्भटक्षीबयोस्तु त्रिरुदीच्यं तु नपुंसकम् ॥ २७३ ॥
द्रीबेरे त्रिः पुनरुद्गमवादौ स्यात् पुमान् पुनः ।
उल्लम्बने स्यादुद्बन्धो मर्त्यजात्यन्तरे पुनः ॥ २७४ ॥
खनकात् क्षत्रियाजाते[1] द्वे **उत्तप्तं** तु नप्यदः ।
शुष्कमांसे त्रिषु पुनस्तप्ते दीप्तेऽप्यथो पुमान् ॥ २७५ ॥
उर्वारुश्चिद्भिटे स्त्री तु कर्कट्यामेतयोः पुनः ।
फले क्लीबमथोद्गाता पुमान् स्यादृत्विगन्तरे ॥ २७६ ॥
उच्चैर्गातरि तु त्रि स्यादुन्नेता त्वृत्विगन्तरे ।
पुमानुन्नायके तु त्रिरूहितर्यप्यथो पुमान् ॥ २७७ ॥
उदर्चिदग्नौ त्रि पुनरुद्गतार्चिष्यथो नपि ।
ऊर्दरं स्यादावपने भेद्यलिङ्गं तु दुर्बले ॥ २७८ ॥

---

१. 'ल्पम्' ङ. पाठः. २. 'र्यां' क. पाठः. ३. 'ल' ख. पाठः.

---

† 'उद्बुन्नं खनकाच्छूद्रा' (पृ. ७५. श्लो. ४१) इति तु वैजयन्ती ।

ऊधस्यं तु नपि क्षीरे त्रिषु तूधोभवादिके ।
ऊरव्यस्तु द्वयोर्वैश्ये त्रिषु तूरुभवे भवेत् ॥ २७९ ॥
ऊरुजस्तु द्वयोर्वैश्य ऊरुजाते पुनस्त्रिषु ।
ऊषणो ना कटुरसे विज्ञेयास्त्रि तु तद्वति ॥ २८० ॥
क्लीबं तु मरिचे शुण्ठावूषणाख्ये च कर्मणि ।
पिप्पल्यां तूषणा स्त्री स्यादूर्णायुस्तु द्वयोः क्रिमौ ॥ २८१ ॥
मेषाख्यपशुजातौ स्यान्ना तु तल्लोमनिर्मिते ।
कम्बले क्षीणभङ्गे[1]‡ च रभसः प्रोक्तवानमुम् ॥ २८२ ॥
वेदकीर्तितगन्धर्वभेदेऽथोर्जस्वति त्रिषु ।
ऊर्जस्वत् स्त्री तु नद्यां स्यादूर्जस्वत्यथ ना भवेत् ॥ २८३ ॥
ऋषभो वृषभे कर्णरन्ध्रे नक्रस्य पुच्छके ।
स्वराणामपि सप्तानां षड्जादीनां क्वचित् स्वरे ॥ २८४ ॥
एकाहक्रतुभेदे च सामभेदेषु केषुचित् ।
अर्हत्तीर्थकराणां च कस्मिंश्चिन्मत्तहस्तिनि ॥ २८५ ॥
शृङ्गिसंज्ञे च भैषज्ये केचिच्छ्रेष्ठेऽपि मन्वते ।
अन्ये शब्दात् परः श्रेष्ठ इत्यूचू रभसः पुनः ॥ २८६ ॥
वराहपुच्छे च स्त्री तु नराकारास्त्रियां भवेत् ।
ऋषभा शूकशिम्ब्यां च रभसेन प्रकीर्तिता ॥ २८७ ॥
क्लीबे त्वृजीकं वज्रे स्यादृषिभेदे परे नरि ।
एधितं तु वने क्लीबलिङ्गमौणादिका विदुः ॥ २८८ ॥
ना स्यादृ गिरिसरिद्वाहेऽथैकाङ्गो ना बुधग्रहे ।
त्रिस्त्वेकावयवे काणे त्वेकाक्षो मेद्यलिङ्गकः ॥ २८९ ॥

---

१. 'र्यो गि' क. पाठः.

---

‡ 'ऊर्णायुनौ क्षणाभङ्गे मेषकम्बलमेषयोः' इति मेदिनी ।

द्वयोस्तु वायसे विद्यादेकाहं त्वेकवासरे ।
क्ली पुमांस्त्वेकदिवससाध्ययज्ञेषु कीर्तितः ॥ २९० ॥

ज्योतिष्टोमादिषु पुमान् पुनर्नारङ्गपादपे ।
एलकस्त्रि त्वेलितरि स्यान्मेषे **त्वेडका द्वयोः** ॥ २९१ ॥

त्रिः कुत्सितादिबधिरे नाराचे **पुनरेषणः** ।
नाराच्यां त्वेषणी स्त्री स्यात् कुस्तुम्बुर्यां तु सैषणा ॥ २९२ ॥

इच्छायां क्लीच्छतेर्हेतुव्यापारे नप्स्त्रियोर्यदा ।
एषणं चैषणा चेति स्यादथो **ए(नै१त)शः** पुमान् ॥ २९३ ॥

इन्द्रे चन्द्रे तथाध्वर्यौ द्वयोस्तु स्यात् तुरङ्गमे ।
एधतुस्तु स्त्रियां लक्ष्म्यां ना त्वमौ पुरुषेऽपि च ॥ २९४ ॥

एकदङ् ना यमे काके पुनर्द्वे त्रि तु काणके ।
ए(नै१त)शास्त्वश्मनि द्वे ना त्वमौ ब्रह्मणि होतरि ॥ २९५ ॥

ऐश्वरं क्ली चतुर्हस्तप्रमाणे भेद्यवत् पुनः ।
सम्बन्धिनीश्वरस्य स्यादोदनस्त्वस्त्रियामयम् ॥ २९६ ॥

अन्ने क्लीबं तु मेघे स्यात् काञ्जिके तु पुमानयम् ।
ओलकस्तु पुमाञ्छाके काणमारिषसंज्ञके ॥ २९७ ॥

मारिषाख्यस्य शाकस्य जातिभेदे स्त्रियां पुनः ।
ओलिका धान्यभेदे स्यान्नीवाराख्येऽथ **नप्यदः** ॥ २९८ ॥

औजसं काञ्चनेऽथ स्यादोजःसम्बन्धिनि त्रिषु ।
औरसो द्वे स्वजाते स्यात् पुत्रे ना सूक्ष्मजीरके ॥ २९९ ॥

उरःसम्बन्धिनि त्रिः स्यादौरभ्रस्तु पुमानयम् ।
कम्बले मेषरोमोत्थे मेषसम्बन्धिनि त्रिषु ॥ ३०० ॥

कल्याणं तूत्सवे क्लीबं मङ्गलेऽक्षयरुक्मयोः ।
हलायुधः स्वर्णपत्रे पठत्यनतिसूक्ष्मदृक् ॥ ३०१ ॥

---

१. 'क' क. ख. ङ. पाठः. २. 'नशा तु शुनि' ख, 'कशास्तु शुनि' ङ, 'कशास्तु शुनि' क. पाठः. ३. 'री' ग. पाठः. ४. 'गै' ग. पाठः.

श्रुतौ च स्त्री तु कल्याणी क्षमागिरिजयोस्त्रि तु ।
शुभयुक्ते शाश्वतस्तु वदत्यक्षयमात्रके ॥ ३०२ ॥
एतयोरर्थयोः स्त्रीत्वे यदा वृत्तिस्तदा द्वयम् ।
कल्याणा चापि कल्याणीत्यथ पुंसि चिरन्तने ॥ ३०३ ॥
क्वचिदाङ्गिरसे मर्त्ये **कलाप**स्तु पुमानयम् ।
काञ्चीतूणीसमूहेषु भूषणे बर्हिबर्हके ॥ ३०४ ॥
कलापी तु स्त्रियामेषा कणिशेऽन्यस्तु कश्चन ।
ब्रूते कणिशपूलेऽथ **कनकः** पुंसि चम्पके ॥ ३०५ ॥
नागकेसरधुर्धूरकिंशुकेषु बृहस्पतौ ।
क्लीबं तु काञ्चनेऽन्योक्तवृक्षाणां फलपुष्पयोः ॥ ३०६ ॥
कपिलस्त्वृषिभेदेऽग्नौ ना कडाराख्यवर्णके ।
तुरुष्काख्ये च निर्यासे बभ्रुवर्णे ककुभ्यति ॥ ३०७ ॥
कडारवर्णयुक्ते तु त्रि स्त्री तु कपिला द्रुमे ।
शिंशपासंज्ञके बभ्रुवर्णायां सुरभावपि ॥ ३०८ ॥
ब्रह्मरीतिसमाख्ये च लोहभेदे जलौकसाम् ।
जातिभेदे द्वादशानां तस्योक्तं लक्षणं यथा ॥ ३०९ ॥
मनःशिलारञ्जिताभ्यां पार्श्वाभ्यामिव लक्षिता ।
पृष्ठे स्निग्धा मुद्गवर्णेत्यग्निदिग्वासिहस्तिनः ॥ ३१० ॥
करिण्यां विद्युति तथा हरेण्वाख्ये च भेषजे ।
द्वयोस्तु शुनि ना तु स्यात् **कपिशः** श्यावसंज्ञके ॥ ३११ ॥
वर्णे तद्वति तु त्रिः क्लीबे मद्यासव इति श्रुते ।
मद्यभेदेऽथ **कलशः** कुम्भे लिङ्गद्वयान्वितः ॥ ३१२ ॥
स्थाल्यां तु दधिमन्थन्यां कलशी स्त्रीति केचन ।
द्रोणाख्यपरिमाणे तु पुमानथ **करीर**वाक् ॥ ३१३ ॥

'दत्ते' ङ, 'मत्ते' क. पाठः, २. 'र्ण' क. ग. ङ. पाठः, ३. 'त' क. ख. ङ. पाठः, ४. I. पाठः,

वंशाङ्कुरे घटे चापि कुकराख्ये च पादपे ।
करीरी तु स्त्रियां हस्तिदन्तमूलेऽथ भेद्यवत् ॥ ३१४ ॥

करिणः प्रेरयितरि करकस्तु पुमानयम् ।
कमण्डलौ च कर्कर्यां शण्डे त्वप्याह कश्चन ॥ ३१५ ॥

करङ्के तु पुमानाम्रे दाडिमेऽप्येतयोस्तु नप् ।
फले स्त्रीपुंसयोस्तु स्यात् करका जलदोपले ॥ ३१६ ॥

द्वयोस्तु पक्षिभेदे स्यादित्याह रभसः कविः ।
कटकस्त्वस्त्रियां शैलनितम्बे वलयेऽपि च ॥ ३१७ ॥

सैन्ये च राजधान्यां चामरदत्तस्तु पुंस्यमुम् ।
हस्तमुष्टावभाषिष्ट स्त्रियां तु कटिका कृते ॥ ३१८ ॥

सूत्रस्यूतशलाकाभिरायुधस्य निवारणे ।
परिमण्डलसंस्थानद्रव्येऽथो कण्टकोऽस्त्रियाम् ॥ ३१९ ॥

वृक्षस्यावयवे सूचिसदृशे क्षुद्रविद्विषि ।
रोमाञ्चे वेणुवृक्षे च कण्टका तु स्त्रियामियम् ॥ ३२० ॥

कण्टकार्[1]ये कीटभेदे ह्यनुवाकस्तु कण्टि[2]का* ।
कर्कटो द्वे कुलीरे स्यात् कङ्कसंज्ञे च पक्षिणि ॥ ३२१ ॥

ना तु राशौ चतुर्थे स्यात् क्वचिच्चावयवान्तरे ।
आरोह्यायाँ[3]स्तुलार्यां[4]ः स्यात् कर्कशस्तु त्रिषु स्मृतः ॥ ३२२ ॥

कठिने प्रखरस्पर्शे निर्दये साहसप्रिये ।
ना तु खड्गे तथान्ये च काम्पि[5]ल्याख्यमहीरुहे ॥ ३२३ ॥

पटोलसंज्ञवल्लयां च स्यादिक्षौ चाथ कर्कशी ।
स्त्रियां स्याद् बदरीभेदे नरकोलीति विश्रुते ॥ ३२४ ॥

कर्करस्तु पुमानस्त्रि पाषाणे दर्पणेऽपि च ।
दृढे तु भेद्यलिङ्गः स्यादित्याहुरथ कर्करी ॥ ३२५ ॥

---

१. 'ख्य' ग. पाठः. २. 'ण्ट' ग. पाठः. ३. 'यां तु' क. ग. पाठः. ४. 'यां' क. ग. ङ. पाठः. ५. 'म्बि' ग. पाठः.

---

* कोशान्तरेष्वनुवाकवाची 'कण्डिका' इति ङमध्या दृश्यते ।

स्त्रियां स्यात् करकेऽथ क्लीं **कङ्कणं** करभूषणे ।
तथा भूषणमात्रे च सूत्रे त्वजय उक्तवान् ॥ ३२६ ॥

कङ्कणी तु स्त्रियां क्षुद्रघण्टायामथ **कङ्कतः** ।
केशमार्जनकद्रव्ये त्रयी द्वे काकजातिषु ॥ ३२७ ॥

चतसृष्वेकजातौ स्यात् **कमलं** तु नपुंसकम् ।
पद्मे रक्ताम्बुजे तोये स्थौणेये छुरिकादिनः ॥ ३२८ ॥

हेमाद्यैश्चित्रिते चर्मण्यथ स्त्री कमला श्रियाम् ।
मृगे तु द्वे **कश्मलं** तु क्लीबं मोहपुरीषयोः ॥ ३२९ ॥

मलीमसे तु त्रिः क्लीं तु **कललं** चर्मकोशके ।
अस्थन्यप्यथ न स्त्री स्याद् रेतसो गर्भतां यतः ॥ ३३० ॥

स्यादवस्थान्तरे सिंहवैजयन्त्यौ तु पेठतुः ।
उल्बेऽथ ताम्रकलशे किट्टे लोहमलेऽपि च ॥ ३३१ ॥

कालिलं तु नपि ज्ञेयं समूहे कायपापयोः ।
गाम्भीर्ये सङ्गतेऽप्यात्माधिष्ठिते शुक्रशोणिते ॥ ३३२ ॥

गहने तु त्रिषु ज्ञेयं **कलुषं** तु नपि ह्रदे ।
सूक्ष्मैलायां तु कलुषी स्त्री त्रिषु त्वाविलद्रवे ॥ ३३३ ॥

महिषे तु द्वयोर्ना तु कृष्णे वर्णेऽन्यैकीर्तितः ।
तद्युक्ते भेद्यवदथो **कल्माषः** कृष्णपाण्डरे ॥ ३३४ ॥

ना मिश्रवर्णेऽन्यैस्त्वाहुश्चित्रवर्णेऽथ भेद्यवत् ।
वर्णयोरेतयोरेकवर्णयुक्ते नपि त्वदः ॥ ३३५ ॥

आरण्यके सामभेदे 'कया नश्चित्र' इत्यृचि ।
सर्पसामाह्वये गीते **कालिङ्गस्तु** नृपान्तरे ॥ ३३६ ॥

नापत्येषु बहुष्वस्य भूम्नि चैषां च नीवृति ।
द्वे तु धूम्याटसंज्ञे स्यात् पक्षिभेदेऽथ नपुंस्त्रियोः ॥ ३३७ ॥

---

१. 'पि' ग. पाठः.

कलिङ्गा कुटजाख्यस्य फले वृक्षस्य यत् पुनः ।
दृश्यतेऽजयकोशेऽत्र कलिङ्गाख्येत्युपस्थिते[1] ॥ ३३८ ॥

तिक्तकेशर इत्येवं[2] ताच्चिन्त्यं **कदली** पुनः ।
स्त्रियां स्यात् करिणां केतौ चर्मयोनौ मृगान्तरे ॥ ३३९ ॥

तस्य लक्षणमप्युक्तं मृगज्ञैः पूर्वसूरिभिः ।
कदली तु बिले शेते मृदुरूक्षोच्चकर्बुरैः ॥ ३४० ॥

नीलाग्रै रोमभिर्युक्ता सा विंशत्यङ्गुलायता ।
इत्येवं नृस्त्रियोस्तु स्यात् कदलः कदलीति च ॥ ३४१ ॥

रम्भायां स्यात् त्रिलिङ्गयां तु **कन्दली** नवपल्लवे ।
झाटभेदे कच्छरूढेऽजिनयोनिमृगान्तरे ॥ ३४२ ॥

तस्य लक्षणमप्युक्तं मृगज्ञैः पूर्वसूरिभिः ।
कन्दली तु श्यामवर्णा हस्तायामा महोदरी ॥ ३४३ ॥

इत्येवं रभसस्त्वाह तं कलापोपरागयोः ।
स्त्रियां तु **क्षणिका** ज्ञेया विद्युति क्षणवत्तु यत् ॥ ३४४ ॥

तत्र त्रिः क्षणमात्रावस्थायिवस्तुनि चाथ सः ।
राजन्ये **क्षत्रिया** द्वे स्यात् तत्र योनियुते यदा ॥ ३४५ ॥

अर्थे वृत्तिस्तदा द्वे स्तः क्षत्रिया क्षत्रियाण्यपि ।
पुंयोगात् तु स्त्रियां वृत्तौ क्षत्रियीत्यथ न स्त्रियाम् ॥ ३४६ ॥

कषायस्तुवराभिख्यरसे क्वाथरसे तथा ।
निर्यासे सौरभे च स्यादनुरागाङ्गरागयोः ॥ ३४७ ॥

रागद्रव्ये **रक्त**वर्णे रक्तपीतद्वयात्मके ।
मिश्रवर्णे तथा क्रोधलोभादौ भेद्यवत् पुनः ॥ ३४८ ॥

रक्तवर्णयुते[3] रक्तपीतवर्णद्वयान्विते ।
सुरभौ तुवराख्येन रसेन च समन्विते ॥ ३४९ ॥

---

१. 'प्यु' ङ. पाठः. २. 'व' क. ख. ङ. पाठः. ३. 'त्मके' क. ग. पाठः.

कपालोऽस्त्री क्वचित् स्त्री च कपालीति शिरोस्थनि ।
घटादिशकले केचित् पुनः शकलमात्रके ॥ ३९० ॥

कटाहो ना कर्णवति विशाले लोहभाजने ।
द्वीपभेदे च महिषे पुनर्द्वे अथ भेद्यवत् ॥ ३९१ ॥

करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च ।
कडारवर्णयुक्ते च करालो तु स्त्रियामियम् ॥ ३९२ ॥

अग्निजिह्वाविशेषे च दंष्ट्राभेदे च भोगिनः ।
पार्वत्यामपि ना तु स्यात् कालमाले गुणे तथा ॥ ३९३ ॥

कडार इति विख्याते चर्मकोशे तु नप्यदः ।
अविश्वास्योऽत्र रभसो वाक्यमेतदधीतवान् ॥ ३९४ ॥

कलहस्तु पुमान् खड्गकोशे भण्डन एव च ।
क्लीवं युद्धे च रागे चेत्येवं चैतदसाम्प्रतम् ॥ ३९५ ॥

कडारं तु जले क्लीवं रूक्षताशूलयोस्तु ना ।
तथा कपिलवर्णे च तद्युक्ते त्वभिधेयवत् ॥ ३९६ ॥

विषमीभूतदशने निःसारेऽपि द्वयोः पुनः ।
आचष्टे रभसो दासे शब्दवेद्यथ नप्यदः ॥ ३९७ ॥

कण्डारं रक्तपद्मे स्याद् वर्णभेदे तु पुंस्ययम् ।
सितकाचरमिश्रे स्यात् त्रिस्तु तद्वति कः पुनः ॥ ३९८ ॥

काचरो वर्णभेदोऽयं कृष्णधूमलमिश्रकः ।
पुन्नपुंसकयोस्तु स्यात् सन्नाहे **कवचं** तथा ॥ ३९९ ॥

रभसस्त्वाह पटहे नान्दीवृक्षे च पुंस्यमुम् ।
कर्मारस्तु पुमान् वेणावयस्कारे द्वयोरथ ॥ ३६० ॥

कज्जारो ना गृहे गूढे मणौ कथ्यिदथ त्रिषु ।
अशोभनेऽथ **कवटं** क्लीवमुच्छिष्टमिस्सयोः ॥ ३६१ ॥

---

१. 'द्वा' ग. पाठः .

मर्त्यजात्यन्तरे तु द्वे पुल्कसीशूद्रसम्भवे ।
ऋकरस्तु करीरद्रौ दीनऋकचयोश्च ना ॥ ३६२ ॥

द्वयोस्तु पक्षिभेदे स्यादेतद्रभसभाषितम् ।
करटस्तु पुमान् विल्वे गजगण्डेऽप्यथाब्रवीत् ॥ ३६३ ॥

रभसोऽसुं नवश्राद्धे शब्दवेदी द्वयोः पुनः ।
काके दुर्दुरुटे तु त्रिः कुङ्कुमे तु नपुंसकम् ॥ ३६४ ॥

करटा तु स्त्रियां दुःखदोह्यायां गवि नप् पुनः ।
करोटं वस्त्रकोशे च कपाले शिरसस्तथा ॥ ३६५ ॥

द्वे तु भृत्ये घनाम्लायां श्वागुल्यां स्यात् करोटिका ।
कर्पट[1] ो ना वर्णभेदे त्रिस्तु तद्वत्यथ द्वयोः ॥ ३६६ ॥

कितवेऽथ **कपोत**[2] ो ना वर्णभेदे त्रि तद्वति ।
द्वे तु पारावताभिख्यखगेऽन्यस्मिन्नपि क्वचित् ॥ ३६७ ॥

गृहप्रवेशनायोग्ये पक्षिभेदेऽथ **कर्पर**ः ।
पुमान् घटादिशकले कपालाख्ये शिरोस्थनि ॥ ३६८ ॥

कटाहे शस्त्रभेदे च वृक्षस्यावयवान्तरे ।
रसाञ्जने तु स्त्रीलिङ्गा कर्परीति विदुर्बुधाः ॥ ३६९ ॥

कर्पूरोऽस्त्री चन्द्रसंज्ञगन्धद्रव्ये स्त्रियां पुनः ।
कर्पूरी नागवल्ल्याख्यवल्लीभेदेऽथ **कर्बुर**म् ॥ ३७० ॥

क्लीबं स्वर्णे हरिच्छुक्लमिश्रवर्णे तु पुंस्ययम् ।
सिंहस्तु चित्र इत्याह त्रि तु वर्णसमन्विते ॥ ३७१ ॥

तद्वर्णयुक्तसुरभौ पुनः स्त्री कर्बुरा तथा ।
जलौकाजातिभेदे च सविषे तस्य लक्षणम् ॥ ३७२ ॥

या छिन्नोन्नतकुक्षिः स्याद् वर्मिमत्स्यवदायता ।
सविषा कबुरी नामेत्यथ स्यात् कच्छुरास्त्रिषु ॥ ३७३ ॥

---

१. 'वा' क. ङ. पाठः. २. 'पि' क. पाठः.

पामाभिः संयुते जन्तौ कच्छुरा तु स्त्रियामियम् ।
शत्रावप्यात्मगुप्तायां यवासे कण्डुरस्तु ना ॥ ३७४ ॥

सूरणेऽथात्मगुप्तायां कण्डुरा स्त्री नृभूम्नि तु ।
कम्बोजा देशभेदे स्यान्ना तु स्यात् तस्य राजनि ॥ ३७५ ॥

द्वयोस्तु तदपत्ये स्याद् गजभेदे च ना पुनः ।
शङ्खेऽपि रभसेनोक्तः **कपर्दस्तु** पुमानयम् ॥ ३७६ ॥

महादेवजटाजूटे जटाजूट इतीतरे ।
जलजन्तुविशेषे तु वराटाख्ये द्वयोरथ ॥ ३७७ ॥

क्रमुको ना पूगवृक्षे पट्टिकाख्ये च पादपे ।
ब्रह्मदारुसमाख्ये च भद्रमुस्ते च नप् पुनः ॥ ३७८ ॥

एषां प्रसूने **क्रमणं** पुनर्विद्यान्नपुंसकम् ।
पादे क्रान्ते तथा द्वे तु तुरङ्गे **कन्दरा** पुनः ॥ ३७९ ॥

त्रयी गिरेरवयवे दरीसंज्ञे द्वयोः पुनः ।
स्यादुच्चजानुके भेदे मृगजातेरथो पुमान् ॥ ३८० ॥

कन्धरो वारिदे ग्रीवासिरयोस्तु स्त्रियामियम् ।
कन्धरा कथिता सद्भिः पुन्नपुंसकयोः पुनः ॥ ३८१ ॥

क्षुद्रग्रामे द्रोणमुखसंज्ञे **कर्वट** इत्ययम् ।
देशसन्धिषु संस्त्यायो यस्तास्मिन्निति शाकटः ॥ ३८२ ॥

कर्वरो नाञ्जलौ देशे पापे च रभसोऽब्रवीत् ।
द्वयोस्तु रक्षसि व्याघ्रे क्लीबं तु जलकर्मणोः ॥ ३८३ ॥

सतृणाभ्यवहारी तु रभसः शबले त्रिषु ।
कर्वरी तु स्त्रियां भूमौ शिवायां चाथ **कच्छपः** ॥ ३८४ ॥

द्वे कूर्मे निधिभेदे तु पुंसि स्यात् स्त्री तु कच्छपी ।
वीणायां स्यात् सरस्वत्या ऋषिभेदे तु **कश्यपः** ॥ ३८५ ॥

---

१ 'व' ग. पाठः.

ना द्वे तु कच्छपे त्रिस्तु मद्यपे **कम्बलस्तु** ना ।
कस्मिंश्चित् पार्वतीभक्ते रभसस्तूक्तवानमुम् ॥ ३८६ ॥

उत्तरासङ्गमात्रे च साम्नायां च गवामथ ।
रभसः सलिले क्लीबं रलके तु त्रिलिङ्गकम् ॥ ३८७ ॥

कम्बली स्त्री तु विज्ञेया सज्जनायां च हस्तिनः ।
कल्पना क्ली तु क्लप्तौ स्याच्छेदने चाथ नपुंस्त्रियोः ॥ ३८८ ॥

क्रियायां स्यात् कल्पयतेरथ स्यात् **कर्षकः** पुमान् ।
अङ्गारके कृष्टरि तु भेद्यवच्च कृषीवले ॥ ३८९ ॥

ककुदोऽस्त्री बलीवर्दस्कन्धयोर्मध्य उन्नते ।
प्रधाने राजचिह्ने च हस्तिनो मेढ्र एव च ॥ ३९० ॥

कठिनं तु कठोरे त्रिः कठिना तु स्त्रियामियम् ।
शुक्रधातुसमाख्ये स्यादित्याहुर्[1]हृदयदन्तरे ॥ ३९१ ॥

रभसो गुडशर्करे[2]त्यमुमर्थमभाषत ।
कमठः कच्छपे द्विः स्याद् वामने भेद्यलिङ्गकम् ॥ ३९२ ॥

कूर्मास्थनि तु ना क्ली तु भिक्षापात्रेऽथ **कक्खटम्** ।
कठिने त्रिः कक्खटी तु शुक्रधातुसमाख्यके ॥ ३९३ ॥

पाषाणभेदे स्त्री त्रिस्तु **कनिष्ठो**ऽल्पतमेऽनुजे ।
तथा युवतमे स्त्री तु कनिष्ठाल्पतमाङ्गुलौ ॥ ३९४ ॥

क्ली तु भूलवणे कूप्यसंज्ञेऽथ **करजः** पुमान् ।
नखे करञ्जवृक्षे च क्ली तु व्याघ्रनखाह्वये ॥ ३९५ ॥

भेषजे **कञ्चुकस्त्व**स्त्री कवचे वारवाणके ।
निर्मोके भोगिनश्चाह रभसः शब्दवित्तमः ॥ ३९६ ॥

---

१. 'हृ द्' ग. पाठः. २. 'कैं' क. ग. ङ. पाठः.

वर्धापकगृहीताङ्गस्थितवस्त्रेऽप्यभाषत ।
कर्षी[1]**कं** तु खनित्रे स्यात् क्लीबलिङ्गमथ स्त्रियाम् ॥ ३९७ ॥

मक्षिकायां कषीका स्यात् **कर्णि**[2]**का** तु वनस्पते[3]ः ।
बीजे स्त्री स्यात् तथा भिन्नतण्डुलावयवेऽत्र तु ॥ ३९८ ॥

पुंस्याहार्थे हर्षनन्दी ना त्वेव पटवासके ।
कर्णिकोऽथ **कबन्धो**[4]ऽस्त्री क्रियायुक्तेऽपमूर्धके ॥ ३९९ ॥

शरीरे सलिले चापि रक्षोभेदे तु पुंस्ययम् ।
रभसस्तूदरे राहावपि भाषितवानमुम् ॥ ४०० ॥

करण्डो ना समुद्गे स्यात् पुटीसंज्ञे तु भाजने ।
स्त्री करण्डी द्वयोस्तु स्यात् पक्षिभेदेऽथ ना स्मृतः ॥ ४०१ ॥

कडम्बो[5] व्यञ्जनीभूतशाकनाले द्रुमान्तरे ।
क्लीं तु तत्प्रसवेऽथो ना **कलम्बः** शाकनालके ॥ ४०२ ॥

बाणे चाथ कलम्बोऽस्त्री शतपर्व[6]समाख्यके ।
स्तम्बे[7] शाके **कदम्ब**[8]स्तु सर्षपे ना च नीपके ॥ ४०३ ॥

क्लीबं तु प्रसवे तस्य समूहे चाथ ना स्मृतः ।
करम्बः[9] सेकमिश्रान्ने मिश्रमात्रे तु भेद्यवत् ॥ ४०४ ॥

केचित् तु पुष्पे क्लीत्याहुः **कबर**स्तु नृलिङ्गकः ।
लवणऽ(म्ले)*च रसयोर्भेदालिङ्गस्तु तद्वतोः ॥ ४०५ ॥

केशविन्यासभेदे तु कबरी स्त्री तथैव सा ।
बाष्पिकासंज्ञभैषज्ये शोकेऽपि रभसोऽपठीत् ॥ ४०६ ॥

---

१. 'षि' ख. ङ. पाठः. २. 'र्णा' क. ख. घ. पाठः. ३. 'तौ' ग. पाठः. ४. 'र्वो' क. ख. ङ. पाठः. ५. 'म्बेऽशोके' ग. पाठः. ६. 'ट' ग. पाठः. ७. 'द' ग. पाठः. ८. 'णे चरयो' क., 'णे वारसौधरयो' ख., 'णे चारसरयो' ङ. पाठः.

---

* 'कबरं लवणाम्लयोः' इति मेदिनी ।

व्याकीर्णमाल्यकबरां कबरीमिति सत्कवेः ।
वाक्ये कबरशब्दस्य चिन्त्योऽर्थोऽथ करम्भवाक् ॥ ४०७ ॥

पुंसि स्याद् दधिमिश्रेषु सक्तुषु स्त्री पुनर्भवेत् ।
करम्भी पात्रभेदेऽथ **करभो** गर्दभे द्वयोः ॥ ४०८ ॥

उष्ट्रस्य च शिशौ पाणेर्मणिबन्धकनिष्ठयोः ।
मध्ये स्यात् **कर्तनं** तु क्ली छेदने सूत्रसर्जने ॥ ४०९ ॥

अश्वस्य धूलिलुठने कर्तनी तु स्त्रियामियम् ।
नापितस्योपकरणे क(तृ? त्रि)*काख्येऽथ नपुंस्त्रियोः ॥ ४१० ॥

कर्तना कर्तयत्यर्थे स्यादर्थेऽदं[1] नपुंसकम् ।
करणं कारणे काये साधने कर्मणीन्द्रिये ॥ ४११ ॥

क्षेत्रेऽपि साधकतमे नाट्यगीतिप्रभेदयोः ।
रतेबन्धे[2] तथा ज्योतिःशास्त्रज्ञानां च कुत्रचित् ॥ ४१२ ॥

ग्रहवारेक्षणोपायप्रभेदे च निरूप्यताम् ।
स्पृष्टाद्युच्चारणाभेदे योगिपद्मासनादिषु ॥ ४१३ ॥

मर्त्यजात्यन्तरे तु द्वे शूद्रायां वैश्यसम्भवे ।
करुणा तु स्त्रियां चित्तवृत्तौ क्लिष्टेषु जन्तुषु ॥ ४१४ ॥

धार्मिकस्य त्रिषु पुनः करुणाविषये तथा ।
सरूपे[3] चाथ वदति हर्षनन्दी नपुंसकम् ॥ ४१५ ॥

दैन्ये करुणमित्येतन्ना[4] तु च्छागाख्यपादपे ।
कर्मण्या तु भृतौ स्त्री स्यात् कर्मसाधौ तु भेद्यवत् ॥ ४१६ ॥

सम्पादिनि च विज्ञेयं कर्मणा स्यान्मनीषिभिः ।
कट्वङ्गस्तु द्रुमे दुण्डुसंज्ञे[4] ना द्वे खगान्तरे ॥ ४१७ ॥

---

१. 'यैतन्न' क. ख. ङ. पाठः. २. 'य' क. ख. ग. पाठः. ३. 'स्व' ङः च. पाठ ४. 'दु' ङ. पाठः.

---

* 'क्षुरोऽस्य वपनं शस्त्रं कर्त्रिका कर्तनी क्षुरी' (पृ. १३८. श्लो. २६) इति वैजयन्ती

कस्वरं तु धने क्लीबं त्रिः स्यात् कसनशीलके।
कथेरः[3] शकुनौ द्वे त्रिः कथके कुहकेऽपि च ॥ ४१८ ॥

कणीचिः स्त्री लतायां स्यान्मनस्यपि धनञ्जयः।
अन्ये तु केचिद् भाषन्ते तुरङ्गे स्याद् द्वयोरिति ॥ ४१९ ॥

करेणुभ्यां स्त्री नेभे कर्णिकारद्रुमेऽपि च।
काशिपुस्त्वस्त्रियामत्नवस्त्रयोः[1]तद्वयेऽपि च ॥ ४२० ॥

कुथे च वैजयन्ती तु शय्यायामिति भाषते।
कठारस्तु द्वयोर्ज्ञेयः खड्गे शिल्पिनि चाप्यथ ॥ ४२१ ॥

कर्करुः पुंसि कृशाण्डे कालिङ्गे चानयोः पुनः।
क्लीबं स्यात् प्रसवेऽथ स्यात् **कर्कन्धूः** पुंस्त्रियोरपि ॥ ४२२ ॥

बदर्यां क्रोष्टुबदर्यां व्रणविष्टम्भयोरपि।
स्त्री तु मध्वाज्यसंसिक्तयवलाजजतर्पणे ॥ ४२३ ॥

रथादीनां युगे चाथ **कफेलूः** पुंसि पादपे।
श्लेष्मातकसमाख्येऽथच्छादिषेयतृणे स्त्रियाम् ॥ ४२४ ॥

कशेरुः[3] स्त्रीनपोः पृष्ठस्यास्थनि क्लीबकं पुनः।
स्तम्बेरभेदे सजलपङ्करूढे कशेरवथ ॥ ४२५ ॥

वैशावेश्याकर्णिकारे कशेरू रभसः स्त्रियाम्।
कटम्भूर्ना महादेवे स्त्री तु खेलगतौ स्मृता ॥ ४२६ ॥

ककुद्मान् वृषभे पुंसि पण्डसंज्ञे च गोपतौ।
ककुद्मती तु श्रोण्यां स्त्री **कण्टकी** तु पुमानयम् ॥ ४२७ ॥

अरिमेदाख्यवृक्षे च वृक्षे च मदनाह्वये।
त्रि तु कण्टकसंयुक्ते **कञ्चुकी** तु द्वयोरहौ ॥ ४२८ ॥

सौविदल्ले तु ना त्रिस्तु कञ्चुकेन समन्विते।
कलापी ना महादेवे पर्कट्याख्ये च पादपे ॥ ४२९ ॥

---

१. 'थ' ङ. पाठः. २. 'श्च द्वयोऽपि' ग. पाठः. ३. 'रू' क. पाठः. ४. 'म्भ-भेदे च स' ग. पाठः. ५. 'वे' ग. पाठः. ६. 'भ' क. ङ. पाठः.

ज्ञेयश्च पर्कटी प्लक्षो द्वे मयूरे स्त्रियां पुनः ।
कलापिनी स्यात् पार्वत्यां कलापवति तु त्रिषु ॥ ४३० ॥

ककुदी तु पुमान् षण्डसंज्ञके गोपतौ त्रि तु ।
ककुदेन समायुक्ते **काञ्चनं** तु नपुंसकम् ॥ ४३१ ॥

हेम्न्यब्जकेसरे ना तु धुर्धूरे नागकेसरे ।
उदुम्बरे च रभसो हरिद्रायां तु काञ्चनी ॥ ४३२ ॥

ब्रह्मरीतिसमाख्ये च लोहभेदेऽस्त्रियामथ ।
विषप्रभेदे **काकोलः** पुन्नपुंसकयोः स्मृतः ॥ ४३३ ॥

द्वयोस्तु कृष्णकाके स्यात् काकोलीति स्त्रियामियम् ।
वयस्यासंज्ञके वल्लीजातिभेदेऽथ **काहला** ॥ ४३४ ॥

स्त्री वाद्यभेदे सुषिरे रथ्यावादे* तु नप्यदः ।
त्रि तु निष्ठुरवाक्ये स्यादाकुले चाथ न स्त्रियाम् ॥ ४३५ ॥

कान्तारः स्यान्महारण्ये दुर्गमार्गे च तं पुनः ।
रभसो वनमात्रे च प्रोक्तवानथ पुंस्ययम् ॥ ४३६ ॥

इक्षुभेदेऽथ **कादम्बः** कलहंसे द्वयोरयम् ।
कदम्बसम्बन्धिनि तु त्रिषु[1] स्यान्मार्गणे तु ना ॥ ४३७ ॥

काम्बोजी तु स्त्रियां माषपर्णीति प्रथितौषधौ ।
ना तु पुन्नागवृक्षे च वलक्षखदिरे तथा ॥ ४३८ ॥

तद्देशसम्भवे तु स्याद् द्वयोरेष तुरङ्गमे ।
क्लीबं तु **कारणं** हेतौ रभसस्त्वभिधानवित् ॥ ४३९ ॥

करणेऽपि पठत्येनं[3] स्त्रीनपोस्त्वपि कारणा ।
क्रियायां स्यात् कारयतेर्घाते चेत्यजयोऽब्रवीत् ॥ ४४० ॥

---

१. 'द्वे' ग. पाठः. २. 'तु' क. पाठः. ३. 'नत्' ख., 'तत्' ग. पाठः.

---

* 'रथ्यावादे तु कोहलम्' (पु. ३३. श्लो. २७) इति तु वैजयन्ती ।

कारणा तु स्त्रियां तीव्रवेदनायामथो नपि ।
कार्मुकं स्याद् धनुर्मात्रे धनुर्भेदे च ना पुनः ॥ ४४१ ॥
वेणौ त्रिस्तु प्रभवति कर्मणे तत्र वस्तु यत् ।
कावृकः कृकवाकौ द्वे पीतमस्तकौकोकयोः ॥ ४४२ ॥
त्रि तु स्याद् रभसेनोक्तः **कार्यणः** कर्मकारके ।
मन्त्रादियोजने[3] तु क्ली मूलकर्मेति तद् विदुः ॥ ४४३ ॥
कार्मिकस्तु भवेद् राज्ञां शुल्काध्यक्षेऽधिकारिणि त्रिषु ।
कर्मणां तु समूहे क्ली कातरत्वाभिधायवत् ॥ ४४४ ॥
भीरौ स्यात् पण्डके त्वेष पुमान् स्याद् भेद्यवत् पुनः ।
कालेयैः कालसम्बन्धिन्यर्थे सर्वत्र नप् पुनः ॥ ४४५ ॥
कलिना साक्षि दृष्टे स्याद् कलीनां च कदम्बके ।
रागद्रव्ये जापकाख्ये दार्व्यां त्वेव पुमानयम् ॥ ४४६ ॥
दार्वी दारुहरिद्रोक्ता **काकाण्डस्तु** पुमानयम् ।
कृष्णशिम्बौ नपि त्वेतत् काकस्याण्डे पुमान् पुनः ॥ ४४७ ॥
क्षालनोऽस्त्रिके षष्ठे यस्य यूपस्य सप्त च ।
दश चारत्नयो मानं तस्य स्त्रीशण्डयोः पुनः ॥ ४४८ ॥
प्रक्षालनेऽथ **कामाङ्गं** चूतवृक्षे पुमानयम् ।
कामस्य पुनरङ्गे क्ली **काश्यपस्तु** पुमानयम् ॥ ४४९ ॥
ऋषिभेदे च चन्द्रे च स्यादिक्ष्वाकोः कुलस्य यः ।
द्वितीयो नृपतिस्तत्र मरीचितनये स्मृतः ॥ ४५० ॥
काश्यपस्य तु पुत्रे द्वे काश्यपीति स्त्रियां भुवि ।
क्ली तु मांसेऽथ **काण्डीरस्त्रिषु** काण्डवति स्मृतः ॥ ४५१ ॥
पुमांस्तु हस्तिपिप्पल्यां **क्षारकस्तु** नृशण्डयोः ।
पक्षिमत्स्यादिपिटके तथा स्यात् पुष्पजालके ॥ ४५२ ॥

---

१. 'का' ख. ङ. पाठः. २. 'का' ख. पाठः. ३. 'के तु त्रि मू' ग. पाठः. ४. 'यं' ग. पाठः.

क्षरितृक्षारयित्रोस्तु भेद्यवत् **कासिका** पुनः ।
स्त्री वनस्पतिभेदेऽन्ये छेदनद्रव्य ऊचिरे ॥ ४५३ ॥

त्रिस्तु कासयितर्येष कासकः कसितर्यपि ।
काचिकस्तु पुमाञ्ज्ञेयः कमुण्डे द्वे तु मूषिके ॥ ४५४ ॥

काकली तु कले सूक्ष्मे शब्दे स्त्री काकलं पुनः ।
ग्रीवाया उन्नते देशे क्ली कण्ठमणिसंज्ञके ॥ ४५५ ॥

कारुजस्तु पुमाञ्ज्ञेयो वल्मीके कलहे तथा ।
चित्रे चित्रकराणां च त्रिः पुनः कारुसम्भवे ॥ ४५६ ॥

काश्मीरी कृष्णवर्णायां वचायां स्यात् स्त्रियामियम् ।
क्ली तु पुष्करमूलाख्यभेषजे कुङ्कुमेऽपि च ॥ ४५७ ॥

त्रिः कश्मीरनिवासे च कश्मीराभिजनेऽपि च ।
काणकस्त्रिषु हिंस्रे स्यात् क्लीबं त्वक्षिमले विदुः ॥ ४५८ ॥

कायस्थो लेखके त्रिः स्याच्छरीरस्थेऽप्यथ स्त्रियाम् ।
हरीतक्यामिदं चोक्तं रभसेनैव धीमता ॥ ४५९ ॥

कानीनः पुंसि कर्णे स्याद् व्यासे च रभसोऽपठीत् ।
द्वयोस्त्वपत्ये कन्याया लुब्धे त्वेष त्रिषु स्मृतः ॥ ४६० ॥

कायिका तु स्त्रियां ज्ञेया प्रदेये स्याद् दिने दिने ।
ऋणवृद्धिविशेषेऽर्थे त्रिः कायकृतकर्मणि ॥ ४६१ ॥

कारिका स्त्री यातनायां व्याख्याश्लोके कृतावपि ।
क्रियानिर्वर्तके तु क्ली कर्मादौ त्रिस्तु कर्तरि ॥ ४६२ ॥

हिंसके च स्वयं दृष्टे त्वृणवृद्ध्यन्तरे स्त्रियाम् ।
कारितापि च कारित्वे त्रिस्तु नि(र्वा?र्मा)पितेऽप्यथ ॥ ४६३ ॥

---

१. 'च' क. ख.-ग. ङ. पाठः. २. 'तद्वति' ङ. पाठः.

म(सु?रौ)* रोगविशेषे ना कामुके त्रिषु कामलः ।
कालिका तु स्त्रियां मासि मासि देयेऽधमर्णकैः ॥ ४६४ ॥
ऋणवृद्धिविशेषे स्याद् भेद्यलिङ्गं तु यस्य वै ।
कालः प्राप्तः प्रकृष्टोऽस्ति तत्र तत्र च वर्तते ॥ ४६५ ॥
यदा स्त्रियां तदा रूपं कालिकीत्यथ कालका ।
अङ्गारकसमाख्यस्य शकुनेर्योषिति स्त्रियाम् ॥ ४६६ ॥
कालिका त्विति सौराष्ट्रीसंज्ञके भेषजे भवेत् ।
प्रशान्ताग्नौ दग्धकाष्ठे मृगभेदेऽस्य लक्षणम् ॥ ४६७ ॥
कालिका त्वसिता यद्वा कपोता पिङ्गबिन्दुका ।
इत्येवमविवाह्यानां कन्यानां कन्यकान्तरे ॥ ४६८ ॥
अस्योक्तं लक्षणं कुब्जा दुर्दर्शा कालिका च सा ।
अश्वस्य दन्तरेखायां सूक्ष्मजीरक एव च ॥ ४६९ ॥
मनोविकारप्रभवकायवैवर्ण्य एव च ।
मेघजाले च चिक्रोडसंज्ञप्राण्यन्तरेऽपि च ॥ ४७० ॥
क्र(य?म)[1]देयवस्तुमूल्ये[2] काञ्चयां च रभसोऽपठीत् ।
कालकस्तु पुमान् कायविकारे पिप्पुसंज्ञके ॥ ४७१ ॥
रक्ते तु कालद्रव्येण पटादौ भेद्यलिङ्गकः ।
कोपादिना च काले स्यान्मुखादौ कलितर्यपि ॥ ४७२ ॥
तथैव कालयितरि कार्त्तिकी तु स्त्रियामियम् ।
कृत्तिकाख्यर्क्षसंयुक्तपौर्णमास्यां पुमान् पुनः ॥ ४७३ ॥

---

१. 'क्रो' च. पाठः. २. 'श' क. च. पाठः. ३. 'ले' ग. पाठः.

---

* 'कामला रोगभेदे वा ना ना मरुवसन्तयोः' इति मेदिनी । † कालिका... .....क्रमदेये वस्तुमूल्ये' इति मेदिनी, 'कालिका योगिनीभिदि.....क्रमदेयव. स्तुमूल्ये' इति हेमचन्द्रश्च ।

कार्त्तिकी यत्र मासेऽस्ति तस्मिन्नथ नृलिङ्गकः ।
किष्किन्धः शैलभेदे स्यात् किष्किन्धा तु स्त्रियामियम् ॥ ४७४ ॥
धराधरविशेषस्थगुहाभेदे पुमान् पुनः ।
किञ्जल्कः केसरे क्ली तु स्यादाकाशे च लाञ्छने ॥ ४७५ ॥
इदं धनञ्जयेनोक्तं **किरात**स्त्वभिधेयवत् ।
स्वल्पकायेऽथ रभसो भूनिम्बे पुंस्यधीतवान् ॥ ४७६ ॥
स्त्रियां चामरवाहिन्यां मर्त्यजात्यन्तरे द्वयोः ।
शबरात् पर्णशबरी निष्टचपूर्वासविष्ट यम् ॥ ४७७ ॥
तत्र द्वे तु **किराटः** स्यान्म्लेच्छे वणिजि चाप्यथ ।
किम्मीरः[1] स्यात् पुमान् रक्षोविशेषे चित्रवर्णके ॥ ४७८ ॥
त्रि तु तद्वर्णयुक्ते स्याद् विष्ठायां तु नपुंसकम् ।
किल्बिषं क्ली पापरुजोर्वेश्यायां किल्बिषी स्त्रियाम् ॥ ४७९ ॥
कितवः पुंसि धुर्धूरे क्ली तु तत्प्रसवे त्रि तु ।
द्यूतकारेऽथ रभसो मत्तवञ्चकयोरपि ॥ ४८० ॥
क्लीबलिङ्गं तु विज्ञेयं **क्रिमिजं** गन्धवस्तुनि ।
अगुर्वाख्ये क्रिमेस्तु स्याज्जाते त्रि **क्रिमिरस्तु** ना ॥ ४८१ ॥
सितलोहितसम्मिश्रवर्णे तद्वति तु त्रिषु ।
ज्ञेया तु क्रिमिरा स्त्रीत्वे मृगभेदे बिलेशये ॥ ४८२ ॥
क्रिमिघ्नो ना विडङ्गाख्यभेषजे त्रि तु हन्तरि ।
अमनुष्ये क्रिमेः स्त्री तु **किन्नरी** पिङ्गलाह्वये ॥ ४८३ ॥
पक्षिभेदे तथा वीणाभेदे चण्डालवल्लकी ।
इति ख्याते **किंशुकस्तु** पलाशाख्यमहीरुहे ॥ ४८४ ॥
इक्षुदाह्वयवृक्षे च तयोस्तु प्रसवे नपि ।
क्षिपण्युस्तु पुमान् वायावायुधेऽर्थवसन्तयोः ॥ ४८५ ॥

---

१. 'किमीरः' क. ङ., 'किंशारः' च. पाठः.

स्त्री विद्युति **किरीटी** तु नार्जुने त्रिः समौलिके ।
कीनाशोऽग्नौ यमे पीतहरिते मिश्रवर्णके ॥ ४८६ ॥

पीतप्रधाने[1] पुंसि स्याद् राक्षसे तु द्वयोस्त्रि तु ।
कदर्यानार्यभृतककृतघ्नेषु कृषीवले ॥ ४८७ ॥

पूर्वोक्तवर्णवद्द्रव्येऽप्यामामांसाशकेऽप्यथ ।
क्ली करञ्जफलस्यैकबीजे मधुरभेषजे ॥ ४८८ ॥

क्लीतकं क्लीतकी तु स्त्री नीलिसंज्ञौषधौ स्मृता ।
कीचको ना वेणुभेदे यो ध्वनत्यनिलोद्धुतः ॥ ४८९ ॥

स्याले विराटराजस्य महाभारतविश्रुते ।
क्ली तु कीचकवृक्षस्य प्रसवे **क्षीरिकः** पुनः ॥ ४९० ॥

राजिलेह्यसर्पे द्वे क्षीरिका तु स्त्रियामियम् ।
दुग्धिकासंज्ञकस्तम्बे फलाध्यक्षाख्यपादपे ॥ ४९१ ॥

क्षीराशस्तु द्वयोर्हंसे क्षीरस्य त्वाशके त्रिषु ।
कीकसं त्वस्थनि क्लीबं क्रिमिषु त्वणुषु द्वयोः ॥ ४९२ ॥

कीकटस्तु द्वयोरश्वे भेद्यवत् तु मितम्पचे ।
नीवृद्भेदे त्वनार्याणां निवासे पुंसि भूम्नि च ॥ ४९३ ॥

कुतपः सूर्यवह्न्योर्नो वृषभेऽप्यतिथावपि ।
भागिनेये द्वे तु विप्रे पुन्नपुंसकयोः पुनः ॥ ४९४ ॥

दर्भेऽप्यह्नोऽष्टमे भागे तिले[3] छागर्जंकम्बले[4] ।
वाद्यवादकसामग्र्यां नाट्यस्येत्याह यादवः ॥ ४९५ ॥

वाद्यविन्यास इत्याह शाश्वतः सज्जनः पुनः ।
सायमास्तरणे प्रौह[5] परे त्वास्तरणे विदुः ॥ ४९६ ॥

---

१. 'धाने तु पुं' ग. पाठः. २. 'का' ङ. पाठः. ३. 'की' ग. पाठः. ४. 'ल' ग. पाठः. ५. 'प्या' ग. पाठः.

देहल्यां चाथ **कुशलं** निपुणे त्रिः क्षमेऽपि च ।
क्षेमे मङ्गलयुक्ते च दीक्षितेऽप्यजयोऽथ नप् ॥ ४९७ ॥

पर्याप्तौ मङ्गले पूर्णे स्यात् **कुसुम्भं** तु कुङ्कुमे ।
क्ली महारजतेऽप्यस्य पुनः स्तम्बे स्त्रियामियम् ॥ ४९८ ॥

कुसुम्भी पुंसि तु प्राहुर्[1] वरधान्यान्तरे परैः[2] ।
कमण्डलौ च **कुसुमस्त्वस्त्री** स्त्रीपुष्पपुष्पयोः ॥ ४९९ ॥

नेत्ररोगविशेषे च फले च रभसोऽपठीत् ।
कुणपस्तु क्रिमौ द्वे स्यात् कुत्सिते भेद्यलिङ्गकः ॥ ५०० ॥

हंसारिकायां‡ त्वाचष्टे रभसः कुर्णपी[3] स्त्रियाम् ।
कुणपोऽस्त्री शवे क्ली तु पूयेऽथो **कुक्कुटो** द्वयोः ॥ ५०१ ॥

कृकवाकौ च भासे च मर्त्यजात्यन्तरेऽपि[4] च ।
शूद्रायां मागधाज्जाते निषादीवैश्ययोः सुते ॥ ५०२ ॥

शूद्राज्जाते निषाद्यां च सुनिषण्णाह्वये पुनः ।
शाके पुंसि द्वयोस्तु स्यात् **कुक्कुरः** शुनि नप् पुनः ॥ ५०३ ॥

स्थौणेयसंज्ञके गन्धद्रव्ये द्वे तु **कुरङ्गवाक्** ।
स्यान्महाहरिणे चापि वानरेऽप्यथ सा स्त्रियाम् ॥ ५०४ ॥

कुरङ्गी भोजपुत्र्यां स्यात् पुन्नपुंसकयोः पुनः ।
कुडुङ्गः स्यान्निकुञ्जे चच्छदिष्यप्यथ सा त्रयी ॥ ५०५ ॥

बदर्यां **कुवली** क्ली तु तत्फलेऽप्युत्पलेऽप्यथ ।
कुवेलमुत्पले क्लीबं त्रिस्तु कुत्सितवेलके ॥ ५०६ ॥

कुम्भीकः पुंसि पुन्नागवृक्षे तत्प्रसवे तु नप् ।
कुमुदस्य फलेऽप्युक्तमायुर्वेदविचक्षणैः ॥ ५०७ ॥

---

१. 'हा' क. ङ. च. पाठः. २. 'पुनः' ग. पाठः. ३. 'पिणस्रि किं' क. ङ. च. पाठः. ४. 'पिणस्रि' क. ङ. च. पाठः. ५. 'पु' क. ङ. च. पाठः.

---

‡ 'विट्सारिकायाम्' इति स्यात् । 'कुणपी पुनः । विट्शारिकायाम्' इति मेदिनी ।

कुरीरस्तु पुमान् मालाविशेषे कम्बलेऽपि च।
क्लीबं तु मैथुने पद्मे जाले च मुनिभाषितम् ॥ ९०८ ॥
रभसस्त्वाह **कुटजो** मुनौ पुंसि द्रुमान्तरे।
क्लीबलिङ्गं तु वृक्षस्य तस्य पुष्पे फलेऽपि च ॥ ९०९ ॥
कुररस्तु द्वयोरुत्क्रोशाख्यपक्षिणि सा पुनः।
कुररी स्त्री भवेन्मेष्यां **कुमुदं** तु नपुंसकम् ॥ ९१० ॥
पुंस्यप्यन्ये कैरवे स्याद् रक्ताब्जेऽप्यथ ना स्मृतः।
स्याद् दिग्गजविशेषे च कपिभेदे च विश्रुते ॥ ९११ ॥
रामायणकथायां स्त्री पुनः कट्फलसंज्ञके।
पादपे कुमुदा ब्रूते पुनर्गम्भारिकाह्वये ॥ ९१२ ॥
पादपे रभसोऽथ द्वे **कुमुखः** सूकरे त्रि तु।
कुत्सितास्ये **कुमार**स्तु स्कन्दे ना वरुणद्रुमे ॥ ९१३ ॥
अश्वानुचारके चापि युवराजे मृतावपि।
कुत्सितायां द्वयोस्तु स्याद् बाले स्त्रीपुंसयोः पुनः ॥ ९१४ ॥
जम्बुद्वीपे कुमारी तु कन्यायां स्यात् स्त्रियामसौ।
मृगजात्यन्तरे चापि हिमाभे[1] नवमालिका ॥ ९१५ ॥
इति प्रसिद्धवल्ल्यां च तरणी[2]संज्ञगुल्मके।
कुस्तुम्बुर्यो मृडान्यां च तथा जनपदान्तरे ॥ ९१६ ॥
तद्राजेऽप्यथ यस्यास्ति दुर्भारस्तत्र भेदवत्।
कुचेलस्तु त्रिषु ज्ञेयः कुवाससि नपि त्वदः ॥ ९१७ ॥
कुत्सिते वाससि स्त्री तु कुचेला स्याल्लतान्तरे।
आविद्धकर्णिपाठादिसंज्ञाभिः शास्त्रविश्रुते ॥ ९१८ ॥
कुल्माषः कुरुविन्दाख्यमणौ व्रीह्यन्तरे च ना।
यवभेदे यावकाख्ये परे तु यवपिष्टके ॥ ९१९ ॥

---

१. 'ख्ये' ग. पाठः. २. 'क' क. ङ. च. पाठः.

सूपभक्ते परेऽन्ये तु विदले क्ली तु काञ्चिके ।
कुल्माषः पक्वमुद्गादिपिण्डे ना शबलाह्वये ॥ ५२० ॥
वर्णे च त्रि तु वर्णेन शबलाख्येन संयुते ।
नागराजविशेषे तु कुहरः स्यान्नृलिङ्गकः ॥ ५२१ ॥
क्लीबलिङ्गं तु विज्ञेयं गह्वरे विवरेऽपि च ।
कुलिशस्त्वस्त्रियां वज्रे मत्स्यभेदे तु स द्वयोः ॥ ५२२ ॥
कुलालो द्वे कुम्भकारे कुलाली तु स्त्रियामियम् ।
चक्षुष्यासंज्ञभैषज्ये कुलायस्तु नृलिङ्गकः ॥ ५२३ ॥
पक्षिनीडे गृहे[1] च स्यादेकाहक्रतुभेदके ।
कुलस्य त्वायके त्रिः स्यात् कुणालस्तु पुमानयम् ॥ ५२४ ॥
कृतमाले क्ली तु पुरप्रभेदेऽथ कुकूलवाक् ।
स्यात् क्लीबं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ॥ ५२५ ॥
कुहनस्तु त्रिरीर्ष्यालौ मायाविनि च ना पुनः ।
वल्मीके चेन्द्रजाले तु वैजयन्त्यामभाषत ॥ ५२६ ॥
नपुंस्त्री तु दम्भचर्यायां दम्भशीलत्व एव च ।
कुहना क्ली तु मायायां भूषिके तु द्वयोर्भवेत् ॥ ५२७ ॥
कुलकस्तु पुमान् काकतिन्दुकाख्यमहीरुहे ।
वृक्षे कुरवकाख्ये च क्लीबं तु स्यालतान्तरे ॥ ५२८ ॥
पटोलसंज्ञे काव्यालङ्कारभेदे च तत् त्रि तु ।
संयुक्ते कुतली तु स्त्री शाकभेदे नृनप् पुनः ॥ ५२९ ॥
कुतलो भूतलेऽथ स्युः कुन्तलाः पुंसि भूम्नि च ।
मध्यदेशस्थिते नीवृद्भेदे जनपदान्तरे ॥ ५३० ॥
दक्षिणापथदेशस्थे अथ स्यात् कुन्तलः पुमान् ।
तस्य राजनि तस्यापि स्युरपत्येषु भूम्नि च ॥ ५३१ ॥

---

१. 'गं त्व' क. ङ. च. पाठः. २. 'भृगे च' ङ. पाठः. ३. 'ते' क. ङ. च. पाठः.

बहुप्वथ स्त्र्यपत्ये तु कुन्तली स्त्री पुमान् पुनः ।
केशेऽथ रभसः प्राह कालेऽपि बहुशब्दवित् ॥ ५३२ ॥
अथ स्यात् **कुटलो** गात्रकृत्यृषौ पुंसि नप् पुनः ।
विद्यादाभरणेऽथ त्रिः **कुटिलं** कुञ्चिते भवेत् ॥ ५३३ ॥
तगरे तु क्ली तगरपादिकायां स्त्रियामिति ।
रभसेनोदिताथास्त्री **कुड्मलो** मुकुलेऽथ नप् ॥ ५३४ ॥
विद्यादासनभेदेऽस्य लक्षणं च प्रचक्षते ।
वैजयन्त्यां यथा प्रोक्तमासीनस्यासनेष्वदः ॥ ५३५ ॥
नागदन्तकमूर्ध्वज्ञोर्जानुस्थौ प्रसृतौ भुजौ ।
सूचीमुखमिदं पाणितलौ चेत् संहतौ मिथः ॥ ५३६ ॥
अर्धसूची तु तौ द्वौ चेत् प्रादेशान्तरितौ* मुखात् ।
कुड्मलं मुकुलीभूतौ तौ चेदूर्ध्वमुखौ स्थितौ ॥ ५३७ ॥
इत्येवं योगशास्त्राणि समीक्ष्य कृतिनोदितम् ।
कुमुलं कुसुमे क्लीबं हिरण्ये च द्वयोः पुनः ॥ ५३८ ॥
शिशौ त्रिषु पुनः कान्ते **कुरुलस्तु** पुमानयम् ।
अलके स्त्री तु कुरुली लक्षवेधे धनुष्मताम् ॥ ५३९ ॥
कुरुमस्तु द्वयोः कारौ भाजने तु पुमानयम् ।
अथ क्ली **कुपितं** पार्ते निष्कृष्टे त्वभिधेयवत् ॥ ५४० ॥
कुत्सितं स्यात् पर्युषिते त्रिष्वृणे तु नपुंसकम् ।
कुसीदं त्वृणवृद्धौ क्ली कश्चित् तु विवृणोति तत् ॥ ५४१ ॥
ऋणवृद्ध्या जीविकायां भेद्यवत् त्वलसे तथा ।
वृद्धिजीविनि पुंयोगात् पुनर्वृत्तिः स्त्रियां यदा ॥ ५४२ ॥

---

१. 'इ' ग. पाठः. २. 'कु' क. ङ. च. पाठः. ३. 'भो' ग. पाठः. ४. 'क' ग. पाठः.

---

* 'अर्धसूची तु तौ द्वौ चेत् प्रादेशान्तरतो मुखात्' (इ. १००. श्लो.२१५) इति तु मुद्रितवैजयन्तीपाठः.

तदा स्त्रियां कुसीदायी§ कुटीरस्तु पुमानयम् ।
क्षुद्रागारे कर्कटे तु द्वे कुम्भीरस्त्वयं द्वयोः ॥ ५४३ ॥
नक्रे चोरे पुन(स्त्री?स्त्रि)स्यात् कुम्भीलस्तु पुमानयम् ।
स्यालाख्यमत्स्ये त्रिषु तु श्लोकच्छायादिहारिणि ॥ ५४४ ॥
चोरे च कुन्दुमस्तु स्यात् पुमान् पुत्रे द्वयोः पुनः ।
मार्जारे कुट्टिनी तु स्त्री शम्भल्यां कुट्टना पुनः ॥ ५४५ ॥
छेदने कुत्सने चापि न ना स्यात् कुनटी पुनः ।
स्त्रियां मनःशिलायां स्यात् कुत्सिते तु नटे द्वयोः ॥ ५४६ ॥
कुशिकस्तु क्रोष्टरि द्वे स्यादुलूकेऽप्यथो नपि ।
क्षुद्रकं फाणिताभिख्ये विकारे स्याद् गुडस्य हि ॥ ५४७ ॥
तथैव कुप्यलवणसंज्ञे स्यालवणान्तरे ।
द्वे तु क्षत्रियभेदे स्यात् क्षुरप्रस्तु पुमानयम् ॥ ५४८ ॥
अर्धचन्द्राख्यशस्त्रे स्यात् कश्चित् त्वश्वान्तरेऽभ्यधात् ।
कुञ्चिका त्वङ्कुटाभिख्ये कपाटोद्घाटयन्त्रके ॥ ५४९ ॥
तूलीसूचिकयोश्चाह रभसो भीरुभीषणे ।
साधने कुञ्चितरि तु त्रिरथो कुञ्जरा स्त्रियाम् ॥ ५५० ॥
पाटलायां च धातक्यां द्वे तु हस्तिन्यथ स्त्रियाम् ।
काञ्चनद्रौ गुलूच्यां च कुण्डली क्ली तु पाशके ॥ ५५१ ॥
अस्त्री तु कर्णवेष्टे स्यात् त्रिलिङ्ग्यां च परोऽवदत् ।
कुदालस्तु पुमान् गोदारणाख्ये खानसाधने ॥ ५५२ ॥

---

१. 'द्वयोरय' क. ङ. च. पाठः. २. 'लु' ग. पाठः. ३. 'च्छे' ग. पाठः. ४. 'ख्य' ग. पाठः. ५. 'वा' ङ. पाठः.

---

§ 'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' (४. १. ३७) इति सूत्रे 'कुसिदशब्दो ह्रस्वमध्यो, न तु दीर्घमध्यः' इति सिद्धान्तकौमुदी ।

क्लीबं तु वैजयन्त्याह कोविदारद्रुमे तु ना।
क्लीबं तु प्रसवे तस्य कुठेरस्त्वभिधेयवत् ॥ ९९३ ॥

अपेतसारे स्तम्बे तु ना कठिञ्जरसंज्ञके।
कुरण्डो द्वे झषे ना तु वृद्धिसंज्ञे रुजान्तरे ॥ ९९४ ॥

मुष्कवृक्ष्यात्मके स्तम्बप्रभेदे त्वाह यादवः।
किङ्किराताह्वयेऽमौ तु [†]कुर्फाकुर्ना द्वयोः पुनः ॥ ९९५ ॥

मर्कटे ना तु कुतनुर्धनदे त्रि तु कुत्सिता।
तनुर्यस्य भवेत् तत्र कुटरस्तु द्रुमान्तरे ॥ ९९६ ॥

वर्धकौ च द्वयोस्तु स्याच्छकुनौ भेद्यवत् पुनः।
कुमुद्वान् कुमुदप्रायदेशे स्त्री तु कुमुद्वती ॥ ९९७ ॥

कुमुदस्य भवेत् स्तम्बे कुण्डली तु द्वयोरयम्।
मयूरे चित्रलमृगे तथैव स्याद् भुजङ्गमे ॥ ९९८ ॥

पुमांस्तु वरुणे प्रोक्तस्त्रि तु कुण्डलवत्यसौ।
कृषीवले कुडुम्बी द्वे कुडुम्बवति तु त्रिषु ॥ ९९९ ॥

कूश्माण्डस्तु पुमान् विघ्नराजस्य प्रियभृत्यके।
गणभेदे शालिजातिभेदे स्त्रीपुंसयोः पुनः ॥ १००० ॥

फलवल्लीविशेषे स्यात् कूश्माण्डी क्ली तु तत्फले।
'अवतेऽहेड' इत्यादिप्वृग्विशेषेषु नप्स्त्रियोः ॥ १००१ ॥

कूबरस्त्वस्त्रियां गन्त्रीसमाख्ये स्याद् रथान्तरे।
युगन्धराख्ये तु रथावयवे स्यान्नृलिङ्गकः ॥ १००२ ॥

वीणावंशशलाकायां कृणिका स्त्री त्रिषु त्वसौ।
ज्ञेया कृणायितर्याहुः पुनः कृन्तत्र इत्यदः ॥ १००३ ॥

अन्तरिक्षे लाङ्गलाग्रे लाङ्गले चापरे विदुः।
सुवर्णस्याभिघातार्थसाधने मशके पुनः ॥ १००४ ॥

---

१. 'था' ग. पाठः. २. 'नलभे' ग. पाठः.

---

† 'कुषाकुः कपिवह्नयर्के ना' इति तु मेदिनी।

कृन्तत्रो द्वे कृत्रिमस्तु वृकधूपाह्वये पुमान् ।
तुरुष्काख्ये च निर्यासे लवणे च विडाह्वये ॥ ५६५ ॥

क्ली तु कांस्याह्वये लोहभेदे स्याद् भेद्यवत् पुनः ।
ज्ञेयः स्यात् कृतिनिर्वृत्ते कृसरस्तु पुमान् द्वये ॥ ५६६ ॥

इङ्गुदाख्ये मिश्रवर्णभेदे च त्रिस्तु[1] तद्वति ।
कशेरुसंज्ञे तु जलस्तम्बभेदे नपुंसकम् ॥ ५६७ ॥

तिलतण्डुलमाषैस्तु कृतायां कृसरा त्रयी ।
श्वागुल्यां स्यात् कृतज्ञस्तु शुनि द्वे भेद्यवत् पुनः ॥ ५६८ ॥

उपकारं विजानाति यस्तत्राथ कृपाणवाक् ।
खड्गे ना छुरिकायां तु स्त्री कृपाण्यथ यादवः ॥ ५६९ ॥

आह सौनिकशस्त्रे तां कर्तनीसंज्ञकेऽथ ना ।
कृन्तरः[2] स्याद् वृक्षभेदे मक्षिकाकार्य एव च ॥ ५७० ॥

आलोचने तु त्रिर्ना तु कृदरः* खदिरे सिते ।
केचित्तु हिंस्रे त्रिष्वाहुः कृषकस्तु पुमानयम् ॥ ५७१ ॥

कूटसंज्ञे लाङ्गलाङ्गे भेद्यवत् तु कृषीवले ।
कृषिकस्तृणजातौ ना लाङ्गले तु नपुंसकम् ॥ ५७२ ॥

केसरस्त्वस्त्रियां पुष्पकिञ्जल्केऽप्यश्वसिंहयोः ।
सटे स्यान्मातुलुङ्गाख्यफलस्यान्तर्द्रवास्पदे ॥ ५७३ ॥

सूक्ष्मकोशे पुमांस्तु स्याद् वकुले नागकेसरे ।
पुन्नागे वेङ्कटाख्ये च पर्वते केसरा पुनः ॥ ५७४ ॥

कार्पास्यां स्यात् स्त्रियां क्ली तु प्रसवेऽत्रोक्तभूरुहाम् ।
हिङ्गुन्यपि पठत्येतद् रभसः शब्दवित्तमः ॥ ५७५ ॥

---

१. 'तु' ग. ङ. पाठः. २. 'पू' ग. ङ. पाठः.

---

* 'खदिरो दन्तधावनः । सिते तु तस्मिन् कदरः' (पृ.५०.श्लो.६३) इति तु वैजयन्ती ।

केरलास्तु नृभूम्नि स्युर्दक्षिणापथवर्तिनि ।
नीवृद्भेदेऽथ तद्देशसम्भूतेषु नृषु द्वयोः ॥ ९७६ ॥

तद्राजे तु पुमाञ्ज्ञेयः केरलः[1] स्त्री तु केरली[2] ।
तद्राजन्यस्त्र्यपत्ये स्यात् तथा स्याद् भेषजान्तरे ॥ ९७७ ॥

केशवस्तु पुमान् विष्णौ पुन्नागे त्रि तु केशिनि ।
केवलस्तु त्रिरेकाकिकृत्स्नयोरवधारिते ॥ ९७८ ॥

ज्ञाने तु पूर्णे क्लीबं स्यात् केचिदन्येऽवधारणे ।
निर्णीते त्वपरेऽथ स्यात् **क्षेत्रज्ञो** निपुणे त्रिषु ॥ ९७९ ॥

क्षेत्रस्य विज्ञातरि च ना त्वात्मन्यथ सा स्त्रियाम् ।
क्षेत्रिया क्षुद्रधान्ये स्याद् गवीधुरिति विश्रुते ॥ ९८० ॥

त्रिस्तु स्याद् दुष्प्रतीकारव्याध्यादौ धान्यवप्रजे ।
निराकार्यतृणे पारदारिके यत् पुनर्विषम् ॥ ९८१ ॥

देहान्तरे सङ्क्रमय्य चिकित्स्यं तत्र ना पुनः ।
क्षेत्रिकः स्यात् तुरुष्काख्यनिर्यासे क्षेत्रिणि त्रिषु ॥ ९८२ ॥

क्षेपणं तु नपि क्षिप्ते पुन्नपुंसकयोः पुनः ।
पादाङ्गुष्ठाङ्गुलीमध्ये नौदण्डे क्षेपणी स्त्रियाम् ॥ ९८३ ॥

क्लेशकस्तु यमे नाथ क्लेष्टरि क्लेशितर्यपि ।
तथा क्लेशयितर्येनं भेद्यलिङ्गं प्रचक्षते ॥ ९८४ ॥

केदारस्त्वस्त्रियां क्षेत्रे शालिक्षेत्रे तु केचन ।
पुण्यस्थानविशेषे च रभसस्त्वालवालके ॥ ९८५ ॥

केसरी तु पुमान् सिंहे मातुलुङ्गे तुरङ्गमे ।
पुन्नागे चाप्यथो भेद्यलिङ्गः केसरवत्यसौ ॥ ९८६ ॥

---

१. 'ङ' क. ङ. च. पाठः. २. 'ङी' क. ङ. च. पाठः.

कैडर्यस्तु पुमान् निम्बे कट्फलाख्ये च पादपे ।
मदनाख्यद्रुमेऽथैषां त्रयाणां प्रसवे नपि ॥ ५८७ ॥

कैटभस्त्वसुरे पुंसि कस्मिंश्चित् स्त्री तु कैटभी ।
दुर्गादेव्यां **कैशिकं** तु क्ली केशनिकुरुम्बके ॥ ५८८ ॥

कैशिकी तु स्त्रियां वृत्तिविशेषे नृत्तकारिणाम् ।
कैतवं तु च्छले क्लीबं द्यूते चाथ निबोधत ॥ ५८९ ॥

भेद्यलिङ्गं तु कितवसम्बन्धिनि मनीषिणः ।
कैराती तु स्त्रियामूर्ध्वाधोगतौ क्षिप्तपत्त्रिणः ॥ ५९० ॥

किरातसम्बन्धिनि तु कैरातं त्रिरथ द्वयोः ।
कोकिलः पक्षिभेदे स्यान्ना तु तूलेऽथ **कोटिका** ॥ ५९१ ॥

स्त्री मण्डूके श्वेतमुखे कृष्णे त्रिः कुटितर्यसौ ।
क्रोधनो द्वे शुनि त्रिस्तु क्रोधशीले नपि क्रुधि ॥ ५९२ ॥

कोहली तु स्त्रियां ज्ञेया कूश्माण्डाख्यलतान्तरे ।
भृशं मुखरकन्यायां कूश्माण्डप्रसवे तु नप् ॥ ५९३ ॥

आवेशभाजि तु गृहसारमेये द्वयोस्तथा ।
मर्त्यजात्यन्तरेऽम्बष्ठ्यां वैश्याज्जातेऽथ **कोमलम्** ॥ ५९४ ॥

क्लीबं जले पुमान् स्वर्गे मृदुनि त्वेष भेद्यवत् ।
कोणिका तु स्त्रियां नीडे कोणितर्येष भेद्यवत् ॥ ५९५ ॥

कोरकस्त्वस्त्रियां पुष्पकलिकायां त्रिषु त्वयम् ।
शब्दकारिण्यथ क्लीबं **कोलकं** मरिचे तथा ॥ ५९६ ॥

कैक्कोले च स्त्रियां तु स्यात् कोलिका मूषिकाकृतौ ।
द्रुतद्रुमारोहशीले प्राणिभेदे द्वयोः पुनः ॥ ५९७ ॥

---

१. 'कू' ग. पाठः. २. 'क्रोधशी' क. ङ. च. पाठः. ३. 'त' ग. ङ. पाठः.

निर्विषाहिप्रभेदेऽथ **कोद्रङ्गः** स्याद् द्वयोरयम् ।
मृगे जन्तुधराभिख्ये क्षुद्रे पुंसि तु वेश्मनः ॥ ९९८ ॥

†इन्द्रकोशाख्यावयवे **कोशिका** तु स्त्रियामियम् ।
दीपाधारे मल्लिकाख्ये गिरिभेदे तु कोशकः ॥ ९९९ ॥

पुमानथ स्युः पुंभूम्नि **कोसला** नीवृदन्तरे ।
मध्यदेशस्थिते सर्ववचने त्वृषिभेदके ॥ ६०० ॥

मिश्रवर्णविशेषे च पाण्डरश्यामले त्रि तु ।
तद्युक्ते **कौशिक**स्त्विन्द्रे गुग्गुलौ ना द्वयोः पुनः ॥ ६०१ ॥

उलूके कुशिकापत्ये व्यालग्राहे च नप् पुनः ।
कौशिकं मज्जधातौ स्यात् कौशिकी तु स्त्रियामियम् ॥ ६०२ ॥

पार्वत्यां निम्नगाभेदे **कौमुदी** तु स्त्रियामियम् ।
कार्त्तिक्यां पौर्णमास्यां स्याच्चन्द्रिकायां च ना पुनः ॥ ६०३ ॥

कार्त्तिकीयुक्तमासेऽथ त्रिः स्यात् कुमुदयोगिनि ।
कौणपो नरके पुंसि राक्षसे तु द्वयोरयम् ॥ ६०४ ॥

कौक्कुटं क्लीबमायासे त्रि तु कुक्कुटयोगिनि ।
कौसला तु स्त्ययोध्यायां त्रिस्तु कोसलयोगिनि ॥ ६०५ ॥

खर्जूरो ना परूषाख्यपादपे सा पुनः स्त्रियाम् ।
तज्जातिभेदेऽल्पतरे खर्जूरे क्लीबके पुनः ॥ ६०६ ॥

रजते हरितालेऽथ च प्रसवेऽत्रोक्तभूरुहोः ।
वृश्चिकाख्ये पुनर्दीर्घकीटे द्वे रभसः पुनः ॥ ६०७ ॥

भेद्यालिङ्गं खले प्राह शब्दवित् **खदिरः** पुनः ।
गायत्रीसंज्ञके वृक्ष ऋषिभेदे द्वयोः पुनः ॥ ६०८ ॥

---

१. 'द्र' क. ग. च. पाठः.

† कोद्रङ्गस्तु तमङ्गकः । इन्द्रकोशोऽपि (पृ. १६१. श्लो. ३२) इति तु वैजयन्ती ।

दुश्चिकित्सविषे वृश्चिकान्तरे स्यात् स्त्रियां पुनः ।
नमस्कारीसमाख्यायां क्षुद्रवल्ल्यां तथैव सा ॥ ६०९ ॥

शमीफलासमाख्ये च जलशाकलतान्तरे ।
खशयस्तु द्वयोर्भेके त्रिस्तु खे शयितर्यसौ ॥ ६१० ॥

खराङ्गस्तु द्वयोर्भेके कर्कशाङ्गे तु भेद्यवत् ।
खण्डिका तु स्त्रियां प्रावृड्रात्रौ शकलिते पुनः ॥ ६११ ॥

त्रिः स्याद् विरहिते तस्य वाक्ये च स्त्री तु **खण्डना** ।
वैधव्यलक्षणोपेता या कन्या शास्त्रदर्शिता ॥ ६१२ ॥

अविवाह्यासु कन्यासु तस्यां स्त्रीशण्डयोः पुनः ।
खण्डनं खण्डना चेति धातोः खण्डयतेः कृतौ ॥ ६१३ ॥

खपुरो ना पूगवृक्षे पूगपट्टे च शाग्विनाम् ।
निर्यासे भद्रमुस्ते च रभसः प्रोक्तवानमुम् ॥ ६१४ ॥

गन्धद्रव्यविशेषे च बालसंज्ञेऽजयः पुनः ।
अत्रार्थे शण्डमाचष्टे क्ली तु पूगफले स्मृतम् ॥ ६१५ ॥

अस्त्री तु **खण्डलं** खण्डे चीरवस्त्रेऽप्यथ द्वयोः ।
खञ्जनः खञ्जरीटे क्ली पुनः खञ्जनकर्मणि ॥ ६१६ ॥

खजकस्तु पुमान् मन्थदण्डे द्वे रसपाचके ।
खजाकस्तु पुमान् मन्थदण्डे क्ली तु विहायसि ॥ ६१७ ॥

शरीरे च खजाका तु स्त्री दर्व्यामसतीस्त्रियाम् ।
खनको मूषिके द्वे स्यान्मर्त्यजात्यन्तरे तथा ॥ ६१८ ॥

राज्ञीमागधयोर्जाते त्रि तु स्यादवदारके ।
तथा स्याद् भूमिवित्तज्ञे **खनित्रं** तु नपुंसकम् ॥ ६१९ ॥

कुद्दाले स्यात् खनित्री तु दण्डभेदे तपस्विनाम् ।
विशास्त्रिकासमाख्ये स्यात् **खचितं**[२] त्वभिधेयवत् ॥ ६२० ॥

---

१. 'पावके' ग., 'वा' च. पाठः. २. 'मं' क. पाठः.

विधान्मणौ लोहविद्ध उद्धृतस्नेह एव च ।
घृतहीने तु दध्नि क्लीत्याह हर्षः स्त्रियां पुनः ॥ ६२१ ॥
ज्ञेया कृष्णविषाणायां यजमानस्य खर्जनी ।
खर्जनं तु नपि ज्ञेयं क्रियायां खर्जतेरथ ॥ ६२२ ॥
खलीनोऽस्त्री तुरङ्गाणां मुखसंयमने त्रि तु ।
छिद्राकाशादिलीने स्यात् (खः खि)दिरस्तु पुमान् भये ॥ ६२३ ॥
इन्द्रे च तस्करे तु त्रिः खिङ्गारस्तु पुमानयम् ।
किखीरके च खट्वाङ्गे क्रोष्टौ तु द्वेऽजयः पुनः ॥ ६२४ ॥
शिवाभेद इति ब्रूते रभसाद्यास्तु मन्वते ।
†खिङ्गिरो ना वारिवाहे खट्वाङ्गे च द्वयोः पुनः ॥ ६२५ ॥
शिवाभेदे खिङ्गिरा तु बन्धहृत्त्वे स्त्रियामिति ।
*खुण्डकस्तु पुमान् ह्रस्वनालिकेर इतीरितम् ॥ ६२६ ॥
वैजयन्त्यां त्रि तु ह्रस्वमात्रेऽल्पेऽन्येऽथ खेचरः ।
विद्याधरे दुश्चिकित्सविषे द्वे वृश्चिकान्तरे ॥ ६२७ ॥
पक्षयुक्ते त्रिषु पुनर्व्योमचारिण्यथो नपि ।
खेटकं फलके ग्रामधा(ने ?न्ये)¶ त्वन्ये त्रिषु त्वदः ॥ ६२८ ॥
उच्चासके खोलकस्तु पूगकोशशिरस्त्रयोः ।
वल्मीके पाकभेदे च पुमान् स्यात् खोलिका पुनः ॥ ६२९ ॥
§गीतसंत्यां च काञ्च्यां च स्त्रीत्येवमजयोऽपठीत् ।
बहुवेदी गभीरं तु त्रिर्निम्ने वाचि तु स्त्रियाम् ॥ ६३० ॥

---

१. 'रा' ग. पाठः. २. 'कि' क. ग. पाठः. ३. 'प' ङ. पाठः. ४. 'भेदे ख' क. च. पाठः. ५. 'कि' ग. पाठः. ६. 'लभृत्से स्त्रि' ङ. पाठः. ७. 'भृ' क. च. पाठः. ८. 'ल' क. च. पाठः. ९. 'स्त्र' ग. पाठः. १०. 'रस्तु' ङ. पाठः.

---

† 'किङ्गिरौ क्रोष्टुखट्वाङ्गौ' (पृ. २४०. श्लो. २२) इति वैजयन्ती, 'खिङ्गिरस्तु शिवाभेदे खट्वाङ्गे वारिवालके' इति मेदिनी च । * 'सदाफलो बलां चास्मिन् ह्रस्वे स्यात् खुङ्कः' (पृ. ६३. श्लो. २२१) इति तु वैजयन्ती । ¶ 'ग्रामधान्यं तु खेटकम्' (पृ. १६०. श्लो. १३) इति वैजयन्ती । § 'गीतस्तुत्याम्' इति स्यात् ।

गभीरा द्यावापृथिव्योर्गभीरे इति नप् पुनः ।
जलेऽथ त्रिषु **गम्भीरं** निम्ने हर्षस्तु बुद्धिमान् ॥ ६३१ ॥

ब्रूते दुरवगाहे तद् गम्भीरा तु स्त्रियामियम् ।
वाचि द्यावापृथिव्योश्च गम्भीरे इति ना पुनः ॥ ६३२ ॥

समुद्रे चान्धकारे च मन्मथे च द्रुमान्तरे ।
जम्बीरसंज्ञे क्लीबं तु तत्फले सलिलेऽपि च ॥ ६३३ ॥

गहनं क्ली जलेऽरण्ये दुःखगह्वरयोस्त्रि तु ।
दुष्प्रवेशे **गह्वरं** तु क्ली गुहादम्भवारिषु ॥ ६३४ ॥

रहस्यप्युक्तवानेतच्छब्दवेदी धनञ्जयः ।
निकुञ्जे तु पुमानुक्तो रभसेनाथ भेद्यवत् ॥ ६३५ ॥

(ग्रीष्मी)ष्मे च दुष्प्रवेशे च **गर्गरी** तु स्त्रियामियम् ।
दधिमन्थनपात्रे च क्षेत्रपल्ल्यां द्वयोः पुनः ॥ ६३६ ॥

उग्रीवैदेहजे मर्त्यजातिभेदे ऋषेऽपि च ।
गर्वरः पुंस्यहङ्कारे महिषे तु द्वयोरथ ॥ ६३७ ॥

सन्ध्यायां गर्वरी स्त्री स्याद् **गन्धर्वस्तु** द्वयोर्हये ।
मृगभेदे गोलपुससमाख्ये दिव्यगायने ॥ ६३८ ॥

आह गायनमात्रे च रभसः शब्दवित्तमः ।
अन्तराभवसत्त्वे च वास्तुदेवान्तरे तु ना ॥ ६३९ ॥

कोष्ठपङ्क्तौ दक्षिणस्यां प्रोक्तः षष्ठपदे[2] स्थिते ।
पुंस्कोकिले च रभसः प्रोक्तवानथ **गन्धना** ॥ ६४० ॥

न ना प्रकाशने चापि हिंसायै सूचनेऽपि च ।
परस्योत्साहने चापि कथिता पूर्वसूरिभिः ॥ ६४१ ॥

---

१. 'ये' क. ङ. च. पाठः. २. 'द' क. पाठः.

गर्मुदस्तु द्वयोर्मर्त्यजातिभेदे निषादतः ।
श्वपाक्यां जनिते स्त्री तु गर्मुदी गर्मुदाह्वये ॥ ६४२ ॥

तृणधान्यविशेषे च **गण्डूषा** मुखपूरणे ।
द्रवप्रपञ्च आस्येन निरोध्ये शाकटायनः ॥ ६४३ ॥

गजस्य पुष्करेऽन्ये तु प्रसृतोन्मितवस्तुनि ।
अन्ये तु प्रसृते लिङ्गत्रयेऽसौ कीर्तितो बुधैः ॥ ६४४ ॥

प्रसृते तु द्रवाधारे गण्डूष इति यादवः ।
गण्डोलस्तु पुमान् पिण्डे गजस्य मुखपार्श्वयोः ॥ ६४५ ॥

उपरिप्रदेशयोश्च क्रिमिभेदे तु स द्वयोः ।
गण्डीरस्तु पुमान् कन्दजातिभेदे समाष्ठिला ॥ ६४६ ॥

इति संज्ञान्तरं यस्य बहुभेषजसाधिते ।
उपयोग्यद्रवद्रव्ये क्ली तु स्यात् तण्डुलीयके ॥ ६४७ ॥

चव्ये च स्त्री तु गण्डीरी विपत्रायां स्नुहि स्मृता ।
गण्डकस्तु द्वयोः खड्गमृगे ना शिशुभूषणे ॥ ६४८ ॥

नदीविशेषे विख्याते स्त्रीलिङ्गा गण्डकी स्मृता ।
गर्दभः पशुभेदे द्वे रासभास्ये नपि त्वदः ॥ ६४९ ॥

कुमुदे रभसस्त्वाह श्वेते कुमुद इत्यदः ।
रूप्ये च **गरलं** तु क्ली विषे पुंसि तु पादपे ॥ ६५० ॥

मदनाख्येऽथ **गवलं** विषाणे महिषस्य नप् ।
द्वयोस्त्वरण्यमहिषे **गार्जित**स्तु पुमानयम् ॥ ६५१ ॥

मत्तहस्तिनि तन्नादे पुनः क्ली स्तनितेऽपि च ।
अम्बुदस्याथ पुंसि स्याद् **गर्जनो** गृञ्जनाह्वये ॥ ६५२ ॥

पलाण्डुजातिभेदेऽथ क्रियायां गर्जतेर्नपि ।
ग्रन्थिकं तु नपि ज्ञेयं पिप्पलीमूलसंज्ञके ॥ ६५३ ॥

भेषजे ग्रन्थिपर्णाख्यभेषजे च पुमान् पुनः ।
माद्रेये भेद्यलिङ्गं तु ग्रन्थो यत्रास्ति तत्र वै ॥ ६९४ ॥
ग्रन्थिलस्तु पुमाञ्ज्ञेयः करीरद्रौ विकङ्कते ।
भेद्यवद् ग्रन्थिसहिते रभसेनेदमीरितम् ॥ ६९५ ॥
गडेर[1]**स्तु** प्रस्रवणशैले[2] त्रिष्वेष पुंसि तु ।
स्यात् प्रस्रवणभूमौ हि **गरुडस्तु** पुमानयम् ॥ ६९६ ॥
वैनतेये द्वे तु पक्षिजातिभेदे स्त्रियां पुनः ।
जटायां गरुडा ना तु **गवाक्षो** वातवर्त्मनि ॥ ६९७ ॥
वातायनाख्ये सुग्रीवसचिवे वानरान्तरे ।
गवाक्षी तु स्त्रियामेषा गोदुम्बाख्यलतान्तरे ॥ ६९८ ॥
गिरिकर्ण्याख्यवल्लयां च मल्लिकायामपि त्रि तु ।
गणकः स्याज्ज्यौतिषिके तथा गणयितर्यपि ॥ ६९९ ॥
गणिका तु स्त्रियामेषा वेश्यायां किञ्च भूपतेः ।
अनूढायां कलाज्ञायां प्रियायां पुंस्त्रियोः पुनः ॥ ७०० ॥
रश्मौ **गभस्ति**[3]र्बाहौ तु ना **गणेरुः** पुनः स्त्रियाम् ।
वशायामपि वेश्यायां कर्णिकारे पुनः पुमान् ॥ ७०१ ॥
एवं रभसनिर्दिष्टं स्याद् **गरुत्मां**स्तु पुंस्ययम् ।
गरुडे विहगे तु द्वे **गन्धवत्** तु त्रिषु स्मृतम् ॥ ७०२ ॥
गन्धयुक्ते गन्धवती पुनः पृथ्व्यां स्त्रियामियम् ।
पुर्यां योजनगन्धायां सुरायां रभसेरिता ॥ ७०३ ॥
अनादिसम्प्रदायस्तु **गाण्डीवो** न स्त्रियामयम् ।
पार्थचापे चापमात्रेऽप्यथैकोऽप्याह गाण्डिवम् ॥ ७०४ ॥
पार्थचापे च चापे च न स्त्रीत्येके व्यवस्थिताः ।
असाधुमेनमाचष्टे दोषज्ञो भागवृत्तिकृत् ॥ ७०५ ॥

---

१. 'वे' च. पाठः. २. 'णे शिल्पे त्रि' च., 'णशिल्पे त्रि' क. पाठः. ३. 'कलिक ग. पाठः.

गाङ्गेयस्तु पुमान् स्कन्दे भीष्मे चाथाभिधेयवत् ।
अपत्यमात्रे गङ्गायाः क्ली तु हेमकशेरुणोः ॥ ६६ ॥

रागप्रभेदे **गान्धार**ः पुंसि क्ली नागसम्भवे ।
मान्धर्वस्तु द्वयोरेव गन्धर्वे खे तु नप्यदः ॥ ६७ ॥

गीतभेदेऽथ वाचि स्त्री गान्धर्वी **गारुड**ं पुनः ।
विषशास्त्रप्रभेदे क्ली रत्ने मरतकाह्वये ॥ ६८ ॥

स्वर्णे च त्रिस्तु गरुडसम्बन्धिन्यथ **गार्भिण**म् ।
सीमन्तोन्नयनाभिख्ये स्त्रीणां संस्कारकर्मणि ॥ ६९ ॥

गार्भिणीनां समूहेऽथ गर्भिणीयोगिनि त्रिषु ।
ग्राहकस्तु त्रिषु ज्ञेयो ग्रहीतरि पुमान् पुनः ॥ ७० ॥

पक्षिणा येन गृह्यन्ते पक्षिणोऽन्येऽत्र लुब्धकैः ।
गारित्रस्तु पुमानुक्त आचार्ये गहने तु नप् ॥ ७१ ॥

ग्रामीणा नीलिकानाम्न्यामोषधौ स्त्र्यथ भेद्यवत् ।
ग्राम्ये स्त्रियां तु **गायत्री** खदिराख्यद्रुमे स्त्रियाम् ॥ ७२ ॥

स्त्रीनपोस्तु चतुर्विंशत्यक्षरप्रभृतिष्वसौ ।
आर्षादिषु स्याच्छन्दःसु गायत्रस्तु पुमानयम् ॥ ७३ ॥

ब्रह्मचारिविशेषे स्यादुपकुर्वाणसंज्ञके ।
प्रगाथेषु च तेषु स्याद् येषामादेर्ऋचो भवेत् ॥ ७४ ॥

गायत्रीसंज्ञकच्छन्दो **ग्रामणी**स्तु पुमानयम् ।
नापिते भोगिते[1]ऽप्याह रभसस्त्रि[2]स्तु नायके ॥ ७५ ॥

उत्तमेऽपि भवत्येष **गिरीश**[3]स्तु पुमानयम् ।
महादेवे गिरेस्त्वीशे त्रिषु स्याद् **गिरिजा** पुनः ॥ ७६ ॥

---

१. 'के' ग. पाठः. २. 'तु' च. पाठः. ३. 'रि' च. ञ. पाठः.

पार्वत्यां निम्नगायां च मातुलुङ्ग्यां च सा स्त्रियाम् ।
रभसस्तु क्लीबमाह शिलाजतुनि चार्जके ॥ ६७७ ॥

भेद्यलिङ्गस्तु स ज्ञेयो धरणीधरसम्भवे ।
गुणना तु न नाभ्यासे शून्याङ्के चाथ **गुन्दिलः** ॥ ६७८ ॥

ना मद्गलध्वनौ क्लीं तु वनेऽथो **गृञ्जनः** पुमान् ।
मधुशिग्रुसमाख्ये स्याच्छिग्रुवृक्षान्तरे तथा ॥ ६७९ ॥

पलाण्डुजातिभेदानां दशानामपि कुत्रचित् ।
भेदेऽर्थे त्वत्र मन्यन्ते क्लीबं केचन सूरयः ॥ ६८० ॥

विषदिग्धपशोस्तु क्लीं मांसे ना तु[1] **गृहस्थ**वाक् ।
द्वितीयाश्रमिणि त्रिस्तु मन्दिरस्थेऽथ पुंस्ययम् ॥ ६८१ ॥

गैरेयः शैलजाते स्यात् पूगवृक्षेऽर्थे[2] नप्युदः ।
शिलाजतुन्यथ क्लीबं **गोष्पदं** गोखुरावटे ॥ ६८२ ॥

गोभिश्च सेविते देशे केचित् त्वर्थेऽत्र भेद्यवत् ।
गोस्तनो ना चतुर्यष्टिहारभेदे गवां स्तने ॥ ६८३ ॥

गोस्तनी तु स्त्रियां द्राक्षाभेदेऽथो पुन्नपुंसकम् ।
गोमुखो वाद्यभेदेऽथ क्लीबं स्यादुपलेपने ॥ ६८४ ॥

ब्रूते तु कुटिलागारे रभसः शब्दवित्तमः ।
द्वयोस्तु नक्रेऽथ पुमान् **गोकर्णो**ऽनामया सह ॥ ६८५ ॥

अङ्गुष्ठे विवृते मानं यत् तत्र श्रवणे च गोः ।
ईश्वरस्थानभेदे च मृगभेदे पुनर्द्वयोः ॥ ६८६ ॥

परम्पर इति ख्याते भुजगे च स्त्रियां पुनः ।
दूर्वासंज्ञौषधौ ज्ञेया गोकर्णी स्याद् द्वयोः पुनः ॥ ६८७ ॥

---

१. 'र्थं' क. ख. ग. पाठः. २. 'तु' ग. पाठः. ३. 'पुनः' क. ङ. च. पाठः.

गोनासः स्यात् तिलित्साख्यसर्पजातौ स्त्रियां पुनः ।
गोर्नासिकायां गोनासा **गोपुच्छस्तु** द्वियष्टिके ॥ ६८८ ॥

हारभेदे पुमान् गोस्तु लाङ्गूले पुन्नपुंसकम् ।
गोरक्षो नागरङ्गे ना गवां तु त्रातरि त्रिषु ॥ ६८९ ॥

गोपालस्तु पुमान् राज्ञि त्रि तु गोः पातरि त्रि तु ।
गोसङ्ख्य इति गोपे स्याद् गोसङ्ख्या तु स्त्रियां गवाम् ॥ ६९० ॥

सङ्ख्यायामथ गोयुद्धे **गोसङ्ख्यं** पुन्नपुंसकम् ।
गोविन्दो वासुदेवे ना गोषु त्वधिकृते त्रिषु ॥ ६९१ ॥

गोमतं तु नपि ज्ञेयं गव्यूतिरिति विश्रुते ।
क्रोशद्वयात्मके ह्यध्वमानेऽपि मनने गवाम् ॥ ६९२ ॥

गोनर्दस्तु पुमान् देशविशेषे द्वे तु पक्षिणि ।
सारसाख्ये नपि त्वेतज्जलमुस्तेऽपरः पुनः ॥ ६९३ ॥

कैवर्ते मुस्तकेऽधीते **गोलकस्तु** द्वयोरयम् ।
जारजे भर्तरि मृते ना तु पिण्डेऽपि कम्बले ॥ ६९४ ॥

मणिके चाजयस्त्वस्य वाच्यत्वेनापठद् द्वयम् ।
गुडं गोलं च तदसत् प्राणिभेदे तु सा स्त्रियाम् ॥ ६९५ ॥

गोलिका वेष्टनद्रव्ये **गोस्वामी** तु पुमानयम् ।
नाट्योक्तिविषये राजपुत्रे स्यात् त्रि तु गोमति ॥ ६९६ ॥

गोतमं[1] तु धनुर्भेदे क्ली (जडे तु त्रि) ना पुनः ।
ऋषिभेदे शाक्यमुनौ **गौतमो** गौतमी पुनः ॥ ६९७ ॥

स्त्रियां मृडान्यां रोचन्यां मेदोधातौ तु नप्यदः ।
कुञ्जरे तु द्वयोराह शब्दवेदी धनञ्जयः ॥ ६९८ ॥

---

१. 'मस्तु ध' ग. पाठः.

*गौरिलस्तु न, ना लोहचूर्णे पुंसि तु भाषितः ।
गौरसर्षप इत्येवं रभसेनातिधीमता ॥ ६९९ ॥

गौरवं तु गुरुत्वे च कुङ्कुमे च नपुंसकम् ।
सम्माने च त्रिषु पुनर्गुरुसम्बन्धिमात्रके ॥ ७०० ॥

घट्टनं तु हिमे क्लीबं द्वे तुरङ्गोपजीविनि ।
अना संवरणे चापि चलने चापि घट्टना ॥ ७०१ ॥

घर्घरः पुनरट्टादेरधोद्वारकवाटके ।
न स्त्री वाद्यविशेषे तु वादित्रलगुडेऽपि च ॥ ७०२ ॥
घर्घरी स्त्री द्वयोस्तु स्यान्मर्त्यजात्यन्तरे विशः ।
†रन्ध्यां जातेऽथ घृतवद् घृतयुक्ते त्रिषु स्त्रियाम् ॥ ७०३ ॥

रोदस्यौ घृतवत्यौ स्तो घोषयुक्ते तु **घोषवान्** ।
त्रिषु घोषवती तु स्त्री वीणायामथ न स्त्रियाम् ॥ ७०४ ॥

चरणः प्राणिनां पादे वृक्षमूले च ना पुनः ।
बह्वृचादौ नपि त्वेतदाचारे गतिभक्षयोः ॥ ७०५ ॥

चपलस्तु त्रिषु ज्ञेयश्चञ्चलेऽप्यनवस्थिते ।
दुर्विनीते च शीघ्रे च पारते तु पुमानयम् ॥ ७०६ ॥

तुरुष्काख्ये च निर्यासे मर्कटे तु द्वयोरथ ।
पिप्पलीविद्युतोस्तु[1] स्त्री लक्ष्म्यां तु रभसेरिता ॥ ७०७ ॥

तेनैव करिपिप्पल्यां चपलाथ त्रि **चञ्चलः** ।
चले विद्युति तु स्त्री स्याल्लक्ष्म्यां च पवने तु ना ॥ ७०८ ॥

खञ्जरीटखगे तु द्वे **चञ्चत्कस्तु** पुमान् मणौ ।
अतीव भास्वरे तु द्वे खद्योते दर्दरेऽपि च ॥ ७०९ ॥

---

१. 'तां तु स्त्री' क. ङ. च. पाठः.

---

* 'गौरिलस्तु पुमान् लोहचूर्णे स्याद् गौरसर्षपे' इति तु मेदिनी । † 'वैश्याद्वैदेहकं विप्रा.....रन्ध्री घर्घरम्' (पृ. ७३. श्लो. १८)इति तु वैजयन्ती ।

चन्दना स्त्री नदीभेदे न स्त्रियां मलयोद्भवे ।
चन्द्रकस्तु पुमान् पक्षभेदे मेचकसंज्ञिते ॥ ७१० ॥

चन्द्रिका तु स्त्रियां ज्योत्स्नासंज्ञे चन्द्रातपे तथा ।
चन्द्रभागाख्यनद्यां च **चन्दिरं** तु जले नपि ॥ ७११ ॥

ना तु चन्द्रे हस्तिनि तु द्वयोः पुंसि तु **चङ्कुरः** ।
रथे भगाङ्कुरे च द्वे पुनर्दैत्येऽथ **चङ्क्रमः** ॥ ७१२ ॥

ना संक्रमे पुंस्त्रियोस्तु चङ्क्रमश्चङ्क्रमापि च ।
भवेच्चङ्क्रमणे तच्चाप्यल्पेऽध्वानि गतागतम् ॥ ७१३ ॥

***चण्डिलस्तु** पुमान् शाकविशेषे वास्तुकाह्वये ।
नापितेऽथ शुनि द्वे स्यात् कोपने तु त्रिषु स्मृतः ॥ ७१४ ॥

चषकोऽस्त्री पानपात्रे रभसस्त्वत्र भाषते ।
पाने[2] मधुप्रभेदे च चषकः सरके(?)‡ इति ॥ ७१५ ॥

चण्डातः करवीराख्यपुष्पगुल्मे पुमान् नपि ।
प्रसवेऽस्य वरस्त्रीणामप्यर्धोरुकवाससि ॥ ७१६ ॥

चक्षुष्यः सुभगे त्रिः स्यात् तथा स्याच्चक्षुषो हिते ।
ना पुनः पीतमुद्गे च सक्तुष्वपि तथापरे ॥ ७१७ ॥

रभसः पुण्डरीकाख्यतरौ कतकपादपे ।
कुलाल्याख्ये तु भैषज्ये §द्रोणपु(प्पा? प्प्या)ख्यझाटके† ॥ ७१८ ॥

चक्षुष्या स्त्री पुमांस्तु स्याच्च्यवनो मुनिपुङ्गवे ।
क्लीबं तु प्रच्युतौ ना तु **चलनो**ऽङ्घ्रौ त्रिषु त्वयम् ॥ ७१९ ॥

---

१. 'च स्वल्पे' ग. पाठः. २. 'त्रे' ग. ङ. पाठः.

---

* 'चण्डिलः क्षुरमर्दी स्यात्' (पृ. १३८. श्लो. २६) इति वैजयन्ती, 'चन्द्रिकः पुंसि वास्तूकशाके भगे च नापित' इति तु मेदिनी । ‡ चषकसरकौ पर्यायौ । 'सरको मदिरापात्रे मदिरापानमद्ययोः' इति हेमचन्द्रः । § द्रोणपुष्पी क्षुपभेदो द्रोणवृक्षश्च । †'झाटो निकुञ्जे कान्तारे व्रणादीनां च मार्जने' इति मेदिनी ।

भवेच्चलनशीले क्ली पुनर्भूषणकम्पयोः ।
गमने वस्त्रभेदे च चलना तु स्त्रियामियम् ॥ ७२० ॥

पुंश्चल्यां गौतमेनोक्ता तथान्यैश्च महर्षिभिः ।
चर्वणा तु स्त्रियां नीलमक्षिकायामथो नपि ॥ ७२१ ॥

[1]स्यादने **चमसो** न स्त्री यज्ञपात्रे परः पुनः ।
कर्णावयवभेदे चेत्याह मेघे तु पुंस्ययम् ॥ ७२२ ॥

स्त्रियां तु चमसी भित्ते मुद्गादीनां कृते भवेत् ।
व्यञ्जने **चरितं** तु क्ली गतिभक्षणयोस्तथा ॥ ७२३ ॥

आचारे भक्षिते तु त्रिश्चक्रोरस्तु द्वयोरयम् ।
पक्षिभेदे पुमांस्तु स्याद् गिरिभेदे च **चत्वरम्** ॥ ७२४ ॥

[2]स्यण्डिले प्राङ्गणे च क्ली पुमांस्तु स्याच्चतुष्पथे ।
स्त्री तु स्याद् देवताभेदे रथ्यायामपि चत्वरी ॥ ७२५ ॥

चक्राटो विषवैद्ये द्वे दीनारे तु पुमानयम् ।
चतुर्थ तु चतुर्णां त्रिः पूरणे च चतुर्थ्यसौ ॥ ७२६ ॥

तुरीयायां विभक्तौ स्त्री विनायकतिथावपि ।
*चप्पटस्तु चपेटे ना पर्पटे च त्रिषु त्वयम् ॥ ७२७ ॥

स्यात् स्फारविपुले चैष रभसेन समीरितः ।
[3]चतुरस्तु त्रि दक्षे स्याद् धीमत्यप्यथ भाषते ॥ ७२८ ॥

विदुषामग्रणीरेनं विदग्धे शाकटायनः ।
क्लीबं त्वल्पभ्रुकुट्यां स्याच्छालायामपि हस्तिनः ॥ ७२९ ॥

मृगभेदे तु चतुरा स्त्री तस्या लक्षणं विदुः ।
चतुरा तु घनस्निग्धरोमा श्यामा सबिन्दुका ॥ ७३० ॥

---

१. 'न' क. च. पाठः. २. 'वा' क. च. पाठः. ३. 'स्था' क. च. पाठः. ४. 'रं तु त्रि' ङ. पाठः.

---

* 'चर्पट' इति स्यात्। तथाच मेदिनी—'चर्पटः स्फारविपुले चपेटे पर्पटेऽपि च' इति ।

इत्यथ स्त्री **चतुष्की** स्यात् ख्याते यवनिकान्तरे ।
आढ्यानां मशकहरीत्यजयस्त्वाह शब्दवित् ॥ ७३१ ॥

लिङ्गभेदमनुक्त्वैव भवने यष्टिकान्तरे ।
ना तु सङ्घे चतुर्णां स्यात् प्लक्षवृक्षे तु दृश्यते ॥ ७३२ ॥

शास्त्रे वररुचेर्ना तु **चक्राङ्कः** शार्ङ्गधन्वनि ।
दध्यालीसंज्ञवल्लयां तु चक्राङ्का स्त्री द्वयोः पुनः ॥ ७३३ ॥

चक्राङ्गो हंसविहगे चक्राङ्गी तु स्त्रियामियम् ।
उक्ता कटुकरोहिण्यामथाग्नौ **चर्षणिः** पुमान् ॥ ७३४ ॥

वध्वां बुद्धौ मनुष्ये च व्यवसाये च ना पुनः ।
चतुष्पाद् रावणे त्रिस्तु चतुरङ्घ्रौ पुमान् पुनः ॥ ७३५ ॥

मयूरे **चन्द्रकी** द्वे तु व्याघ्रेऽथो भेद्यलिङ्गकम् ।
ज्ञेयं चन्द्रकवत्यर्थे **चातुरस्तु** पुमानयम् ॥ ७३६ ॥

शकटे चक्रगण्डौ च त्रिस्तु[1] स्याद् दृष्टिगोचरे ।
तथा चतुरसम्बन्धिन्याशुकारिण्यथ द्वयोः ॥ ७३७ ॥

चाक्रिको घाण्टिके चापि तैलिके चाप्यथो नपि ।
प्रकीर्णके **चामरं** स्याद्धीबेरे च त्रिषु त्वदः ॥ ७३८ ॥

यत् स्याच्चमरसम्बन्धि तत्र **चाम्पेय**वाक् पुनः ।
स्वर्णकिञ्जल्कयोश्चापि तथा चम्पकपादपे ॥ ७३९ ॥

नागकेसरवृक्षे च पुमान् क्लीबं पुनस्तयोः ।
प्रसवेऽथ बुधैरुक्तश्चारणो ना कुशीलवे ॥ ७४० ॥

देवजातिविशेषे तु द्वयोः स्त्रीशण्डयोः पुनः ।
अर्थे चारयतेर्धातोश्चारणा **चालनी** पुनः ॥ ७४१ ॥

---

१. 'ण्डे' ङ. च. पाठः. २. 'पु' ङ, 'तु' ग. पाठः.

स्त्रीनपोस्तितउन्यर्थे तथा चालयतेरपि ।
रूपे तु तत्र भवतश्चालनं चालना तथा ॥ ७४२ ॥

चित्रकस्तु पुमान् वह्निसंज्ञायां भेषजौषधौ ।
तन्मूले च तथैरण्डे द्वे तु राजिलभोगिनाम् ॥ ७४३ ॥

त्रयोदशानां भेदानामेकस्मिन् व्याघ्र एव च ।
क्लीबं तु पुण्ड्रेऽथ पुमान् कालिङ्गाख्यलतान्तरे ॥ ७४४ ॥

चित्रलश्चित्रला तु स्त्री छाग्यां चित्रवति त्रिषु ।
चित्राङ्गो द्वे व्याघ्रभेदे *पिण्डाकारसमाख्यके ॥ ७४५ ॥

त्रि तु चित्रशरीरे स्या**च्चिकुर**स्तु पुमानयम् ।
केशे वृक्षे वृक्षभेदे रभसः प्रोक्तवानमुम् ॥ ७४६ ॥

द्वयोस्तु गृहबभ्रौ स्यात् सरीसृपविहङ्गयोः ।
चञ्चले च त्रिषु ज्ञेयं युवतीनां विलोचने ॥ ७४७ ॥

ईषन्निमीलिते क्लीबं **चिक्कण**[1]स्त्वभिधेयवत् ।
मसृणे ना तु कैट्[2]वाख्यधान्येऽथ **चिपिटः** पुमान् ॥ ७४८ ॥

पृथुकाह्वयभक्षे स्यात् त्रि तु पिच्छितविस्तृते ।
चित्रकृत् तु पुमानुक्तस्तिमिशाह्वयपादपे ॥ ७४९ ॥

त्रि तु चित्रकरेऽथ स्त्री **चुलुम्पा** छागयोषिति ।
पुमांस्तु गमनेऽथ द्वे **चुलुको** द्वीपिसंज्ञके ॥ ७५० ॥

व्याघ्रभेदे द्रवाधारप्रस्रुते तु नरस्त्रियोः ।
चुलुकौ[3] रभसस्त्वाह भाण्डभेदे पुमानयम् ॥ ७५१ ॥

इत्येवं चूलिकस्तु स्यात् तिले ना द्वे तु कुक्कुटे ।
चूलिका तु स्त्रियां जातिच्छन्दोभेदे गजस्य च ॥ ७५२ ॥

---

१. 'णं त्वभि' ङ. पाठः. २. 'ख' ङ. पाठः. ३. 'को' ग. ङ. पाठः.

---

* 'पिण्डारक' इति स्यात्। 'पिण्डारकस्तु चित्राङ्गो महादंष्ट्रः' (पृ. ६५. श्लो. ४) इति त्रिजयन्ती ।

कर्णमूले तथाधीते रभसः शब्दवित्तमः ।
नाटकाङ्गेऽथ **चूटा**लस्तूचटाख्यमहीरुहे ॥ ७९३ ॥
त्रिस्तु चूटावति स्त्री तु वेदवाक्ये हि **चोदना** ।
कर्कट्यां चोदनीति स्याद् विरोधोक्तौ तु नपुंस्त्रियोः ॥ ७९४ ॥
चोदना चोदनं चेति प्रेषणे च विदुर्बुधाः ।
चोलकी तु त्रिषु ज्ञेयश्चोलकेन समन्विते ॥ ७९५ ॥
पुमांस्तु नागरङ्गे च करीरे किण्कुपर्वणि ।
चौरिको ना पुराध्यक्षे द्यूतकारे तु स द्वयोः ॥ ७९६ ॥
स्त्रियां तु चौरिका स्तेये **छत्वर**स्तु पुमानयम् ।
निकुञ्जे कुड्यहीने तु मन्दिरे स्यान्नपुंसकम् ॥ ७९७ ॥
शय्योत्तरपटे च त्रिः पुनः स्याद् भर्त्सके परे ।
कुत्सकेऽथो अहिच्छत्रे **छत्राकं** क्ली स्त्रियां पुनः ॥ ७९८ ॥
छत्राकीत्येव रास्नायां **छगल**स्तु द्वयोरजे ।
ऋषिभेदे तु ना स्त्री तु च्छगली वृद्धराजके$ ॥ ७९९ ॥
रभसेनोदिता ना तु **च्छर्दनो** मदनद्रुमे ।
निम्बाख्यपादपे चैनं रभसो वक्त्यलम्बुके ॥ ८०० ॥
शुनामपि ज्वरेऽथ स्यात् त्रपुसे छर्दनी स्त्रियाम् ।
छर्दना तु न नोद्वान्तौ **छान्दसः** श्रोत्रिये पुमान् ॥ ८०१ ॥
छन्दःसम्बन्धिनि त्रि स्यात् करीषाग्नौ पुनः पुमान् ।
छागणस्त्रि तु सम्बद्धे छगणेनोच्यतेऽपि तत् ॥ ८०२ ॥
छगणं पशुविष्ठेति **च्छित्वर**स्तु पुमाञ्छरे[2] ।
हर्षनन्दी तु शठ इत्याह तत्रैष भेद्यवत् ॥ ८०३ ॥

---

१. 'ड' क. च. पाठः. २. 'मांश्चरे' ग. पाठः.

$ 'वृद्धदारके' इति स्यात्। 'छगलश्छागे छगली वृद्धदारकभेषजे' इति हेमचन्द्रः, 'छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके' इति मेदिनी च।

छिदिरस्तु पुमानग्नौ वज्रे क्ली मूषिके द्वयोः ।
अस्त्री त्वायुधसामान्ये वज्रशब्दः प्रयोगवान् ॥ ७६४ ॥

तस्येह ग्रहणं युक्तं तथा चाह धनञ्जयः ।
छिगुरस्तु द्वयोः सर्पे गेहबभ्रौ च नप् पुनः ॥ ७६५ ॥

सोत्प्राशहासे **छुरितं** त्रि तु च्छिन्नेऽथ नप्यदः ।
छेदनं ब्रश्चने विद्यात् कतकस्य फलेऽपि च ॥ ७६६ ॥

साधने तु त्रिषुच्छित्तेरना तु च्छेदना भवेत् ।
धातोश्छेदयतेरर्थे नृलिङ्गस्तु परस्मृतः ॥ ७६७ ॥

शङ्खे स्याज्**जलजं** तुं[1] क्ली पद्मे द्वे मत्स्यकूर्मयोः ।
जलदस्तु पुमान् मेघे जलदा विद्युति स्त्रियाम् ॥ ७६८ ॥

जलप्रदे तु त्रिः क्ली तु **जतुकं** हिङ्गुनि स्मृतम् ।
स्त्रियां त्वजिनपत्राख्यक्षुद्रपक्ष्यन्तरे स्मृता ॥ ७६९ ॥

स्याच्चक्रवर्तिनीसंज्ञे प्रोक्ता च स्थावरान्तरे ।
जयन्तस्तु पुमानिन्द्रपुत्रे स्त्री तु जयन्त्यसौ ॥ ७७० ॥

कात्यायन्यामिन्द्रपुत्र्यां तर्कार्यां तिथिभेदके ।
त्रिस्तु जेतर्यथो जीर्णे **जरणं** क्ली च हिङ्गुनि ॥ ७७१ ॥

जीरके तु पुमान् कृष्णजीरके रभसोऽपठीत् ।
अना तु जरयत्यर्थे जरणाथो **जरन्त**वाक् ॥ ७७२ ॥

स्थविरे भेद्यलिङ्गः स्यान्महिषे तु द्वयोरयम् ।
जर्जरस्त्वस्त्रियामिन्द्रध्वजे वाद्यान्तरे तु ना ॥ ७७३ ॥

दण्डिकासंज्ञके द्वे तु कोकिले भेद्यवत् पुनः ।
जीर्णे भिन्ने परे ना तु **जगलं** पिष्टमद्यके ॥ ७७४ ॥

मेदके कितवे तु त्रि **जङ्गल**स्तु त्रि निर्जले ।
देशे क्लीबं तु मांसेऽथ **जम्बुको** वरुणे पुमान् ॥ ७७५ ॥

---

१. 'क्ली तु प' ग. पाठः.

द्वे सृगालेऽथ **जम्बालः** पङ्कशैवलयोरयम् ।
अस्त्री पुंसि तु **जम्बीरः** पादपे जम्भलाह्वये ॥ ७७६ ॥

फणिर्जकाख्यस्तम्बे च क्ली तु तत्प्रसवेऽथ ना ।
जम्भलो यक्ष्मभेदे स्याज्जम्बीराख्यतरावपि ॥ ७७७ ॥

क्ली तु तत्प्रसवेऽथो ना **ज्वलनो**ऽग्नौ नपि त्वदः ।
दीपने ज्वालने तु स्याज्ज्वलना न पुमानथ ॥ ७७८ ॥

जवनो वेगयुक्ते त्रिर्गतौ तु क्ली परे पुनः ।
हेतौ गतिविशेषस्य वेग इत्यनिले तु ना ॥ ७७९ ॥

जठरं तूदरे न स्त्री त्रिर्बद्धे कठिनेऽपि च ।
जनित्रं तु नपि प्रोक्तं सामभेदेषु केषुचित् ॥ ७८० ॥

धनञ्जयेन तु प्रोक्ता जनित्री मातरि स्त्रियाम् ।
जनकः पुंसि पितरि सीतातातेऽथ राजनि ॥ ७८१ ॥

उत्पादके तु त्रिषु स क्लीबं तु **जननं** कुले ।
उत्पत्तौ च स्त्रियां त्वेषा जननी मातरि स्मृता ॥ ७८२ ॥

करुणायां च **जटिलः** पुनस्त्रिर्जटया युते ।
जटिला तु स्त्रियां मांस्यां वचायां चापि नप्यदः ॥ ७८३ ॥

ह्रीबेरेऽथ **जघन्यस्त्रिः** पाश्चात्ये गर्हिते तथा ।
जघनै(त्वे?स्थे) नपि त्वेतद् विज्ञेयं रक्तचन्दने ॥ ७८४ ॥

जहकस्तु पुमान् काले त्रि तु क्षुद्रे परः पुनः ।
त्यागिन्याह **जरायुस्तु** न स्त्री गर्भाशयेऽथ नप् ॥ ७८५ ॥

आरण्यके सामभेदे **जलात्मा** तु द्वयोरयम् ।
महिषे त्रि तु तत्र स्याद् यस्यात्मा जडतां गतः ॥ ७८६ ॥

कालेयके तु क्लीबं स्याज्**जापकं** भेदवत् पुनः ।
जपकारिण्यथ स्त्री स्याज्जङ्घायां **जाघनी** त्रि तु ॥ ७८७ ॥

---

१. 'म्फ' क. ग. च. पाठः. २. 'ने' ङ. पाठः.

जघनस्य तु सम्बन्धिन्यथो **जाबाल**वाग् द्वये ।
अजाजीवे जबालाया अपत्ये चाथ **जाह्नवी** ॥ ७८८ ॥

स्त्री गङ्गायामपत्ये तु द्वे जह्नोर्जाह्नवः स्मृतः ।
धनञ्जयेन तु क्लीबं जाह्नवं जन्तुनि स्मृतम् ॥ ७८९ ॥

अथात्र रभसेनोक्तं **जाहको** द्वे बिडालके ।
ना तु कारुण्डिकायां च घोङ्गे चेति महाधिया ॥ ७९० ॥

गन्धद्रव्ये त्वगुर्वाख्ये **जाङ्गलं** क्ली त्रिषु त्वदः ।
यज्जङ्गलस्य सम्बन्धि तत्र द्वे तु कपिञ्जले ॥ ७९१ ॥

स्त्रियां तु शूकशिम्ब्यां स्याज्जाङ्गली ना तु **जालकः** ।
तिले क्षारकसंज्ञे तु बालपुष्पान्तरे नपि ॥ ७९२ ॥

गवाक्षभेदे त्वपरे स्त्री त्वयोमयकञ्चुटे ।
जालिकाथो वागुरिके दाम्भिके च त्रि जालिकः ॥ ७९३ ॥

द्वयोस्तु लूतिकासंज्ञक्षुद्रजन्त्वन्तरे मतः ।
जाम्बवांस्तु पुमान् ऋक्षराजभेदे महाबले ॥ ७९४ ॥

रामसाहायकं कर्तुं रावणस्य वधे पुरा ।
ब्रह्मणो जृम्भमाणस्य वक्त्राद् यः समजायत ॥ ७९५ ॥

तत्र जाम्बवती तु स्त्री तस्य जाम्बवतः सुता ।
पत्नी कृता या कृष्णेन तं निहत्य रसातले ॥ ७९६ ॥

तस्यामथ द्वयोर्ज्ञेयो **जिह्वालः** सारमेयके ।
पृषदंशे च ना तु स्याज्जिगर्तुर्वह्निमार्गयोः ॥ ७९७ ॥

तथा प्राणेषु दिवसेऽप्यथ द्वे ब्राह्मणेऽथ ना ।
शत्रौ **जिघांसु**स्त्रिषु तु हन्तुमिच्छौ पुमान् पुनः ॥ ७९८ ॥

जीवकः स्यात् क्षपणके तथैवासनपादपे ।
त्रि तु श्रेष्ठे प्राणितरि **वृद्धाजीविनि** सेवके ॥ ७९९ ॥

स्त्रियां तु जीविका ज्ञेया जीवन्त्याख्यलतान्तरे ।
आजीवे च स्मृताथ क्ली **जीवितं** प्राणने तथा ॥ ८०० ॥

प्राणेषु च त्रिषु त्वेतज्जीवेर्ण्यन्तस्य कर्मणि ।
तथैव प्राणितवति **जीवला** तु स्त्रियामियम् ॥ ८०१ ॥

वचायामृषिभेदे तु नाथ कूर्ममयूरयोः ।
जीवथो द्वे अथ पुमान् **जीवन्त** ऋषिभेदके ॥ ८०२ ॥

जीवन्ती तु स्त्रियां ज्ञेया जीवन्त्याख्यलतान्तरे ।
ज्योतिष्मत्यां गुलूच्यां च त्रि तु स्याज्जीवतादिति ॥ ८०३ ॥

स्यादाशीर्विषये जीवितरि क्लीबं तु **जीवनम्** ।
जीविकायां जलेऽन्ने च प्राणने च स्त्रियां पुनः ॥ ८०४ ॥

जीवन्त्याख्यलताजातौ जीवनी शार्ङ्गिणस्तथा ।
नवानामपि शक्तीनामेकशक्तावियं पुनः ॥ ८०५ ॥

भेदासंज्ञौषधीभेदे टाबन्ता स्यादना पुनः ।
जीवना जीवयत्यर्थे **जीवदस्तु** रिपौ पुमान् ॥ ८०६ ॥

वैद्ये च भेषजवत् त्वेष जीवस्य स्यात् प्रदातरि ।
जीवस्य स्याच्छेत्तरि च **जीवातुस्तु** नृशण्डयोः ॥ ८०७ ॥

स्याज्जीवनौषधे केचित् त्वौषधे सलिलान्नयोः ।
द्रव्ये च रभसस्त्वाह जीवे बहुविदां वरः ॥ ८०८ ॥

जुङ्गितेस्तु द्वयोर्हीनवर्णे त्रिषु तु वर्जिते ।
क्लीबं तु वर्जनेऽथ क्ली **जृम्भितं** स्याद् विचेष्टिते ॥ ८०९ ॥

जृम्भणे च त्रि तूत्फुल्ले विवृद्धेऽप्यथ पुंस्ययम् ।
नीललोहितसम्मिश्रवर्णे तद्वति तु त्रिषु ॥ ८१० ॥

---

१. 'जुहिकस्तु' ङ. पाठः. २. 'क' ग. पाठः.

यावनालाख्यधान्ये तु जोन्नाला[1] स्त्री त्रिषु त्वदः ।
ज्योतिष्मज्जोतिषा युक्ते स्त्री तु ज्योतिष्मती स्मृता ॥ ८११ ॥
पिण्ड्याख्यस्थावरे क्षुद्रधान्ये यस्याह्वयान्तरम् ।
गवीथुरिति ना तु स्याज्ज्योतिषो[2] मासि कुत्रचित् ॥ ८१२ ॥
ज्योतिःसम्बन्धिनि त्रि स्याज्झर्झरं तु कलौ युगे ।
नदप्रभेदे च प्राह रभसः शब्दवित्तमः ॥ ८१३ ॥
वाद्यभेदे च ना त्रिस्तु विशीर्णे टट्टरस्तु ना ।
भेरीनादे टट्टरी तु लम्बापटहसंज्ञके ॥ ८१४ ॥
वाद्यभेदे स्त्रियां मिथ्यावादे च रभसोऽपठीत् ।
*टागरष्टङ्गनक्षारे केकराख्ये तु वीक्षिते ॥ ८१५ ॥
अजयः प्राह रभसो हेलाविभ्रमगोचरे ।
ना भेद्यलिङ्गं तु तथा केकराक्षे शरीरिणि ॥ ८१६ ॥
‡टुण्डुकस्तु पुमान् वृक्षभेदे[3] शोणकसंज्ञके ।
स्तोकार्थे तु[4] पठत्येनं रभसो भेद्यलिङ्गकम् ॥ ८१७ ॥
तरलं तु त्रिषु ज्ञेयं चञ्चले भास्वरेऽपि च ।
हारमध्यगरत्ने तु पुमान् हारे च नप् पुनः ॥ ८१८ ॥
चर्मकोशे स्त्रियां तु स्याद् यवागूसुरयोर्भवेत् ।
अथास्त्री खजके फेने तण्डकोऽन्यस्त्ववोचत ॥ ८१९ ॥
व्याख्यातामरकोशस्य छन्दोभेद इति भ्रमात् ।
तरुजस्तु पुमानग्नौ भेद्यलिङ्गं तु वृक्षजे ॥ ८२० ॥

---

१. 'ज्योर्नाला' क. च., 'जोर्नाला' ङ. पाठः. २. 'षि' ग. पाठः. ३. 'विशेषे शोणसं' ग. पाठः. ४. 'पु' ग. पाठः.

---

* 'टगरष्टङ्गनक्षारे ना केकरदाशि त्रिषु' (पृ. २६०. श्लो. ४१) इति तु वैजयन्ती । 'टगरष्टङ्गणक्षारे हेलाविभ्रमगोचरे' इति मेदिनी । 'अथ टगरष्टङ्गणकेकराक्षयोः' इति हेमचन्द्रश्च ।
‡ 'टुण्टुकः शोणकाल्पयोः' इति तु मेदिनी ।

तरुणस्तु द्वयोर्यूनि नवीने त्वभिधेयवत् ।
एरण्डवृक्षे तु पुमान् रभसस्त्वन्यथावदत् ॥ ८२१ ॥

कुब्जपुष्पैरण्ड इति **तमिस्रा** तु स्त्रियामियम् ।
ध्वान्तरात्रौ तथा रात्रौ स्यादन्धतमसे त्वना ॥ ८२२ ॥

तमोमात्रे परेऽथास्त्री **त्रसरः** सूत्रवेष्टने ।
शलाकामण्डले ना तु वर्णकौशेयसूत्रके ॥ ८२३ ॥

तपनस्तु पुमानर्कौ सूर्ये च नरकान्तरे ।
भल्लातकतरौ ग्रीष्मे क्लीबलिङ्गं तु मन्वते ॥ ८२४ ॥

तक्षावथ पुमान् सर्पराजभेदे हि **तक्षकः** ।
तक्षिण चाथो तक्षितरि त्रिस्त्वक्**सार**स्तु पुंस्ययम् ॥ ८२५ ॥

वेणौ तृणद्रुमाख्येषु तालहिन्तालकादिषु ।
क्लीं तु तत्प्रसवे स्त्री तु त्वक्सारा वल्लिषु[2] स्मृता ॥ ८२६ ॥

त्वरितं तु त्वरायां क्लीं स्याच्छीघ्रे त्वभिधेयवत् ।
तण्डुलस्तु नृलिङ्गः स्याद् व्रीह्यादिफलबीजके ॥ ८२७ ॥

विडङ्गे च स्त्रियां तु स्यात् पिप्पल्यां तण्डुलाथ ना ।
तर्कारः पादपे तक्रे नवनीतेन संयुते ॥ ८२८ ॥

स्यात् सद्योमथिते स्त्री तु तर्कारी स्यावरान्तरे ।
वैजयन्तीति विख्याते **तमसा** तु स्त्रियामियम् ॥ ८२९ ॥

नदीभेदे परैरुक्तो ना रूपाध्यवसाययोः ।
त्वक्पत्रं तु वराङ्गाख्यगन्धद्रव्ये नपुंसकम् ॥ ८३० ॥

त्वक्पत्री रभसेनोक्ता स्त्रियां बाष्पाख्यभेषजे ।
तगरं तु नताभिख्ये गन्धद्रव्ये नपुंसकम् ॥ ८३१ ॥

---

१. 'ज्ज' क. ङ., 'ज्जः' च. पाठः. २. 'लि' ङ. पाठः. ३. 'क्ता' क. ग. च. पाठः. ४. 'तु' ग. पाठः.

नन्द्यावर्तस्य[1] पुष्पे च ना पुनः पुष्पगुल्मके ।
नन्द्यावर्ताह्वये त्रिस्तु **तरन्तः** स्यात् तरीतरि ॥ ८३२ ॥

अन्यस्तु भेक इत्याह तत्र द्वे अथ नप्यदः ।
तरत्रं[2] स्यात् स्रुवे त्रिस्तु घासहारिण्यथ त्रिषु ॥ ८३३ ॥

नवाम्बरे **तन्त्रकं** स्याद् गुलूच्यां तु स्त्रियामियम् ।
तन्त्रिकेति[3] वदत्येकस्तर्पणं तु नपुंसकम् ॥ ८३४ ॥

तृप्तावपि गुडाद्याढ्यलाजसक्तुषु चेन्धने ।
अना तु तर्पयत्यर्थे शृङ्गाटाख्ये तु पुंस्ययम् ॥ ८३५ ॥

स्तम्बे जलोद्भवे ना तु **तविषः*** सिन्धुनाकयोः ।
बले च स्त्री तु तविषी स्याद् वात्यादेवकन्ययोः ॥ ८३६ ॥

भुवीन्द्रपुत्र्यां चाथ **त्रिस्तलिनं** विरलाल्पयोः ।
अजयस्त्वब्रवीत् तुच्छे तलिनी तुं[4] स्त्रियामियम् ॥ ८३७ ॥

अट्टालिकायां **तपसः** पुनश्चन्द्रे पुमांस्त्रि तु ।
महति स्यादथो सूर्ये **तरणिर्वारिधावपि** ॥ ८३८ ॥

स्त्रियां[6] तु नावि नद्यां च पुष्पस्तम्बान्तरे तथा ।
कुमारीसंज्ञके किञ्च व्रजस्तम्बे स चाप्ययम् ॥ ८३९ ॥

गवामुत्थापनं काष्ठं पतितानां समीरितम् ।
सज्जनस्तु रयेऽप्याह त्रि तु क्षिप्रे पुमान् पुनः ॥ ८४० ॥

तपस्वी शिशिरर्तौ[5] च चन्द्रे च त्रिस्तु तापसे ।
शोच्ये च स्त्री तु मांस्याख्यगन्धद्रव्ये तपस्विनी ॥ ८४१ ॥

---

१. 'र्तास्यपु' ग. पाठः. २. 'रु' ग. पाठः. ३. 'न्त्र' ग. पाठः. ४. 'रि' च. पाठः. ५. 'ति' क. च. पाठः. ६. 'स्त्री तु नावि च नद्यां च पु' क. ङ. च. पाठः.

---

* 'भुवीन्द्रपुत्र्यां तविषी ताविष्यन्धिदिवोर्नरौ' (पृ. १६०. श्लो. ४२) इति वैजयन्ती । 'तरीषः शोभनाकारे भेलेऽब्धिव्यवसाययोः । तरीषी शक्रकन्यायां पुंसि स्वर्गे महोदधौ' इति तु मेदिनी ।

तरस्वीति द्वयोर्व्याघ्रे वानरेऽप्यथ भेद्यवत् ।
वेगवद्बलिनोरन्ये पुनः शूरेऽप्यधीयते ॥ ८४२ ॥

तरङ्गवति तु त्रि स्यात् **तरङ्गी** स्त्री तु कीर्तिता ।
तरङ्गिणी हरिद्रायां निम्नगायां च ना पुनः ॥ ८४३ ॥

स्वर्गे स्यात् **ताविषः** स्त्री तु ताविषीन्द्रसुताभुवोः ।
वात्यायां देवकन्यायां क्ली तु तेजसि ताविषम् ॥ ८४४ ॥

तारका त्वपुमानक्षितारानक्षत्रयोस्तथा ।
दैत्यभेदे तु ना क्ली तु तारकं सर्वविन्मतौ* ॥ ८४५ ॥

भेद्यलिङ्गं तु तरितृतारयित्रोरथो नपि ।
कवाटोद्घाटयन्त्रे च **तालकं** भूषणान्तरे ॥ ८४६ ॥

पुमांस्तूष्णगुणे त्रिस्तु तद्वत्यथ नपुंसकम् ।
ताम्बूलं वृक्षपत्रेऽपि मुखभूषणवस्तुनि ॥ ८४७ ॥

शुक्तिचूर्णं पूगफलं नागवल्लीदलं तथा ।
इति त्रयाणां वस्तूनां समाहारात्मके भवेत् ॥ ८४८ ॥

रभसस्तूक्तवानेतद् गुवाकफलमात्रके ।
ताम्बूली तु स्त्रियां नागवल्ल्यां स्यात् स्त्री तु **तामसी** ॥ ८४९ ॥

प्रावृण्निशायां दुर्गायां निशामात्रे तु कश्चन ।
त्रिस्तमोगुणसंयुक्ते तमःसम्बन्धिमात्रके ॥ ८५० ॥

ताण्डवस्त्वस्त्रियां नृत्ते तृणभेदे च भाषितः ।
तारणस्तु पुमान् मासे सङ्क्रान्त्यवधिके रवेः ॥ ८५१ ॥

तारणी तु स्त्रियां गोष्ठ्यामथ स्यात् तारणा न ना ।
अर्थे तारयतेस्त्रिस्तु तरणेस्तरणस्य च ॥ ८५२ ॥

सम्बन्धिनि **त्रापुषं** तु रजते क्ली त्रिपु त्वदः ।
विकारे त्रपुणो ना तु **तातलो** लोहकूटके ॥ ८५३ ॥

---

* 'ओङ्कारः प्रणवस्तारस्तारकं सर्वविन्मतिः' (पृ. १०२. श्लो. २३३) इति वैजयन्ती ।

मनोजवे तु त्रि स्याच्च तक्षेऽथो **तातगुः** पुमान् ।
क्षुद्रताते त्रि तु हिते तातायाथास्त्रियां भवेत् ॥ ८९४ ॥

तिलकः पुण्ड्रके क्षुद्रतिले त्वेष पुमांस्तथा ।
श्रीमत्संज्ञे वृक्षभेदे तथा कुरवकाह्वये ॥ ८९५ ॥

तिलकालकसंज्ञे च पिप्लुभेदे नपि त्वदः ।
जठरावयवे क्लोमसंज्ञे द्वे तु ह्यान्तरे ॥ ८९६ ॥

एतद् रभसकोशोक्तमथ स्यात् **तिमिरो**ऽस्त्रियाम् ।
अन्धकारेऽक्षिरुग्भेदे तिमिरा तु स्त्रियामियम् ॥ ८९७ ॥

वाद्यभेदे **तिरीटस्तु** रक्तलोध्रे पुमानयम् ।
मुकुटे तु नपि स्त्री तु बदर्यां स्यात् तिरीटिका ॥ ८९८ ॥

त्रिकूटस्तु सुवेलाख्यगिरिभेदे नृलिङ्गकः ।
सामुद्रलवणे तु क्ली समासाद्यत्र पूर्ववत् ॥ ८९९ ॥

तिलित्सस्तु द्वयोः सर्पभेदे गोनससंज्ञके ।
तरक्षुसंज्ञके व्याघ्रभेदे **त्रिदिव**वाक् पुनः ॥ ८९० ॥

ना स्वर्गाकाशयोः क्लीबे त्वन्ये केचित् स्त्रियां पुनः ।
एलायां निम्नगाभेदे त्रिदिवा **त्रिपदी** पुनः ॥ ८९१ ॥

हस्त्यङ्घ्रिबन्धरज्जौ स्त्री पदत्रयसमाहृतौ ।
त्रि तु यस्य पदानि स्युस्त्रीणि तत्र स्त्रियां पुनः ॥ ८९२ ॥

श्वेतासंज्ञलतायां स्यात् **त्रिपुटा** त्रिपुटीति च ।
एलायां त्रिपुटैव स्यात् सूक्ष्मायां रभसः पुनः ॥ ८९३ ॥

---

१. 'कृष्णति' क. ङ. च. पाठः. २. 'कर्कटे' ग. पाठः. ३. 'विदार्यां' ग. पाठः. ४. 'पुत्रव' ग. पाठः. ५. 'ना' ग. च. पाठः.

मल्लिकायामपि प्राह नरं तीरसतीनयोः।
बहुव्रीहौ पुनस्त्रि स्यात् **त्रिवृता** तु लतान्तरे ॥ ८६४ ॥
श्वेताख्ये स्त्री त्रिगुणिते पुनः स्यात् त्रिरथ स्त्रियाम्।
चिच्चायां **तिन्त्रिणी** दैत्यविशेषे तु पुमानयम् ॥ ८६५ ॥
त्रिष्टुभा तु स्त्रियां गौरसर्षपे सितसर्षपे।
पुनर्नाथ **त्रिपक्षी** स्त्री पक्षत्रयसमाहृतौ ॥ ८६६ ॥
पक्षत्रयान्तकर्तव्यश्राद्धे प्रेतस्य च त्रि तु।
बहुव्रीहौ **त्रिमार्गा** तु स्त्री गङ्गायां त्रिमार्ग्यसौ ॥ ८६७ ॥
मार्गत्रयसमाहारे बहुव्रीहौ तु स त्रिषु।
अथ **त्रिगन्ध**मेलात्वक्पत्त्राणां क्ली समुच्चये ॥ ८६८ ॥
अर्थलिङ्गसमासांस्तु तर्कयेदत्र पूर्ववत्।
पुरत्रये तु **त्रिपुरी** नपुंस्त्रियोस्त्रिपुरस्तु ना ॥ ८६९ ॥
मदमत्तास्यधुर्धूरभेदेऽथ द्वे **त्रिरेखवाक्**।
चिक्रोडसंज्ञाखुभेदे ना तु शङ्खेऽथ भेद्यवत् ॥ ८७० ॥
बहुव्रीहावथ क्लीबं **त्रिशिखं** स्यात् त्रिशूलके।
शिरोभूषणभेदे च भेद्यलिङ्गं तु मन्यताम् ॥ ८७१ ॥
बहुव्रीहौ **तित्तिरस्तु** †खरक्काणाख्यपक्षिणि।
ऋषिभेदे च नाथ द्वे **त्रिकेतुः** शुकपक्षिणि ॥ ८७२ ॥
बहुव्रीहौ पुनस्त्रि स्यात् **त्रिशङ्कुस्तु** पुमानयम्।
तार्क्ष्ये मतङ्गराजे च मार्जारे तु द्वयोरयम् ॥ ८७३ ॥
त्रिधामा तु पुमान् विष्णावग्नौ चाथाभिधेयवत्।
बहुव्रीहौ वैश्रवणे पुनर्ना **त्रिशिरा** अयम् ॥ ८७४ ॥

---

१. 'ष्णौ चाग्नौ' ङ. च. पाठः.

---

† "निकृत्तेषु ततस्तेषु निष्कामन्नण्डजास्त्वथ। कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्वशः ॥" (उद्यो. अ. १०. श्लो. ४१) इति महाभारतम्। 'तित्तिरिस्तु खरक्काणः' (पृ. २८. श्लो. ३५) इति तु वैजयन्ती।

दशास्यसम्बन्धिनि च रक्षोभेदेऽथ भेद्यवत् ।
त्रिमूर्धे स्त्री तु गङ्गायां **त्रिस्रोता** रभसः पुनः ॥ ८७६ ॥

अन्यस्यामपि कस्याञ्चिन्नद्यामाहाथ भेद्यवत् ।
बहुव्रीहौ *[1]**त्रिवारं** तु क्ली बलेऽथ द्वयोर्भवेत् ॥ ८७६ ॥

धीवर्यां ब्राह्मणाज्जाते मर्त्यजात्यन्तरेऽप्यथ ।
तुषारः शीकरे पुंसि हिमभेदेऽपि कश्चन ॥ ८७७ ॥

प्रालेये शैत्यधर्मे च भेद्यलिङ्गं तु तद्वति ।
तुवरो ना कषायाख्यरसे त्रिषु तु तद्वति ॥ ८७८ ॥

तुवरी तु स्त्रियां धान्य आढकीसंज्ञके तथा ।
सुराष्ट्रकाह्वये चापि भेषजेऽथ **तुरुष्क**वाक् ॥ ८७९ ॥

ना सिल्हसंज्ञे निर्यासे राजभेदे च तस्य तु ।
स्त्र्यपत्ये स्यात् तुरुष्की स्त्री देशे त्वस्य नृभूमनि ॥ ८८० ॥

तुरुष्कास्तु**मुलं** तु क्ली व्यामिश्रसमरेऽथ ना ।
स्वरे स्याद् व्याकुले त्रिस्तु वैजयन्त्यामभाषत ॥ ८८१ ॥

रभसस्तु नरि प्राह विभीतकमहीरुहे ।
तुरगी त्वश्वगन्धायां स्त्री द्वयोस्तु तुरङ्गमे ॥ ८८२ ॥

गन्धर्वाधिपभेदे तु **तुम्बुरुः** पुंसि भाषितः ।
तिन्दुकीसंज्ञवृक्षे च क्लीबलिङ्गं तु तत्फले ॥ ८८३ ॥

†[2]**तूबर**स्तु पुमान् कालेऽप्यजातश्मश्रुपूरुषे ।
वैजयन्त्यां तु कथितं भेद्यलिङ्गं त्रिषु त्वदः ॥ ८८४ ॥

---

१. 'फ' ग. पाठः. २. 'व' ङ. च. पाठः.

---

* 'तीवरम्' इति स्यात् । तथाच वैजयन्ती—'सूते धीवरी तीवरं ततः । एते ब्राह्मणपुत्राः स्युः' (पृ. ७२. श्लो. ११) इति । † 'पशुः कालेऽपि निःशूको नरोऽश्मश्रुश्च तूपरौ' (पृ. २५५. श्लो. १२) इति तु वैजयन्ती । आथर्वणे च 'तमसा ये च तूपराः' (११, ११.२२) इति श्रूयते ।

कालेऽप्यजातशृङ्गे स्यात् पशौ शुष्कतृणे पुनः ।
तृफलं शुष्कपर्णे च क्ली लतायां तु सा स्त्रियाम् ॥ ८८९ ॥

तृफलाथ **तृतीयः** स्यात् त्रयाणां पूरणे त्रिषु ।
तृतीया तु तृतीयस्यां विभक्तौ स्त्री तथा तिथौ ॥ ८८३ ॥

धनदस्याथ वेणौ ना **तेजनः** शरसंज्ञके ।
स्तम्बे च स्त्री तु मूर्वायां ज्योतिष्मत्यां च तेजनी ॥ ८८७ ॥

रुधिरे च विचार्यं तु सूत्रकारप्रयोगगम् ।
दृष्टं न तेजनीदन्तादिति (?) यत् तदथो न ना ॥ ८८८ ॥

आकर्णकर्षणाच्चापि यदध्यर्धाधिकाङ्गुलम् ।
आकर्षेणमथाकृष्य धानुष्कैर्यदिषोर्भवेत् ॥ ८८९ ॥

सन्धानं तेजना तत्र निशाने चाथ **तैतिलम्** ।
कायविन्यासरूपाणां करणानां क्वचिद् भवेत् ॥ ८९० ॥

एकस्मिन् करणे क्लीबं गण्डके तिलपिञ्जडे (?) ।
नीवृद्भेदे तु पुम्भूम्नि कलिङ्गाख्ये हि **तैतिलाः**† ॥ ८९१ ॥

त्रैष्टुभं तु नपि व्योम्नि त्रिष्टुप्छन्दसि च त्रिषु ।
त्रिष्टुप्सम्बन्धिनि स्यात् तु प्रगाथे त्रिष्टुबादिके ॥ ८९२ ॥

तोरणस्त्वस्त्रियां गेहे(?)बहिर्द्वारे नपि त्वदः ।
नरुप्रभेदेऽस्य फले त्वरायां चाथ **तोषणम्** ॥ ८९३ ॥

तुष्टौ क्ली तोषणी तु स्त्री हरिद्रायामना पुनः ।
तोषणा तोषयत्यर्थे **तोदकस्तु** पुमान् सिते ॥ ८९४ ॥

सर्षपे तोत्तरि त्वेष त्रिर्नृलिङ्गस्तु **तोयदः** ।
मेघे क्लीबं तु धनुषि स्यादथो दक्षिणस्त्रिषु ॥ ८९५ ॥

---

१. 'दू' क. ग. च. पाठः. २. 'ण तथाकृष्टधनु' ग. पाठः. ३. 'पिट्टके' ङ., 'वृज्जडे' ग. पाठः. ४. 'लिङ्गस्त्वेष तो' ग. ङ. पाठः.

---

† 'तैतुलास्तु कलिङ्गकाः' (पृ. ३७. श्लो. २६) इति तु वैजयन्ती ।

विदग्धे च परच्छन्दानुवर्तिन्यपि भाषते ।
कुशले हर्षनन्दीमं तथा यमककुब्भवे ॥ ८९६ ॥
शरीरावयवे चापि वामस्य प्रतियोगिनि ।
दक्षिणा तु स्त्रियां याम्याशायामूर्त्विग्भृतावपि ॥ ८९७ ॥
पठति त्वत्र रभस इमां दानप्रतिष्ठयोः ।
*दक्षार्य[1]स्तु पुमानग्नौ वैनतेयेऽप्यथ द्वयोः ॥ ८९८ ॥
गृध्रेऽथ **दहनः** पुंसि वह्नावुष्णगुणेऽपि च ।
त्रि तु तद्वति शण्डे तु दाहेऽथ **दरणं** नपि ॥ ८९९ ॥
द्विधाभावे शुके तु द्वे **दण्डकस्त्वस्त्रियामयम्** ।
समासप्रायवाक्ये स्यादुत्कृतेरधिकेषु च ॥ ९०० ॥
छन्दःसु नीवृद्भेदे तु महाराष्ट्राह्वये नरि ।
दण्डका भूम्नि च स्त्री तु दण्डिकाल्पकलस्वने ॥ ९०१ ॥
वाद्यभेदे दण्डरूपेऽथो दण्डयितरि त्रिषु ।
अथ स्याद् **दर्दुरो** भेके द्वयोः पुंसि तु हस्तिनः ॥ ९०२ ॥
गलस्य पार्श्वयोरुक्तो रभसस्त्वाह वारिदे ।
वाद्यभेदे च सा तु स्त्री चण्डिकायां प्रकीर्तिता ॥ ९०३ ॥
दर्द[2]रस्तु पुमाञ्छैलप्रभेदे कलशीमुखः ।
इति प्रसिद्धवाद्ये च त्रि त्वीषद्भग्नवस्तुनि ॥ ९०४ ॥
दण्डिकस्तु पुमान् बाणभेदे सोऽप्युक्तलक्षणः ।
त्रिभागशल्यनाराचरूप इत्यथ भेद्यवत् ॥ ९०५ ॥
दण्डवत्यथ पुल्लिङ्गो **दन्तिको** गृहभित्तिगे ।
नागदन्ताह्वये शङ्कावथ दन्तवति त्रिषु ॥ ९०६ ॥
निकुम्भसंज्ञौषधौ तु स्त्रीलिङ्गा द(न्तः न्ति)का भवेत् ।
दहरस्तु द्वयोरल्पमूषिके बालके त्रिषु ॥ ९०७ ॥

---

१. 'र्ध्यं' ङ. पाठः. २. 'र्दुं' च. पाठः.

---

* 'दक्षाय्य' इति स्यात् ।

अल्पेऽथ भ्रातरि पुमान् रभसेन समीरितः ।
अथ §त्रैराज्यजे द्वे स्यान्मर्त्यजात्यन्तरेऽपि च ॥ ९०८ ॥

वैश्यपूर्वक्षत्रियायां व्रात्याज्जाते प्रयुज्यते ।
द्रमिलो दर्शनं तु क्ली नेत्रे शास्त्रे मते धियाम् ॥ ९०९ ॥

ज्ञाने च स्वप्नवीक्षासु क्रियायां पश्यतेरपि ।
धर्मदर्पणयोस्त्वाह रभसः शब्दवित्तमः ॥ ९१० ॥

दर्शनी तूपरध्यायां स्त्री पुरादेर्गदस्य च ।
यन्त्रभेदे दर्शनार्थे दर्शना तु न ना तथा ॥ ९११ ॥

दर्शनं दर्शयत्यर्थं **दर्शक**स्तु पुमानयम् ।
द्वाःस्थेऽथ भेद्यवद् द्रष्टृदर्शयित्रोरथो पुमान् ॥ ९१२ ॥

दन्ते स्याद् **दशनो** दृष्टिक्रियायां तु नपुंसकम् ।
दशमं तु दशानां स्यात् पूरणे त्रि स्त्रियां पुनः ॥ ९१३ ॥

दशमी यमतिथ्यां स्याद् **दर्वर**स्तु पुमानयम् ।
वज्रे स्त्रियां तु सेनायां दर्वरी स्याद् द्वयोः पुनः ॥ ९१४ ॥

दशेरः सारमेये च सर्पे चाथो नृभूमनि ।
मरुसंज्ञे जनपदे दशेरा **दर्पक**स्तु ना ॥ ९१५ ॥

कन्दर्पे त्रिः पुनर्दृप्तदर्पयित्रोरथो पुमान् ।
आदर्शे **दर्पणः** क्ली तु दृप्तौ दर्पयतेः पुनः ॥ ९१६ ॥

क्रियायां दर्पणा तेन(?) **दमयन्ती** पुनः स्त्रियाम् ।
स्याद् ब्रह्मचारिदण्डे च भार्यायां च नलस्य हि ॥ ९१७ ॥

त्रिस्तु स्याद् दमयितरि दमयेत् तनये पुनः ।
दायादो द्वे सपिण्डेऽपि यस्त्वन्यो दायभाग् भवेत् ॥ ९१८ ॥

---

१. 'षा' ग. पाठः. २. 'राध्यायां' क. च. पाठः. ३. 'गुरस्य' ग. पाठः. ४. 'के' क. च. पाठः. ५. '(यन्त?यंस्त) न' क. ङ. च. पाठः.

---

§ चेरचोलपाण्ड्यजाते ।

तत्र त्रि रभसस्त्वाह त्रिलिङ्गां **दाडिमीं** बुधः ।
एलायां मुचिलि(ङ्गा:न्दा)ख्यपादपे ब्रूमहे वयम् ॥ ९१९ ॥

क्लीबलिङ्गं तु विज्ञेयं प्रसवे तस्य नप् पुनः ।
व्याधौ स्याद् **दारुणं** भेद्यलिङ्गं तु स्याद् भयङ्करे ॥ ९२० ॥

पुल्लिङ्गो रभसेनोक्तो **द्रावको** घोषकाश्मनोः ।
अथ द्रावयितर्येष द्रोतर्यपि च भेद्यवत् ॥ ९२१ ॥

दारकस्तु द्वयोर्बाले कश्चित्तु तरुणेऽवदत् ।
धनञ्जयस्तु ब्रूते स्म पत्रे शब्दविदां वरः ॥ ९२२ ॥

त्रि तु भेत्तर्यथो कृष्णसारथौ **दारुकः** पुमान् ।
दैत्यभेदे च नृनपोः पुनः कुत्सितदारुणि ॥ ९२३ ॥

दात्यूहः कालकण्ठाख्यखगे द्वे चातके तथा ।
दारदस्तु पुमान् सिन्धुसंज्ञके नीवृदन्तरे ॥ ९२४ ॥

पारदे क्ष्वेडभेदे तु पुन्नपुंसकयोरयम् ।
कतकाख्ये तु वृक्षे ना **द्रावणो** लवणान्तरे ॥ ९२५ ॥

विडसंज्ञे फले तु क्ली कतकस्याथ नप्स्त्रियोः ।
द्रावणा द्रावयत्यर्थे क्लीबलिङ्गं तु **दानवम्** ॥ ९२६ ॥

गन्धे दमनकाख्ये स्याद् दनुजे तु द्वयोरथ ।
द्वापरोऽस्त्री तृतीये स्याद् युगे संशयनेऽप्यथ ॥ ९२७ ॥

द्वादशो द्वादशानां त्रिः पूरणे द्वादशी पुनः ।
स्त्रियां विष्णुतिथौ त्रिस्तु **द्वितीयं** पूरणे द्वयोः ॥ ९२८ ॥

स्त्री तु द्वितीया भार्यायामजदैवतके तिथौ ।
द्वितीयस्यां विभक्तौ च **द्विजिह्व**स्तु त्रि सूचके ॥ ९२९ ॥

---

१. 'पुनः' क. ग. च. पाठः. २. 'व' क. ङ. च. पाठः. ३. 'स्थावरे क्ष्वे' क. ङ. च. पाठः ४. 'द्वि' च. पाठः.

द्वे तु सर्पे **दिष्करी** तु स्त्री किञ्चित्प्रौढयोषिति ।
बहुव्रीहौ पुनस्त्रि स्याद् **द्विजाति**स्तु द्वयोरयम् ॥ ९३० ॥
ब्राह्मणे क्षत्रिये वैश्ये पक्षिण्यपि पुमान् पुनः ।
पुनर्भ्वा **दिधिषुः** पत्यौ दिधिषूस्तु स्त्रियामियम् ॥ ९३१ ॥
कनिष्ठपत्न्यामरतौ पुनर्भूपरिविन्नयोः[1] ।
आहुतौ च **द्विजन्मा** तु ना दन्ते रभसोदितः[2] ॥ ९३२ ॥
द्वयोस्तु पठितः पूर्वैः स्याद् ब्रह्मक्षत्रविट्सु च ।
पक्षिण्यथ **दिवौकास्तु** देवचातकयोर्द्वयोः ॥ ९३३ ॥
काव्यालङ्कारभेदे तु स्वरूपे चापि **दीपकम्** ।
क्ली त्रि तु स्याद् दीपयितृदीपित्रोर्ना तु पक्षिणि ॥ ९३४ ॥
पक्षिणा येन गृह्यन्त पक्षिणोऽन्येऽत्र ना पुनः ।
महाकदम्बे नीपाख्ये **दीपनः** क्ली तु दीपनम् ॥ ९३५ ॥
दीपिक्रियायां त्रिषु तु दीपनी[3] दीप्तिसाधने ।
दीदिविस्तु पुमान् स्वर्गे पावके च बृहस्पतौ ॥ ९३६ ॥
नृस्त्रियोस्त्वोदनेऽथ द्वे **दीर्घवाक्** कुक्कुटे त्रि तु[4] ।
बहुव्रीहौ **द्वीपवांस्तु** समुद्रे च नदे च ना ॥ ९३७ ॥
स्त्री तु द्वीपवती नद्यां भूमौ चाथ नृलिङ्गकः ।
दीर्घायुः शल्मलीवृक्षे तथा जीवतरावपि ॥ ९३८ ॥
मार्कण्डेये च काके तु द्वे त्रिः स्याच्चिरजीविनि ।
दुर्वारस्तु यमे पुंसि दूरोधे त्वभिधेयवत् ॥ ९३९ ॥
दुराशः कृकलासे द्वे दुष्टाशे त्वभिधेयवत् ।
दुरितं क्ली दुर्गमनेऽप्यथ स्याद् भेद्यलिङ्गकम् ॥ ९४० ॥
दुर्गते दुष्कृतं तु क्ली पापे त्रिस्त्वशुभं कृते ।
दुहिणस्तु नृलिङ्गः स्याद् वासुदेवविरिञ्चयोः ॥ ९४१ ॥

---

१. 'वृन्दयोः' क. पाठः. २. 'सेरितम्' ग. पाठः. ३. 'नै' क. च. पाठः. ४. 'कुभे त्रि' क. ङ. च. पाठः.

भेद्यवत् तु भवेत् क्षुद्रे क्लीबलिङ्गं तु पाप्मनि ।
दुष्टगन्धे तु **दुर्गन्धः** पुमान् सौवर्चले तु नप् ॥ ९४२ ॥
बहुव्रीहौ तु त्रिरथो **दुर्वर्ण** रजते नपि ।
एलावालुकसंज्ञे च[1] भेषजे रभसोऽपठीत्[2] ॥ ९४३ ॥
दुष्टवर्णे तु नृनपोर्बहुव्रीहौ पुनस्त्रिषु ।
दुर्जातं व्यसने क्ली त्रिरसम्यग्जातवस्तुनि ॥ ९४४ ॥
दुर्धरस्तु नृलिङ्गः स्याद् वृषभाह्वयभेषजे ।
भेद्यलिङ्गं तु दुर्वारे दुर्भरे च प्रकीर्तितम् ॥ ९४५ ॥
दुर्लभस्त्वतिदुष्प्रापे यवाषे तु पुमानयम् ।
दुर्मुखस्तु पुमान् नागराजभेदे द्वयोः पुनः ॥ ९४६ ॥
वानरे भेद्यलिङ्गं तु मुखरे कविभिः स्मृतम् ।
दुर्दर्शा त्वविवाह्यासु कन्यास्वेकत्र या भवेत् ॥ ९४७ ॥
कुब्जा तत्र त्रिषु पुनर्दुष्प्रेक्षेऽथ नृलिङ्गकः ।
दुःस्पर्शोऽथ(?)यवाषे स्याद् दुःस्पर्शा तु स्त्रियामियम् ॥ ९४८ ॥
कण्डकार्यां परस्त्वात्मगुप्तायां पठति त्रि तुं[3] ।
दुःखस्पर्शे **दुर्गम**स्तु पुमान् स्याद् भूधरे त्रि तु ॥ ९४९ ॥
दुष्प्रवेशे **दुर्गति**स्तु नरके स्त्री नरं पुनः ।
पठत्यमरदत्तोऽमुं दारिद्र्ये तुं[4] स्त्रियामियम् ॥ ९५० ॥
दुष्टायां च गतौ त्रिस्तु बहुव्रीहावथो पुमान् ।
भेर्यां स्याद् **दुन्दुभि**र्दैत्यविशेषे वरुणेऽपि च ॥ ९५१ ॥
स्त्री तु द्यूतशलाकायां द्वे तु कीटान्तरे भवेत् ।
दुग्धाशी तु शुके द्वे स्यात् क्षीराशिनि तु भेद्यवत् ॥ ९५२ ॥
दुर्नाम त्वर्शसि क्लीबं किमौ तु द्वे स्त्रियां पुनः ।
स्याद् दीर्घकोशिकासंज्ञजलजन्तौ त्रिषु त्वदः ॥ ९५३ ॥

---

१. 'थ भे' क. ङ. च. पाठः. २. 'वदत्' क. ङ. च. पाठः. ३. 'षु' ग. पाठः.
४. 'च' क. च. पाठः.

दुःसंज्ञे दुष्टसंज्ञायां पुनः क्ली **दूषिका** पुनः।
स्त्री क्रोधवशकन्यायां त्रिषु दूषयितर्यसौ ॥ ९९४ ॥

दूषिकं त्वक्षिजमले नपुंस्त्रियोः स्यात् पुनः स्त्रियाम्।
वीणाजातौ च वर्तौ च लतायां चापरः पुनः ॥ ९९५ ॥

लूतायामित्यभाषिष्ट **दृष्टान्तस्तु** पुमानयम्।
शास्त्रे तथोदाहरणे बहुव्रीहौ तु भेद्यवत् ॥ ९९६ ॥

दृशानस्तु त्रिषु द्रष्टर्यादित्ये त्वभ्यधुर्नरम्।

दृशीक[1]स्तु त्रिषु वपुष्मति क्लीबं तु लोचने ॥ ९९७ ॥

देवार्ह तु सुवर्णे स्याद् रसविद्धे नपुंसकम्।
देवयोग्ये पुनस्त्रि स्यादथ स्यात् पुंसि **देवनः** ॥ ९९८ ॥

ज्ञेयो द्यूतशलाकायां क्ली क्रीडाविजिगीषयोः।
व्यवहारे द्युतौ कान्तौ स्तुतिगत्योरना पुनः ॥ ९९९ ॥

देवना देवयत्यर्थे परिदेवन एव च।
देवयुस्त्वृत्विजि पुमान् होमे च त्रि तु धार्मिके ॥ ९६० ॥

दैवज्ञो ना ज्यौतिषिके दैवज्ञा तु स्त्रियामियम्।
ज्ञेया गृहगोलिकायां दैवस्य ज्ञातरि त्रिषु ॥ ९६१ ॥

द्रोहकस्तु पुमान् गाथाविशेषे परिकीर्तितः।
वैडालवृत्तिके त्वेष भेद्यलिङ्गः समीरितः ॥ ९६२ ॥

दोहलं तु नपीच्छायामिति सिंहो नरे पुनः।
दत्त आहाथ गर्भिण्या इच्छाभेदे प्रकीर्तितः ॥ ९६३ ॥

श्रद्धासंज्ञे स्थावराणां पुष्ट्यर्थं यत् प्रदीयते।
करीषादि भवेत् तत्र स्त्रियां तु **द्योतना** भवेत् ॥ ९६४ ॥

उषसि द्योतनं तु क्ली धने द्योततिकर्मणि।
अक्ष्णि प्रकाशनायां तु स्त्रीनपोर्द्योतनाथ नप् ॥ ९६५ ॥

---

१. 'ज' क. च पाठः. २. 'शि' च. पाठः.

दोलकं पङ्कजे त्रिस्तु स्यादुत्क्षेपरि ना पुनः ।
दौष्षन्तो नृपभेदेऽथ मर्त्यजात्यन्तरे द्वयोः ॥ ९६६ ॥

कक्ष्याजीवेऽम्बष्ठ एव स्यादुग्राख्ये च जीविनि ।
मत्स्यघातादथ स्त्री स्याद् **दौन्दुभी** दम्भ एव च ॥ ९६७ ॥

विवाहार्थं वरस्यापि यात्रायामथ दुन्दुभेः ।
सम्बन्धिनि त्रिः क्लीबं तु लेख्यानां व्यवहारिणाम् ॥ ९६८ ॥

अष्टानामेकलेख्ये स्याद् **धवल**स्तु नृलिङ्गकः ।
वृषभे श्वेतवर्णे च त्रिस्तु श्रेष्ठेऽपि सुन्दरे ॥ ९६९ ॥

श्वेतवर्णयुते चाथ सुरभौ धवला स्त्रियाम् ।
धनदस्तु कुबेरे ना भेद्यवत् तु धनप्रदे ॥ ९७० ॥

‡**धनुका** तु स्त्रियां वध्वां भेद्यलिङ्गं तु साधुनि ।
धनेशस्तु कुबेरे ना स्यात् त्वाढ्ये भेद्यलिङ्गकः ॥ ९७१ ॥

अथ क्ली **धर्षणं** धार्ष्ट्येऽभिभवे सुरतेऽप्यथ ।
धर्षणी कुलटायां स्त्री **धमन**स्तु पुमानयम् ॥ ९७२ ॥

नडसंज्ञे स्थावरे स्यात् तथा स्यान्नासिकापुटे ।
रभसस्तु त्रिषु क्रूरे भस्त्राध्मापक एव च ॥ ९७३ ॥

धमनी तु स्त्रियामेषा विज्ञेया वाचि वाग्मिभिः ।
तथा हट्टविलासिन्यां सिरायां रभसोऽपठीत् ॥ ९७४ ॥

धरणं त्वष्टके हेमपलानामपि सप्ततौ ।
पलानां ताम्रसंज्ञस्य लोहस्य दशके पुनः ॥ ९७५ ॥

अन्येषां रूप्यकर्षे च धारणेऽप्यथ नपुंस्त्रियोः ।
स्यादुन्मानक्रियायां स्याद् **धारणा** धारणस्तु ना ॥ ९७६ ॥

---

१. 'व' ग. पाठः.

---

‡ 'धनिका साधुनार्यां ना धन्याके त्रिषु साधुधनिनोश्च' इति तु मेदिनी ।

स्तने धातरि लोकेऽर्के सलिले तु नपुंसकम् ।
धर्णसिस्तु पुमाञ्छैले सलिले तु नपुंसकम् ॥ ९७७ ॥

*धाराङ्गमवतारेऽश्रावित्युक्तं यादवैर्नपि ।
रभसेन तु पुंसीति धाराङ्गस्तीर्थखड्गयोः ॥ ९७८ ॥

धाराटस्तु द्वयोरश्वे चातकेऽप्यथ **धावनी** ।
धौता(जैश्च)लेऽ पृश्निपर्ण्यां रजक्यां च स्त्रियामथ ॥ ९७९ ॥

गतिशोधनयोः प्राहुः क्लीबलिङ्गमिदं बुधाः ।
धावनं धावयत्यर्थे त्वपुमान् धावनाथ ना ॥ ९८० ॥

धार्णकः पूर्वशास्त्रज्ञैरुक्तश्छिद्रविधानके ।
हविषां च ग्रहे शाणतृतीयांशे तु सा स्त्रियाम् ॥ ९८१ ॥

धार्णका **धारणा** तु स्त्री चित्तस्य स्थिरबन्धने ।
क्वचिद् ध्येये वस्तुनि स्याद् योगिनां हृदयस्थिते ॥ ९८२ ॥

रभसस्त्वत्र पठति ङ्यन्तमेतत् सुधीर्यथा ।
बौद्धोक्तमन्त्रभेदे च नाडिकायां च धारणी ॥ ९८३ ॥

अना तु वहने किञ्च मर्यादायामथो पुमान् ।
धार्मिको नृपतेर्धर्माधिकृते पुरुषे त्रि तु ॥ ९८४ ॥

पाठके धर्मशास्त्राणां धर्मस्य चरितर्यपि ।
स्त्रियां तु **धिषणा** बुद्धौ स्त्रीचिह्ने पार्वतीगिरोः ॥ ९८५ ॥

धिषणे इति रोदस्योर्धिषणस्तु बृहस्पतौ ।
ना क्ली तु **धीवरं** काललोहे जात्यन्तरे पुनः ॥ ९८६ ॥

कैवर्त्यां वृषलाज्जाते द्वे दाशेऽप्यथ **धूसरः** ।
चाक्रिके द्वे परे ना तु वर्णे स्यात् स्तोकपाण्डुरे ॥ ९८७ ॥

---

१. 'तौ' क. च. पाठः. २. 'च' क. च. पाठः. ३. 'णि' ङ. च., 'नि' क. पाठः. ४. 'र्ण' ङ. पाठः. ५. 'रि' क. ग. च. पाठः. ६. 'च' ग. पाठः. ७. 'ख' ग. ङ. पाठः. ८. 'ण्ड' क. ङ. च. पाठः-

* 'धाराग्रमवतारेऽश्रौ' (पृ. २५१. श्लो. १८) इति तु मुद्रितवैजयन्तीपाठः ।

§ 'धौताबले रजक्यां च धावनी' (पृ. २६०. श्लो. ४९) इति वैजयन्ती ।

त्रिस्तु तद्वत्यथो पुंसि **धूमलः** कृष्णलोहिते ।
मिश्रवर्णे तद्वति तु त्रिरथो पुन्नपुंसकम् ॥ ९८८ ॥

देवतार्चनतूर्येऽथ **धोरणं** वाहने नपि ।
वाजिनां गतिभेदे च धौरिताख्ये त्रि तद्वति ॥ ९८९ ॥

हंसे तु द्वेऽथ **नलिनं** नलिकायां[1] नपुंसकम् ।
पद्मे तु पुंस्यप्येकेषामन्येषां तु स्त्रियामपि ॥ ९९० ॥

नलिनी तु स्त्रियामेव पद्मस्तम्बे सरस्यपि ।
रभसस्त्वपठीद्[2] व्योमनिम्नगायां च ना पुनः ॥ ९९१ ॥

न्यग्रोधो व्योमसंज्ञे स्यात् प्रमाणे वटपादपे ।
फले त्वस्य लुकोऽभावान्नैयग्रोधमिति स्मृतम् ॥ ९९२ ॥

न्यग्रोधी तु स्त्रियां स्तम्बे द्रवन्तीसंज्ञकेऽथ ना ।
नन्दको वासुदेवस्य खड्गे नन्दितरि त्रिषु ॥ ९९३ ॥

नन्दनस्तु द्वयोः पुत्रे क्ली तूद्याने शचीपतेः ।
नन्दथौ चैं[3] पुमांस्तु स्यादर्थे नन्दयतेस्त्रि तु ॥ ९९४ ॥

स्यान्नन्दयितरि स्त्री तु **नन्दन्ती** स्यात् सखीजने ।
नन्दन्तस्तु पुमान् सख्यौ भेद्यलिङ्गं तु नन्दताम् ॥ ९९५ ॥

इत्याशीर्यत्र तत्र **स्यान्नमस्या** तु स्त्रियामियम् ।
पूजायां पूजनीये तु त्रिर्**नभाका** त्वियं स्त्रियाम् ॥ ९९६ ॥

चक्रवाकाख्यविहगजातौ काके पुनर्द्वयोः ।
अथात्र रभसेनोक्तमस्माभ्यं तन्न रोचते ॥ ९९७ ॥

नटे पोटगले पुंसि चारणे केवलेऽपि च ।
नर्तकः स्यात् करेण्वां च लासिकायां च नर्तकी ॥ ९९८ ॥

न्यस्तकस्त्वस्त्रियामर्थनिक्षेपे धनिभिः कृते ।
त्रिस्तु स्यान्निहिते स्त्री तु रेवाख्यसरिदन्तरे ॥ ९९९ ॥

---

१. 'ना' ग. पाठः. २. 'पठत्' क. पाठः. ३. 'चा' क. ङ. च. पाठः.

नर्मदा नर्मणस्तु त्रिर्दायके **नकुलो** द्वयोः ।
बभ्रौ कनिष्ठे तु पुमान् युधिष्ठिरमहीपतेः ॥ १००० ॥

ऋषिभेदे वर्णभेदे यो वर्णो नकुले स्थितः ।
तद्वति त्रिरथो क्लीबं पुंस्यन्ये **नमतं** विदुः ॥ १००१ ॥

ऊर्णास्तरणके ना तु धूमे दिनकरेऽपि च ।
त्रि तु हूस्वे त्रिषु पुनर्नवानां पूरणे भवेत् ॥ १००२ ॥

नवमं नवमी तु स्त्री दुर्गादेव्यास्तिथौ स्मृता ।
रभसेनात्र पठितः श्लोकोऽयमिह पठ्यते ॥ १००३ ॥

मुरलायां दरीभान्दुनीरजःस्त्रीषु **नर्मरा**[1] ।
क्लीबं स्याद् द्रुमकर्पूरे नाराचे[2] मानवेऽर्जुने ॥ १००४ ॥

नहुषस्तु पुमान् पूर्वराजभेदे द्वयोः पुनः ।
मनुष्ये **नेयंशुकस्तु** स्याच्चन्द्रे वेणौ पुमांस्तथा ॥ १००५ ॥

रणरेणौ प्रावरणेऽप्यथ स्याद् भेद्यलिङ्गकम् ।
प्रवासशीले **नादेयं** पुनः स्याद् भेद्यलिङ्गकम् ॥ १००६ ॥

नदीभवादौ स्त्री तु स्यान्नादेयी जलवेतसे ।
कर्कर्यां भूमिजम्ब्वां च महोदर्यास्त्र्यमुष्मके ॥ १००७ ॥

*कङ्गुष्ठेऽपि च नादेयीत्येवं रभसभाषितम् ।
क्लीबं तु सैन्धवे क्ली तु **नागरं** विश्वभेषजे ॥ १००८ ॥

चुक्रे राजकशेरुण्यप्यथ स्याद् भेद्यलिङ्गकम् ।
पुनर्भ्वादौ **नारक**स्तु नरके ना त्रिषु त्वयम् ॥ १००९ ॥

नरकस्य हि सम्बन्धिन्यथ **नासिक्य**वाक् त्रिषु ।
स्यान्नासिकाभवे स्तस्तु नासिक्यावध्निनोर्नरि ॥ १०१० ॥

---

१. 'लिख्यते' ग. पाठः. २. 'दा' ग. पाठः. ३. 'जे' ग. पाठः. ४. 'र' ग. पाठः. ५. 'नं' क. ङ. च. पाठः. ६. 'प्र' ग. च. पाठः. ७. 'प्रा' ग. पाठः.

---

* कङ्गुस्तृणभेदः, तत्समीपे तिष्ठतीति कङ्गुष्ठं मृत्तिकाभेदः ।

नायकस्त्रिः प्रभौ ना तु हारमध्यगते मणौ ।
क्लीबं त्वासनभेदे स्या**न्नाकुलं** तस्य लक्षणम् ॥ १०११ ॥

ऊर्ध्वज्ञोरुपविष्टस्य भुजाभ्यां जङ्घयोर्द्वयम् ।
बद्ध्वासनमिति स्त्री तु रास्नायां नाकुली तथा ॥ १०१२ ॥

रभसः कुक्कुटीकुन्दे स्त्री च(र्येऽव्ये) चेत्यथ त्रिषु ।
भवेन्नकुलसम्बन्धिन्यथ **नाराच**वाङ् नरि ॥ १०१३ ॥

अयोमयशरे स्त्री तु नाराची कथिता बुधैः ।
लेखन्यां **नाटकं** तु क्ली रूपकान्यतमे भवेत् ॥ १०१४ ॥

स्त्रियां तु नाटिकान्यत्र नाटकाद् रूपकान्तरे ।
भेद्यलिङ्गं तु नटितृनाटयित्रोरथ त्रिषु ॥ १०१५ ॥

तरीतृतारयित्रोः स्यान्नावा **नाविक** इत्ययम् ।
अम्बष्ठाद् ब्राह्मणीजाते मर्त्यजात्यन्तरे द्वयोः ॥ १०१६ ॥

नापितस्तु द्वयोर्विप्रवैश्याजे व्यभिचारतः ।
मर्त्यजात्यन्तरेऽम्बष्ठाज्जाते राज्ञ्यां च नप् पुनः ॥ १०१७ ॥

नालीकमम्बुजे ना तु शरे नालीकिनी पुनः ।
पद्मिन्यां स्त्री त्रिषु पुनर्नालीकवति कीर्तिता ॥ १०१८ ॥

नालीकी स्याद् गृहे तु क्ली **निशान्तं** नृनपोः पुनः ।
अन्ते निशायास्त्रिषु तु शान्तेऽथ **निधनो**ऽस्त्रियाम् ॥ १०१९ ॥

कुले नाशे सामभक्तौ पञ्चम्यामथ भेद्यवत् ।
न्यस्ते **निसृष्टः** स्त्री तु स्यान्निसृष्टा कन्यकान्तरे ॥ १०२० ॥

व्यङ्गे पुमांस्तु **निषधो** दक्षिणे कुलपर्वते ।
मेरोर्नीवृत्प्रभेदे च तस्य राजनि च त्रि तु ॥ १०२१ ॥

कठिनेऽथ **निषादो** ना सप्तानां कुत्रचित् स्वरे ।
स्वराणां द्वे तु मर्त्यानां जातिभेदे तथा विदुः ॥ १०२२ ॥

विप्राज्जाते क्रमोढायां शूद्रायां यस्य चापरम् ।
स्यात् पारशव इत्येवं नामधेयमधीयते ॥ १०२३ ॥

निलिम्पस्तु द्वयोर्देवे निलिम्पा तु स्त्रियामियम् ।
‡(जाड्यां ?) **निवेप**स्तु पुमान् कूपे वृक्ष इतीतरः ॥ १०२४ ॥
वृक्षजाताविति त्वन्य आकाशे तु नपुंसकम् ।
निम्नगा तु स्त्रियां नद्यां त्रि तु निम्नस्य गन्तरि ॥ १०२५ ॥

निष्ठुरं तु कठोरे त्रिः परुषाक्षरवाच्यपि ।
स्त्रियां तु निष्ठुरा मुद्राविशेषे हस्तनिर्मिते ॥ १०२६ ॥

पदभञ्जनशास्त्रे तु **निरुक्तं** क्ली त्रिषु त्वदः ।
कृतनिर्वचने शब्दे या तु मन्त्रेऽभिधीयते ॥ १०२७ ॥

इन्द्रादिर्देवता तस्यामुक्तायां स्यात् स्वसंज्ञया ।
तद्देवताके च तथा स्यात् प्रातःसवनादिके ॥ १०२८ ॥

निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने ।
क्ली त्रिस्तु मुनिवह्न्यादौ शब्दविद्भिर्निरूपितम् ॥ १०२९ ॥

निरुधा तु दिशि स्त्री स्यात् त्रि तु पुण्यक्रमेऽभ्यधुः ।
निर्माल्याभ्रकयोस्तु क्ली **निर्मलं** विमले त्रिषु ॥ १०३० ॥

निर्वेदस्तु पुमान् खेदे वेदहीने पुनस्त्रिषु ।
निर्देशस्तु पुमाञ्ज्ञेय आज्ञायां कथनेऽपि च ॥ १०३१ ॥

भेद्यलिङ्गस्तु विज्ञेयो देशहीने मनीषिभिः ।
निर्वादः परिवादे ना वादहीने तु भेद्यवत् ॥ १०३२ ॥

निर्लेपस्त्वम्बुजे क्लीबं लेपहीने पुनस्त्रिषु ।
निर्यामः कर्णधारे ना यामहीने तु भेद्यवत् ॥ १०३३ ॥

---

१. 'रे' ग. पाठः, २ 'रा' ङ. पाठः, ३. 'पुनस्त्रिषु' ङ. च. पाठः.

---

‡ 'चाद्यां' इति ङ. ग्रन्थे पठ्यते । पाठद्वयमप्यशुद्धमेव । उभयपाठाक्षरसंवादात् 'छाग्याम्' इति पाठः कल्पयितुं शक्यते । वैजयन्त्यां तु 'अनड्वाह्यनड्वुत्सा तम्बा तम्पा निलिम्पिका' (पृ. ६८. श्लो. ४२.) इति गवि निलिम्पिकाशब्दः पठितः ।

निर्माल्यं तूपयुक्तायां मालायां स्यान्नपुंसकम् ।
माल्यहीने पुनस्त्रि स्यान्**निःसङ्गा** तु स्त्रियामियम् ॥ १०३४ ॥

अतिमुक्तकसंज्ञायां लतायां भेद्यवत् पुनः ।
स्यात् सङ्गवर्जिते चापि **निर्लज्जा** देवरेऽपि या ॥ १०३५ ॥

नियुक्तान्यं नरं याति तस्यां स्याद् भेद्यवत् पुनः ।
लज्जाहीनेऽथ **निस्त्रिंशः** खड्गे नाथाभिधेयवत् ॥ १०३६ ॥

क्रूरे स्यान्**निष्कला** तु स्त्री विगतार्तवयोषिति ।
अथ त्रिर्नष्टबीजे च कलाहीनेऽप्यथ त्रिषु ॥ १०३७ ॥

निष्कोशः कोशहीने स्यात् कुक्षिमध्ये तु हस्तिनः ।
पुलिङ्गो भाषितः सद्भिर्गजशास्त्रे च **निष्कुटः** ॥ १०३८ ॥

गृहारामे पुमांस्त्रिस्तु निष्क्रान्तादौ कुटादथ ।
एलायां **निष्कुटी** स्त्री स्यान्निष्क्रान्तादौ कुटेस्त्रिषु ॥ १०३९ ॥

निर्ऋतिस्तु स्व्यलक्ष्म्यां स्यान्निर्गमे चाथ भेद्यवत् ।
गतिहीनेऽथ **निद्रालुः** सुनिषण्णकसंज्ञके ॥ १०४० ॥

जलशाकविशेषे ना शयालौ त्वभिधेयवत् ।
नियन्ता सारथौ पुंसि भेद्यवत् तु नियामके ॥ १०४१ ॥

निर्जरा तु गुडूच्यां स्त्री द्वे देवे त्रि जरोज्झिते ।
नीवलस्तु द्वयोर्मर्त्यजातिभेदे प्रकीर्तितः ॥ १०४२ ॥

वैदेहीशूद्रसम्भूते पुण्ड्रवत्तुरगान्तरे ।
नीरजस्तु पुमान् कृष्णे कमले तु नपुंसकम् ॥ १०४३ ॥

नीलिका तु स्त्रियां नीलीसंज्ञायामोषधौ स्मृता ।
स्याच्च सिंहमलाभिख्यलोहभेदेऽथ भेद्यवत् ॥ १०४४ ॥

स्यान्नीलिकरि स त्रिस्तु **नूतनं** नववस्तुनि ।
वृष्टिसर्जनरश्मीनां पुनः सूर्यस्य नूतनाः ॥ १०४५ ॥

---

१. 'ग'-क. ङ. च. पाठः,

स्त्रीभूमनि शतानां स्याच्चतुर्णी कुत्रचिच्छते ।
नृपार्हे त्वगुरौ क्लीबं स्याद् राजार्हे पुनस्त्रिषु ॥ १०४६ ॥
नेपालस्त्विक्षुभेदे ना नीवृद्भेदे च भूम्नि च ।
रभसोक्ता तु सुवहानवमालिकयोः स्त्रियाम् ॥ १०४७ ॥
मनःशिलायां च प्रोक्ता नेपाली बहुवेदिना ।
नैगमस्तूपनिषदि पुमानुक्तो दृतावपि ॥ १०४८ ॥
वणिङ्नागरयोस्तु स्याद् भेद्यलिङ्गं तथैव च ।
भवेन्निगमसम्बन्धिमात्रे क्लीबं तु **नैषधम्** ॥ १०४९ ॥
निषधाद्रेरुत्तरस्मिन् वर्षे हरिवर्षसंज्ञके ।
निषधस्य तु सम्बन्धिन्येतत् त्रिरथ **नैर्ऋतः** ॥ १०५० ॥
राक्षसे द्वे तु निर्ऋतिसम्बन्धिनि पुनस्त्रिषु ।
अथ पुंसि **पवित्रः** स्याद् वासुदेवे पुरन्दरे ॥ १०५१ ॥
पावके पवने सोमे वृणौ यवविवस्वतोः ।
त्रि तु पूते क्ली तु ताम्रे गोमये सलिले कुशे ॥ १०५२ ॥
मन्त्रे दध्नि ब्रह्मसूत्रे हेम्न्यर्थे कलशेऽम्बुजे ।
क्षीरे दर्भाङ्गुलीये तु पुन्नपुंसकयोरथ ॥ १०५३ ॥
पल्लवोऽस्त्री किसलये पत्रमात्रप्रकोष्ठयोः ।
विस्तारे विटपेऽथाह रभसोऽमुं बलेऽपि च ॥ १०५४ ॥
पुल्लिङ्गस्तु भवेत् षिद्दे **पतङ्ग**स्तु पुमानयम् ।
सूर्ये शालिप्रभेदे च मार्जारे तु द्वयोरयम् ॥ १०५५ ॥
शलभे पक्षिमात्रे च स्यादश्वे च स्त्रियां पुनः ।
पुत्तिकायां पतङ्गी स्याद् ऋषिभेदे तु पुंस्ययम् ॥ १०५६ ॥
पञ्चालः स्याच्च पुम्भूम्नि नीवृद्भेदेऽस्य राजनि ।
स्यात् सर्ववचनस्तस्य पाञ्चालीति[1] स्त्र्यपत्यके ॥ १०५७ ॥

---

१. 'स्त्री' क. इ. पाठः।

पञ्चाङ्गी तु खलीने स्त्री पञ्चानां चं समाहृतौ ।
अङ्गानां भेद्यवत् तु स्याद् बहुव्रीहावथ स्त्रियाम् ॥ १०९८ ॥

पञ्चिका द्यूतभेदे स्याद् व्याख्याग्रन्थान्तरेऽपि च ।
त्रि तु विस्तारके स्याच्च पञ्चावयवसङ्गके ॥ १०९९ ॥

पञ्चमस्तु पुमान् षड्जप्रभृतीनां क्वचित् स्वरे ।
अथ पाण्डवपत्न्यां च रभसस्त्वाह पञ्चमीम्* ॥ १०६० ॥

स्यात् पञ्चमविभक्तौ च स्त्रीलिङ्गा स्याच्छ्रियस्तिथौ ।
पञ्चानां पूरणे तु त्रिः **पलित**स्त्वस्त्रियामियम् ॥ १०६१ ॥

केशादौ जरसा शौक्ल्ये तद्वद्बलवतोस्त्रिषु ।
नपुंसकं तु शैलेये स्यादङ्के मरिचेऽथ ना ॥ १०६२ ॥

कर्दमे **पटलं** तु क्ली पुंसि चान्ये प्रचक्षते ।
गृहच्छदिषि दशोगविशेषाध्याययोरपि ॥ १०६३ ॥

न स्त्रियोस्तु समूहे स्यात् पटली पिटकान्तरे ।
†टलं तु बले क्लीबं त्रि तु स्याद् वाग्मिकल्ययोः ॥ १०६४ ॥

पटोलस्तु पुमान् वल्लिजातौ तिक्तकनामनि ।
पटोली तु स्त्रियां कोशातकीसंज्ञे लतान्तरे ॥ १०६५ ॥

पललं तिलचूर्णे क्ली मांसकर्दमभेदयोः ।
पुमांस्तु तिलकाभिख्यवृक्षेऽथो पुन्नपुंसकम् ॥ १०६६ ॥

व्रीहिस्तम्बे हि लूनात्तफले स्त्री तु पलाल्यसौ ।
महति स्यात् पलालेऽन्ये पलालक्षोद इत्यथ ॥ १०६७ ॥

पलाशः किंशुके पुंसि शटीसंज्ञे च भेषजे ।
केचित् त्वाहुर्हरिद्वर्णे त्रि तु तद्वति नप् पुनः ॥ १०६८ ॥

---

१. 'मी ।' च. पाठः.

---

* पञ्च पतीन् मिनोति बध्नाति प्रेम्णा इति पञ्चमी । † 'पटुलम्' इति स्यादिति भाति ।

तरुपत्रे किंशुकस्य प्रसूने द्वे तु राक्षसे ।
पन्नगस्त्वोषधीभेदे पुमान् सर्पे तु स द्वयोः ॥ १०६९ ॥
परुलस्तु द्वयोरश्वे पार्वत्यां परुला स्त्रियाम् ।
पवनस्तु पुमान् वायौ किरणे भेद्यवत् पुनः ॥ १०७० ॥
पवक्रियासाधनेऽथ पूधात्वर्थे नपुंसकम् ।
पाकस्थाने कुलालस्याप्यथ स्यात् **पत्रकं** नपि ॥ १०७१ ॥
अनुलेपनविन्यासभेदे स्यात् पत्तिसंज्ञके ।
व्यवहारगतानां च लेख्यभेदेऽथ पुंसि सः ॥ १०७२ ॥
यवक्षारविशेषे स्याद् यावशूकाह्वये त्रि तु ।
मृते **परेतो** द्वे तु स्याद् भूतजात्यन्तरे त्रि तु ॥ १०७३ ॥
पर्याप्तशब्दः स्याच्छक्ते यथेष्टे तु नपुंसकम् ।
विवारणे च तृप्तौ च **पत्रलं** तु नपुंसकम् ॥ १०७४ ॥
अघने दधिभेदे स्यात् तालीवृक्षे तु पत्रला ।
स्त्रियां सज्जातपत्रे तु त्रिष्वथ स्यान्नपुंसकम् ॥ १०७५ ॥
पत्रोर्ण धौतकौशेये ना तु दुर्ण्डुकपादपे† ।
पदारस्तु पुमान् वास्तुदेवभेदेऽङ्घ्रिधूलिषु ॥ १०७६ ॥
नपुंसकं तु विज्ञेयं पादालिन्दे विचक्षणैः ।
पतेरस्तु पुमाञ्ज्ञेयः पवने द्वे तु पक्षिणि ॥ १०७७ ॥
पयस्या तु स्त्रियां विद्यादामिक्षायां तथौषधौ ।
काकोलीनामनि त्रिस्तु दध्याज्यादौ पयोभवे ॥ १०७८ ॥
पयोहिते पयःसाधावित्याहुः शब्दवित्तमाः ।
खर्जूरे तु **परूषो** ना क्लीबलिङ्गं तु तत्फले ॥ १०७९ ॥

---

१. 'दुण्डुक' क. ङ. च. पाठः.

---

† 'दुण्डुकः शोणकाल्पयोः ।' 'पत्रोर्णं धौतकौशेये क्लीबं स्याच्छोणके पुमान् ।' इति तु मेदिनी ।

पटहस्त्वानके न स्त्री निर्घोषे युद्धवाद्यजे ।
रभसस्तु समारम्भे प्रोक्तवाञ्छन्दवित्तमः ॥ १०८० ॥

पर्कटी तु स्त्रियां प्लक्षे द्वे तु कङ्कास्थ्यपक्षिणि ।
स्त्री(द्वे?त्वे)† तु रभसेनोक्ता पूगादेर्नूतने फले ॥ १०८१ ॥

क्ली तु पूगफलेऽथो ना **पर्पटो**ऽपूपभेदके ।
भेषजस्तम्बभेदे च पर्पटी तु स्त्रियामियम् ॥ १०८२ ॥

भवेद् दारुहरिद्रायामाढकीसंज्ञमृद्यपि ।
पण्डितस्तु द्वयोर्ज्ञेयः स्यान्मृगे सूकराकृतौ ॥ १०८३ ॥

रभसस्तु नरि प्राह निर्यासे सिल्हकाह्वये ।
त्रि तु स्याद् विदुषि स्त्री तु **पतिघ्नी** कन्यकान्तरे ॥ १०८४ ॥

वैधव्यलक्षणोपेते त्रि तु हन्तर्यमानुषे ।
पत्युः स्यात् **प्लवग**स्तु द्वे कपौ भेकेऽप्यथ द्वयोः ॥ १०८५ ॥

प्लवङ्गः स्यात् कपौ भेकेऽप्यथ स्यात् **प्लवको** द्वयोः ।
कपौ भेकेऽप्यथ द्वे स्यात् **प्लवङ्गः** कपिभेकयोः ॥ १०८६ ॥

पन्नगस्त्वोषधीभेदे पुमान् द्वे तु भुजङ्गमे ।
प्रवालस्त्वस्त्रियां वृक्षपल्लवस्याङ्कुरे भवेत् ॥ १०८७ ॥

नवपल्लव इत्यन्ये वीणादण्डेऽपि विद्रुमे ।
प्रलम्बस्तु पुमान् दैत्यविशेषे च लताङ्कुरे ॥ १०८८ ॥

प्रलम्बने तु नृस्त्री स्यात् प्रलम्बितरि तु त्रिषु ।
प्रधानं साङ्ख्यतत्त्वे क्ली प्रकृत्याख्येऽजयः पुनः ॥ १०८९ ॥

परमात्मनि बुद्धौ च महामात्रेऽप्यधीतवान् ।
मुख्ये मुख्ये पुनः केचित् विभाषा त्रि तु मन्वते ॥ १०९० ॥

---

† 'पर्कटी नूतनफले पूगादेः प्लक्षपादपे' इति विश्वमेदिन्यौ ।

प्रतापिनि **प्रचण्डस्त्रिर्ना** श्वेतकरवीरके ।
प्रकाण्डस्त्वस्त्रियां मूलस्कन्धयोरन्तरे तरोः ॥ १०९१ ॥

प्रशस्तेऽप्यजयस्त्वाह विटपेऽथ **प्रकाशवाक्** ।
पुंस्यर्चिषि च दीप्तौ च तुल्येऽपि त्रि स्फुटेऽपि च ॥ १०९२ ॥

प्रक्षरं क्लीं तुरङ्गादेः सन्नाहे प्रखराह्वये ।
त्रिषु त्वतिक्षरितरि **प्रखर**स्त्वस्त्रियामयम् ॥ १०९३ ॥

प्रक्षरे त्रिस्त्वतिखरे खलेऽथ **प्रवर**स्तु ना ।
कृष्णमुद्गेऽठिचलवणे पुनः क्लीं त्रि तु सत्तमे ॥ १०९४ ॥

प्रतीकोऽवयवे ना त्रिः प्रतिकूलानुरूपयोः ।
प्रग्रीवमस्त्री कलशे ग्रीवाप्रासादयोरपि ॥ १०९५ ॥

प्रकरस्ततपुष्पादौ स्यात् प्रकीर्णसमूहयोः ।
क्लीवं त्वगुरुसंज्ञे स्याद् गन्धद्रव्येऽथ पुंस्ययम् ॥ १०९६ ॥

प्ररूढो यवभेदे स्यान्महायव इति श्रुते ।
त्रिस्तु प्राप्तप्ररोहेऽथ **प्रत्यूषो**ऽस्त्री प्रभातके ॥ १०९७ ॥

प्रत्यूषितरि तु त्रिः स्यात् **प्रसूतं** त्वभिधेयवत् ।
स्यात् कृतप्रसवे जाते प्रेरिते कुसुमे तु नप् ॥ १०९८ ॥

सारथौ तु पुमांस्त्री तु प्रसूता सूतिमस्त्रियाम् ।
प्रतिभस्तु पुमान् नाट्यप्रसिद्धे स्याद् विदूषके ॥ १०९९ ॥

स्त्रियां तु प्रतिभासे स्यात् प्रतिभा भव्यवत् पुनः ।
प्रतिभातर्यथ पुमान् दत्तस्य तु नपुंसकम् ॥ ११०० ॥

प्रसभं स्याद् बलात्कारे ना तु वेगे त्रिषु त्वयम् ।
स्यात् प्रकृष्टसभादौ च **प्रवण**स्तु चतुष्पथे ॥ ११०१ ॥

ना त्रि तु क्रमनिम्नोर्वीतले प्रह्वेऽप्यथो पुमान् ।
वणिग्गृहे स्यात् **पणिको** याज्ञिकानां तु विश्रुते ॥ ११०२ ॥

---

१. 'कूलयोः' क. ङ. च. पाठः. २. 'सु' ग. पाठः. ३. 'स' ङ. च. पाठः.

पुरोडाशस्य प्रथने नप्यथ **प्राहितो**ऽस्त्रियाम् ।
मुद्गादिभित्तिनिर्वृत्ते सूपेऽथ प्रेषिते त्रिषु ॥ ११०३ ॥

प्रमथा स्त्री हरीतक्यां हरपारिषदे नरि ।
पनसः कण्टकिफलसंज्ञवृक्षे पुमान् स्मृतः ॥ ११०४ ॥

रभसस्त्वाह शब्दज्ञः कण्टकेऽपि स्त्रियां पुनः ।
रोगभेदेऽथ वृक्षस्य पनसस्य फले नपि ॥ ११०५ ॥

प्रद्युम्नो मन्मथे पुंसि प्रकृष्टद्युम्नके त्रिषु ।
प्रसृता तु स्त्रियां जङ्घासंज्ञाङ्गे पुत्रपोः पुनः ॥ ११०६ ॥

द्विमुष्टिकेऽर्धकुडुबमाने स्याद् वेणुर्पर्पटे ।
निकुब्जपाणौ च त्रिस्तु वेगिते विस्तृतेऽपि च ॥ ११०७ ॥

प्रदोषस्तु पुमान् दोषे रात्रेः प्रथमयामके ।
त्रिस्तु प्रकृष्टदोषादौ **प्रमदा** तु स्त्रियां स्त्रियाम् ॥ ११०८ ॥

स्त्रीविशेषे परे प्राहू रभसस्तूत्तमस्त्रियाम् ।
ना तु हर्षे समासार्थलिङ्गान्यूह्यानि नप् पुनः ॥ ११०९ ॥

प्रच्छन्नमन्तर्द्वारे स्याद् गृहस्यच्छादिते पुनः ।
त्रिषु **प्रभिन्न**स्तु पुमान् मत्तहस्तिन्यथ त्रिषु ॥ १११० ॥

विदारिते **प्रसन्ना** तु स्त्री सुरायामथ त्रिषु ।
अनाविलेऽथ प्रसवोन्मुखायां सुरभौ स्त्रियाम् ॥ १११ ॥

प्रस्तुता प्रकृते तु त्रिः **प्रथमं** तु त्रिषु स्मृतम् ।
आद्यप्रधानयोः स्त्री तु प्रथमा प्रतिपत्तिथौ ॥ १११२ ॥

आद्यायां च विभक्तौ च स्यात् पुनस्तिङ्विभक्तिषु ।
आदितास्त्रितये पुंसि **प्रथन**स्तु पुमानयम् ॥ १११३ ॥

मुद्रे क्लीबं तु विस्तावना तु स्याद् विसारणे[1] ।
प्रकाशनायां प्रथना क्लीबं तु **प्रधनं** युधि ॥ १११४ ॥

---

१. 'स' ग. पाठः. २. 'सर्पणे' ग. पाठः.

त्रिः प्रकृष्टधने ना तु **पदाजि**(द्यु?र्यु)[1]द्धमार्गयोः ।
त्रिस्तु स्यात् पदगेऽथादौ **प्रभृतिः** स्यात् स्त्रियामियम् ॥ १११५ ॥
त्रि तु प्रकृष्टभृत्यादौ **पर्णसि**स्तु पुमानयम् ।
उलूखले बहुत्वे च शाकादौ चाथ शब्दवित् ॥ १११६ ॥
धनञ्जयः शाकवर्य इत्याह क्ली तु वारिणि ।
प्रदाकु[2]स्तु द्वयोर्व्याघ्रे भेकाजगरयोरपि ॥ १११७ ॥
प्रस्तोता तु पुमान् ऋत्विग्भेदे साम्नो हि गातरि ।
प्रस्तावभक्तेः प्रस्तावकरे तु त्रिर्द्वयोः पुनः ॥ १११८ ॥
परभृद् वायसे (स्त्री तु?त्रिस्तु) परभर्तरि ना पुनः ।
पथिकृद् वर्त्महोमाग्नौ त्रि तु मार्गस्य कर्तरि ॥ १११९ ॥
अथ त्रिषु **पयस्वत्** स्यात् पयस्विन्यथ सा स्त्रियाम् ।
पयस्विनी निशानद्योः **प्रजावत्** तु त्रि सप्रजे ॥ ११२० ॥
स्त्री तु प्रजावती भ्रातृ[3]भार्यायां वैजयन्तिके ।
पुनः **पताकी** त्रिः स्त्री तु सेनायां स्यात् पताकिनी ॥ ११२१ ॥
प्रलोभशीले तु त्रिः स्यात् **प्रलोभी** स्यात् तु पुंस्ययम् ।
*किङ्किराताह्वये पुष्पस्तम्बे **प्रत्यर्थि**वाक् तु ना ॥ ११२२ ॥
शत्रौ स्याद् भेद्यलिङ्गं तु प्रतियोगिनि ना पुनः ।
पलाशी पादपे द्वे तु राक्षसे भेद्यवत् पुनः ॥ ११२३ ॥
मांसादिनि **प्रसत्वा** तु वायौ नाथ प्रसत्वरी ।
मातरि प्रतिपत्तौ च स्त्री **प्रतीत्वा** तु मारुते ॥ ११२४ ॥
पुमांस्त्री तु विधिज्ञायां स्त्रियां ज्ञेया प्रतीत्वरी ।
प्रचेता वरुणे वह्नौ ना त्रिस्तूत्कृष्टचेतसि ॥ ११२५ ॥

---

१. 'प' ग. पाठः. २. 'तु' क. ङ. च. पाठः. ३. 'तुर्भा' ङ. च. पाठः.

---

† पदाजिर्युधि मार्गे च' (पृ. २४३. श्लो. ५४) इति वैजयन्ती । * 'किङ्किराते किङ्किराटः प्रलोही चापि लातकः' (पृ. ६०. श्लो. १८९) इति तु वैजयन्ती ।

प्राकाशस्तु पुमाञ्ज्ञेयः कुण्डलाभरणे त्रि तु ।
प्रकाशसम्बन्धिनि हि **प्राणदस्तु** चिकित्सके ॥ ११२६ ॥

ना प्राणस्य पुनस्त्रि स्याद् दातरि प्राणदा पुनः ।
हरीतक्यामृद्धिनाम्न्यामोषधौ च नपि त्वदः ॥ ११२७ ॥

प्रालम्बमृजुलम्बिन्यां कण्ठात् स्यात् कुसुमस्रजि ।
स्त्री तु प्रालम्बिका स्वर्णललन्त्यामथ **पार्थिवः** ॥ ११२८ ॥

पुमान् नृपे त्रिषु पुनः पृथिव्यां विदिते तथा ।
पृथिव्याश्च विकारे स्यादिदमर्थादिकेऽपि च ॥ ११२९ ॥

तत्र स्त्र्यर्थे यदा वृत्तिः पार्थिवा पार्थिवीति च ।
रूपद्वयं तथा ज्ञेयं **पानीयं** तु जले नपि ॥ ११३० ॥

त्रिः पातव्येऽथ **पादातं** क्लीबं स्यात् पत्तिसंहतौ ।
पदातिसम्बन्धिनि तु त्रिः पदातौ च कीर्तितः ॥ ११३१ ॥

पादपस्तु पुमान् वृक्षे पादपीठेऽप्यथ स्त्रियाम् ।
पादपा पादुकायां स्यात् पादरक्षे तु भेदवत् ॥ ११३२ ॥

सहस्रदंष्ट्रसंज्ञे तु **पाठीनो** द्वे झषान्तरे ।
गुल्गुलौ तु नृलिङ्गः स्यादित्याह रभसः कविः ॥ ११३३ ॥

पारदः पारते कैश्चित् कथितः पुंसि भूम्नि तु ।
उदीच्यनीवृद्भेदे स्युस्त्रि तु पारस्य दातरि ॥ ११३४ ॥

प्राणकस्तु प्राणिनि त्रि ना तु स्याज्जीवकद्रुमे ।
पायसोऽस्त्री दुग्धसिद्ध ओदने पुंसि तु स्मृतः ॥ ११३५ ॥

श्रीवेष्टाह्वयनिर्यासे पयःसम्बन्धिनि त्रिषु ।
पारुष्यस्तु पुमानुक्तो गीष्पतौ रभसेन वै ॥ ११३६ ॥

परुषत्वे शक्रवने तेनैव क्लीबमीरितम् ।
पांसुला तु स्त्रियां भूमौ कुलटोदक्ययोस्त्रि तु ॥ ११३७ ॥

पांसुमत्यथ नव्लिङ्गमूषजे लवणे त्रि तु ।
पांसुजः पांसुजातेऽथ द्वयोः **पालूर**[1] इत्ययम् ॥ ११३८ ॥

दूतेऽन्ध्रराज्यैनगरभेदे क्लीबमथो नपि ।
रक्तोत्पले **पाणिकं** ना त्वशीतौ पणनामनि ॥ ११३९ ॥

कपर्दानां **पावनं** तु प्रायश्चित्ते जले च नप् ।
त्रि तु स्यात् पावयितरि पवितर्यप्यथो नपि ॥ ११४० ॥

सोमोन्माने याज्ञिकानां **पाटक**स्त्वस्त्रियामयम् ।
ग्रामा(र्धे ? र्धे)* त्रिः पटितरि तथा पाटयितर्यपि ॥ ११४१ ॥

पाटलस्तु पुमानाशुसंज्ञस्त्रीद्यन्तरे भवेत् ।
श्वेतलोहितसम्मिश्रवर्णभेदेऽथ तद्वति ॥ ११४२ ॥

त्रि स्त्री तु तद्वर्णाख्यायां पाटला पाटलिर्द्वयोः ।
पुष्पे तु तस्य नप् स्त्री स्यात् पाटलं पाटलेति च ॥ ११४३ ॥

पात्रट[2]स्तु कृशे त्रि स्यात् कर्परे[3]‡ तु पुमानयम् ।
पाण्डुरं क्ली मरुवके शुक्ले ना तद्वति त्रिषु ॥ ११४४ ॥

पालकस्तु पुमान् हस्तिशिरोमध्यस्य पार्श्वयोः ।
गजज्वरे द्वयोस्त्वश्वे क्ली तु कुष्ठाम्ल्यभेषजे ॥ ११४५ ॥

पाचलो राधनद्रव्ये पुमान् स्यात् पँचने तु नप् ।
पारिन्दस्तु पुमान् वृक्षे गाथके त्वभिधेयवत् ॥ ११४६ ॥

पालिकस्तु पुमान् वृक्षे नृपतौ चाथ मेद्यवत् ।
गाथके रक्षके मुख्ये पूज्ये चाप्यथ **पालुकः** ॥ ११४७ ॥

---

१ 'लु' क. ङ. च. पाठः. २. 'ज' ग. पाठः. ३. 'क' क. च. पाठः. ४. 'व' क. च., 'पवने' ङ. पाठः.

---

† पालूक इति दासपर्यायो वैजयन्त्याम् । * 'पाटको रोधसि ग्रामैकदेशेऽक्षादिपातके' इति हेमचन्द्रः । ‡ 'पात्रटः कर्परे पुंसि कृशे स्यादभिधेयवत्' इति तु मेदिनी ।

लघुवाचिनि सूपे ना स्यादध्वर्यौ च स त्रिषु ।
सूपकारे **पार्वत**स्तु पुमान् निम्बद्रुमे त्रि तु ॥ ११४८ ॥

स्यात् पर्वतभवादौ स मनुष्ये स्त्री तु पार्वती ।
उमायामाढकीसंज्ञमृद्भेदे रभसः पुनः ॥ ११४९ ॥

गोपालपत्रिकायां च गजभक्ष्याख्यभूरुहे ।
पातकस्त्वस्त्रियां पापे त्रिस्तु पातयितर्यपि ॥ ११५० ॥

पतितर्यप्यथ स्त्री स्यात् **पादिका** मन्दिरस्य या ।
अल्पा स्थूणा भवेत् तस्यां त्रिस्तु पत्तर्यथो भवेत् ॥ ११५१ ॥

पाटलिः पाटलासंज्ञपुष्पवृक्षे नरस्त्रियोः ।
विवाहार्थे पुनः शङ्खपात्रे स्यात् पाटली स्त्रियाम् ॥ ११५२ ॥

प्रियकस्तु पुमान् वृक्षे कदम्बाख्येऽसनद्रुमे ।
फलाध्यक्षाह्वये चापि फलिनीसंज्ञके तथा ॥ ११५३ ॥

तेषां तु प्रसवे क्लीबं मृगभेदे तु स द्वयोः ।
तस्य लक्षणमप्युक्तं मृगज्ञैः पूर्वसूरिभिः ॥ ११५४ ॥

घनैर्मृदूच्चमसृणै रोमभिश्चापि संयुतः ।
नीलपाण्डररेखावाञ्छ्वेतचन्द्रक एव वा ॥ ११५५ ॥

इत्येवमथ पुंसि स्यात् **पिङ्गलः** कमलासने ।
ऋषिभेदे रवेः पारिपार्श्विकान्यतमेऽपि च ॥ ११५६ ॥

रभसस्त्वाह वह्नौ च मुकुन्दे च बहुश्रुतः ।
पिशङ्गवर्णे च त्रिस्तु तद्वति स्त्री तु पिङ्गला ॥ ११५७ ॥

दिग्गजान्यतमस्य स्यात् करिण्यां च जलौकसाम् ।
षण्णामन्यतमायां स्यान्निर्विषाणामिति स्मृतिः ॥ ११५८ ॥

शरीरनाडिभेदे च पक्षिजात्यन्तरेऽपि च ।
महाभारतविख्यातवेश्याभेदे च भाषितः ॥ ११५९ ॥

ब्रह्मरीतिसमाख्ये च लोहभेदे नपि त्वदः ।
ह्रीबेरे द्वे तु मार्जारे नकुले मर्कटेऽप्यथ ॥ ११६० ॥

पिनाकोऽस्त्री महादेवचापे शूलाह्वयायुधे ।
रजोवर्षे च दण्डे च **पिण्याक**स्त्वस्त्रियामयम् ॥ ११६१ ॥

श्रीपिष्टाख्ये च निर्यासे कुङ्कुमे हिङ्गुकिण्वयोः ।
तुरुष्काख्ये च निर्यासे यवानीतिलकल्कयोः ॥ ११६२ ॥

पिशाचस्तु द्वयोर्देवजातिभेदेऽथ भेद्यवत् ।
उन्मादिनीत्ययं चार्थः शाकटायनभाषितः ॥ ११६३ ॥

पियालस्तु पुमाञ्ज्ञेयः सन्नकद्रुरिति श्रुते ।
राजादनाख्यवृक्षे स्याद् क्ली तु तत्प्रसवेऽथ सा ॥ ११६४ ॥

द्राक्षायां स्यात् पियालाथ **पिशितं** स्यान्नपुंसकम् ।
मांसे स्त्रियां तु मांस्यां स्यात् **पिण्डिल**स्तु पुमानयम् ॥ ११६५ ॥

मेघे हिमे तु क्ली त्रिस्तु गणके **पिण्डित**स्तु ना ।
तुरुष्कसंज्ञनिर्यासे त्रिस्तु स्याद् गणिते घने ॥ ११६६ ॥

पिण्डिकस्तु पुमान् गेहावयवेऽलिन्दसंज्ञके ।
पिण्डिका तु स्त्रियां नाभौ रथचक्रस्य हस्तिनः ॥ ११६७ ॥

पादावयवभेदे च जङ्घापिण्डेऽथ **पिञ्जरम्** ।
हरिताले भवेत् क्लीबं मिश्रवर्णान्तरे तु ना ॥ ११६८ ॥

पीतरक्ते तद्वति तु त्रिष्वथो **पिशुना**स्त्रिषु ।
खलसूचकयोर्हर्षनन्दी त्वेनमवोचत ॥ ११६९ ॥

मन्त्रभेदे कवचने परेषां चापवादिनि ।
क्लीबं तु कुङ्कुमे रूपे कपिवक्त्रे त्वभाषत ॥ ११७० ॥

रभसः शब्दविच्छ्लेष्ठः पिशुना तु स्त्रियामियम् ।
स्पृक्कायां स्यात् **पिशीलं** तु क्लीबमंसद्वयान्तरे ॥ ११७१ ॥

पिशीली तु स्त्रियां वीणाभेदे त्रिषु तु **पिच्छिलः** ।
पिच्छाख्यगुणसंयुक्ते विजिलाख्ये‡ स्त्रियां पुनः ॥ ११७२ ॥

पिच्छिला शिंशपायां च पोतक्यां शल्मलावपि ।
सिन्धुभेदे च रभसः कीर्तयामास ना पुनः ॥ ११७३ ॥

पिच्छोलः सरलाभिख्यतरौ कटविशेषके ।
कटोलसंज्ञे वंशे च वीणाभेदे तु सा स्त्रियाम् ॥ ११७४ ॥

पिच्छोला ना तु **पिच्छूलो** राशौ लिङ्गत्रये पुनः ।
पिच्छूली स्यात् तृणस्तम्बे **पिप्पलं** तु जले नपि ॥ ११७५ ॥

वस्त्रच्छेदप्रभेदे च सूचीसूत्रे पि चूचुके ।
वृक्षाणां च फले ना तु स्यादश्वत्थेऽथ पिप्पली ॥ ११७६ ॥

हस्तिनः कर्णमूले च कणायां च स्त्रियामियम् ।
मृज्यमानेति वर्गस्य सामभेदे च सप्तमे ॥ ११७७ ॥

इमां निरङ्गुले पक्षिभेदे च रभसोऽब्रवीत् ।
†**पिदार**स्तु क्षपणके नृलिङ्गः परिकीर्तितः ॥ ११७८ ॥

द्वयोस्तु विद्याद् गोपे च महिषीरक्षकेऽपि च ।
पिप्परस्तु पुमान् वृक्षभेदे स्यात् स्त्री तु पिप्परी ॥ ११७९ ॥

अन्यत्र पिप्परा वृक्षभेदे स्यात् **पिठरं** तु नप् ।
मन्थानदण्डेऽपि प्राह रभसः शब्दवित्तमः ॥ ११८० ॥

मुस्तके पिठरी तु स्यात् स्थाल्यां स्त्री शण्डलिङ्गकः[1] ।
स्थाल्यां तूक्त्वा पृथग् ब्रूत उखायां शाकटायनः ॥ ११८१ ॥

पित्तलं त्वारसंज्ञे क्ली लोहभेदे स्त्रियां पुनः ।
पित्तला तोयपिप्पल्यां त्रिस्तु पित्तकरे भवेत् ॥ ११८२ ॥

---

१. 'कीलकः' क. ग. 'कीलसः ।' च. पाठः.

---

‡ 'अथ पिच्छिलः । विज्जले' इति तु हेमचन्द्रः । † 'पिण्डारः क्षपणे गोपे महिषीरक्षके द्वयोः । 'इति तु मेदिनी ।

प्रियङ्गुस्तु फलिन्यां स्त्री कङ्गुधान्ये च नप् पुनः ।
कुङ्कुमे **पीवरं** त्वेतत् स्थूले स्याद् भेद्यलिङ्गकम् ॥ ११८३ ॥
शतावरीति विख्याता यौषधिस्तत्र पीवरी ।
स्त्रियामथ पुमाञ्ज्ञेयः **पीतनः** पादपान्तरे ॥ ११८४ ॥
आम्रातकाख्ये क्लीबं तु हरितालेऽपि कुङ्कुमे ।
पीनसस्तु प्रतिश्याये नाऽथ मण्डलिसंज्ञिनाम् ॥ ११८५ ॥
षड्विंशतेः[1] सर्पजातिभेदानां स्याद् द्वयोरयम् ।
एकत्र भेदेऽथ क्लीबं **पुराणं** पञ्चलक्षणे ॥ ११८६ ॥
ग्रन्थभेदे पुमांस्तु स्यात् कार्षिके त्रिश्चिरन्तने ।
यदा तत्र स्त्रियां वृत्तिः पुराणा च पुराण्यपि ॥ ११८७ ॥
रूपद्वयं तदाऽथ स्याद् विमाने धनदस्य हि ।
पुष्पकोऽस्त्री द्वयोस्तु स्याद् द्वादशानां तु भोगिनाम् ॥ ११८८ ॥
निर्विषाणामेकजातौ त्रिषु पुष्पितरि स्मृतः ।
पुष्पाढ्यस्तु स्वयं शीर्णपुष्पमूलफलाशने ॥ ११८९ ॥
व्रतिभेदे त्रिषु पुनः समृद्धे कुसुमैरथ ।
पुल्कसः स्याद् द्वयोर्मर्त्यजातिभेदे यदुद्भवः ॥ ११९० ॥
करण्यामपि चण्डालात् क्षत्रियायां च शूद्रतः ।
पुष्करं करिहस्ताग्रे जले वाद्यमुखे युधि ॥ ११९१ ॥
खेऽब्जे दिव्यसिधारायां तीर्थभेषजभेदयोः ।
पटहे मुरवे त्वन्ये पुमांस्त्वौर्वे च मारुते ॥ ११९२ ॥
शेषे च शोभने तु स्याद् भेद्यलिङ्गमिति स्मरेत् ।
पुष्कलं भेद्यवच्छुद्धे प्रभूते शोभनेऽप्यथ ॥ ११९३ ॥
भिक्षाचतुष्टये च स्याद्दर्भिभेदे च पुंस्ययम् ।
मुष्टस्त्वष्टकाष्टके तु क्ली तथा धान्यहिरण्ययोः ॥ ११९४ ॥

---

१. 'के' ग. ङ. पाठः.

पुरुषस्तु द्वयोर्मर्त्ये ना तु जन्तौ सशेफके ।
पुन्नागवृक्षे द्वृहिणे क्षेत्रज्ञे साङ्ख्यचवेदिनि ॥ ११९५ ॥

पुलिन्दस्तु द्वयोर्मर्त्यजातिभेदेऽस्य लक्षणम् ।
किरात्यां निष्ट्यपूर्वायां शबराज्जात इत्यदः ॥ ११९६ ॥

निष्ट्यादनन्यपूर्वायां किरात्यां जनितेऽपि च ।
पुन्नागस्तु पुमान् पूज्यपुरुषे पुङ्गजे तथा ॥ ११९७ ॥

पुंसर्पे च तथा वृक्षे देववल्लभसंज्ञके ।
क्ली तु तत्प्रसवेऽथो ना **पुलको** रोमहर्षणे ॥ ११९८ ॥

रत्नभेदे च खड्गादिस्थितास्वणुषु राजिषु ।
रभसस्त्वाह §गल्वर्कमणिदोषप्रभेदयोः ॥ ११९९ ॥

हरितालेऽप्यथ द्वे स्यात् कृमिभेदेऽथ शब्दवित् ।
शाकटायन आह स्म स्वशास्त्रे **पुरुटः** पुमान् ॥ १२०० ॥

स्त्रीपुंसयोश्च दम्पत्योः परैरसहने[1] भवेत् ।
संला(पस्तु? पे च) द्वयोस्तु स्याज्जलजन्तावथ त्रिषु ॥ १२०१ ॥

पुटितं पाटिते स्यूते क्ली तु वस्तिपुटे त्रि तु ।
पुष्पवत् स्यात् सकुसुमे स्त्री तु पुष्पवती भवेत् ॥ १२०२ ॥

रजस्वलायां क्लीबं तु **पूरणं** पूर्तिकर्मणि ।
अना तु पूरयत्यर्थे पूरणा स्त्री तु पूरणी ॥ २२०३ ॥

पुनर्नवाजातिभेदे स्वरूपेऽथो शल्मलावपि ।
पुनर्नवायां तु पुमान् पूरणः पूर्यते पुनः ॥ १२०४ ॥

येन त्रि तत्र ना तु स्यात् कलायाह्वयधान्यके ।
पूरकोऽपूपभेदे तु पूरिका स्त्री त्रिषु त्वदः ॥ १२०५ ॥

---

१. 'हसने' ग. पाठः.

---

§ गल्वर्कश्चषकः ।

स्यात् पूरयितृपूरित्रोः **पूत्यण्ड**स्तु द्वयोरयम् ।
क्षुद्रपक्षिविशेषे स्यादण्डकारकसंज्ञके ॥ १२०६ ॥

गन्धकीटे तु रभसः कथयत्यथ **पूर्णिका** ।
स्त्री पौर्णमास्यां स्यात् पक्षिजातिभेदेऽप्यथ त्रिषु ॥ १२०७ ॥

परिपूर्णसुखादौ स्याद् बिन्दौ तु **पृषतः** पुमान् ।
देहवैकृतभेदे च पृश्निसंज्ञे त्रिषु त्वमुम् ॥ १२०८ ॥

श्वेतबिन्दुयुते प्राह रभसोऽथ द्वयोरयम् ।
मृगभेदे तस्य चोक्तं लक्षणं प्रकृते मृगे ॥ १२०९ ॥

ताम्रस्तु हरिणः प्रोक्त इत्युक्त्वा हरिणं ततः ।
शम्बरस्त्वल्पहरिणः पृषतस्तु स बिन्दुमान् ॥ १२१० ॥

इत्येवं **पृथुक**स्तु स्यात् पुमांश्चिपिटसंज्ञके ।
भक्षभेदे द्वे तु बाले **पृदाकु**[2]स्तु पुमानयम् ॥ १२११ ॥

ऋषिभेदे गोत्रकृति द्वे तु वृश्चिकसर्पयोः ।
पेचको ना हस्तिपुच्छमूलोपान्ते द्वयोः पुनः ॥ १२१२ ॥

उलूके पेचिका तु स्त्री पिङ्गलासंज्ञपक्षिणि ।
पेटकस्तु द्वयोर्वृन्दे पिटके तु पुमानयम् ॥ १२१३ ॥

पेलवं तु त्रिषु मृदौ मरिचे[3] तु नपुंसकम् ।
प्रेरित्वा तु समुद्रे ना स्त्री तु प्रेरित्वरी पुरि ॥ १२१४ ॥

पोगण्डस्तु द्वयोर्यूनि विकलाङ्गे तु भेदवत् ।
प्रोक्षण्यस्तु स्त्रियो यज्ञकारिणामप्सु कासुचित् ॥ १२१५ ॥

प्रोक्षणं तु वधे यज्ञपशोरभ्युक्षणेऽम्भसा ।
पौरुषं तु नपि प्रोक्तं पुंसः स्याद् भावकर्मणोः ॥ १२१६ ॥

शौर्ये रेतसि च त्रिस्तु पुंसः सम्बन्धिवस्तुषु ।
ऊर्ध्वविस्तृतदोःपाणिनृमानेऽथ नृलिङ्गकः ॥ १२१७ ॥

---

१. 'न्ध' क. ग. च. पाठः. २. 'न्दा' क. ङ. च. पाठः. ३. 'री' ग. पाठः.

स्याद् रावणे वैश्रवणे **पौलस्त्योऽयं** द्वयोः पुनः ।
पुलस्त्यवंश्ये विज्ञेयः क्ली तु युद्धेऽप्यथास्त्रियाम् ॥ १२१८ ॥
काष्ठासने स्यात् **फलकं** शस्त्राणां च निवारणे ।
खेटकाख्येऽथ फलकी मत्स्यजात्यन्तरे स्त्रियाम् ॥ १२१९ ॥
भवेच्चित्रफलीसंज्ञे तथा स्याच्चन्दनेऽपि च ।
क्षुमासंज्ञे तु ना धान्ये **फल्गुनी** तु स्त्रियामियम् ॥ १२२० ॥
भगदैवतनक्षत्रे तथैवार्यमदैवते ।
ताभ्यां युक्ते कालमात्रे जाते त्वत्र त्रि फल्गुनः ॥ १२२१ ॥
स्त्र्यर्थे वृत्तिर्यदा तत्र तदा स्यात् फल्गुनी स्त्रियाम् ।
फल्गुनस्तु पुमानेव ज्ञेयो मध्यमपाण्डवे ॥ १२२२ ॥
फक्किका तु स्त्रियामेकग्रन्थे गौरे च सर्षपे ।
त्रिस्तु फक्कितरि त्रिस्तु **फलकी** चर्मपाणिके ॥ १२२३ ॥
स्त्री त्वजायां फलकिनी पौर्णमास्यां तु **फाल्गुनी** ।
फल्गुन्या संयुतायां स्त्री सा तु मासेऽस्ति यत्र हि ॥ १२२४ ॥
तत्र ना फाल्गुनः क्ली तु तृणजात्यन्तरेऽथ नप् ।
फाणितं गौडविकृतिभेदेऽथ क्वाथिते त्रिषु ॥ १२२५ ॥
फेनिलस्तु पुमान् वृक्षविशेषेऽरिष्टसंज्ञके ।
त्रिस्तु फेनवति क्ली तु विज्ञेयं बदरीफले ॥ १२२६ ॥
बन्धुरस्तु द्वयोर्हींसे त्रिस्तु सुन्दरनम्रयोः ।
उन्नतानत इत्यन्ये रभसस्त्वस्त्रिया(मि?म)यम् ॥ १२२७ ॥
बन्धूके पक्षिभेदे चेत्यथ **बन्धूर** इत्यमुम् ।
एष्वेवार्थेषु रभसस्तत्तल्लिङ्गमवोचत ॥ १२२८ ॥
बहुलस्तु पुमानग्नौ कृष्णपक्षे च नीपके ।
त्रिस्तु कृष्णे प्रभूते च कृत्तिकाकालजातके ॥ १२२९ ॥

---

१. 'च' ग. पाठः.

स्त्रियां तु बहुला भूम्यामेलायां सुरभावपि ।
श्वेतायां चाथ रोदस्यौ द्विवचो बहुले इति ॥ १२३० ॥

स्त्रीभूम्नि कृत्तिकासु स्याद् **बर्हिणं** तु नपुंसकम् ।
ज्ञेयं भारतवर्षस्थद्वीपभेदे द्वयोः पुनः ॥ १२३१ ॥

मयूरे बर्हवति तु भेद्यवद् **बदरी** पुनः ।
अजगन्धाह्वयस्तम्बे कुवलीसंज्ञपादपे ॥ १२३२ ॥

ईश्वरस्थानभेदे च स्त्रियां स्याद् बदरा पुनः ।
विष्वक्सेनप्रियासंज्ञस्थावरे परिकीर्तिता ॥ १२३३ ॥

कार्पासीति प्रसिद्धे च गुल्मे स्याद् बदरं तु नप् ।
एषां स्यात् प्रसवेऽथ स्यान्म्लेच्छजात्यन्तरे द्वयोः ॥ १२३४ ॥

बर्बरो बर्बरा तु स्त्री स्तम्बे यस्याह्वयान्तरम् ।
अजगन्धेति ना तु स्याद् भार्ङ्गिसंज्ञकभेषजे ॥ १२३५ ॥

बन्धूकस्तु पुमान् बन्धुजीवाख्ये पुष्पगुल्मके ।
रभसस्त्वसनाभिख्यपादपेऽप्यपठीदिदम् ॥ १२३६ ॥

प्रसवे त्वनयोरेतन्नबूलिङ्गमवधारयेत् ।
पशुबन्धनरज्जौ तु **बन्धनी** स्त्री नपि त्वदः ॥ १२३७ ॥

बन्धनं स्यात् संयमने त्रि तु बन्धस्य साधने ।
बन्धे तु रभसः प्राह **बन्धकी** तु स्त्रियामियम् ॥ १२३८ ॥

कुलटायां तथानाप्तसत्कृतिर्वेशगामिनी ।
अर्थाय या स्त्री तस्यां च करिण्यां चाह शब्दवित् ॥ १२३९ ॥

निघण्टुकारो रभसो बन्धरि त्वेष भेद्यवत् ।
आधौ तु बन्धकं क्लीबे **बल्बूरस्तूपले** पुमान् ॥ १२४० ॥

स्तने च द्वे तु मत्स्येऽथ **बर्हिष्ठं** स्यान्नपुंसकम् ।
ह्रीबेरे त्रिस्तु महति काके तु **बलिभुग्** द्वयोः ॥ १२४१ ॥

---

१. 'ङ्गां' ङ. च., 'जौ' ग. पाठः. २. 'क' ग. पाठः.

बलेस्तु भोक्तरि त्रि स्याद् विप्रे तु **ब्राह्मणो** द्वयोः ।
आत्मज्ञे च नपि त्वेतद् वेदभागेऽभिधायके ॥ १२४२ ॥
तस्यावयवभेदे च भाङ्गर्यां तु ब्राह्मणी स्त्रियाम् ।
हरेणुस्पृक्कयोश्चापि ब्रह्मरीत्याख्यलोहके ॥ १२४३ ॥
पिपीलिकाजातिभेदे पिङ्गे महति किञ्च ताम् ।
विद्यादज्ञनिकासंज्ञजन्तोर्जात्यन्तरेऽपि च ॥ १२४४ ॥
रक्तपुच्छे **बाभ्रवं** तु बभ्रुसम्बन्धिनि त्रिषु ।
बभ्रोस्तु वंश्ये द्वे स्त्री तु पार्वत्यां बाभ्रवी स्मृता ॥ १२४५ ॥
अथात्र रभसेनोक्ता न स्त्री दृक्कर्णयोर्मले ।
गणिस्थराजे (?) पुल्लिङ्ग इत्येवं बहुवेदिना ॥ १२४६ ॥
बाहुदा तु नदीभेदे स्त्री त्रिषु त्वेष दातरि ।
बाहोर्बहुप्रदस्यापि सम्बन्धिन्यत्र तु स्मरेत् ॥ १२४७ ॥
स्व्यर्थे वृत्तिर्यदा रूपं बाहुदीति तदा भवेत् ।
बाहुजस्तु द्वयोः कीरे क्षत्रिये च पुमान् पुनः ॥ १२४८ ॥
स्वयज्ञाततिले बाहुसम्भवे त्वभिधेयवत् ।
बाह्लीकं तु नपि प्रोक्तं हिङ्गुकुङ्कुमयोस्तथा ॥ १२४९ ॥
कश्चित् त्वाह कुसुम्भेऽपि पुम्भूमनि तु बोधत ।
नीवृद्भेदेऽथ तद्देशजातजन्तुषु स द्वयोः ॥ १२५० ॥
विशेषात्[1] त्वाह तद्देशजातेष्वश्वेषु कश्चन ।
अथानेन समानार्थस्तुल्यलिङ्गश्च **बाह्लिकः** ॥ १२५१ ॥
बार्हे[2]**रस्तु** पुमान्[3] मेलानन्दायां† दिवसे(पि?तु) नप् ।
बालकस्तु पुमान् कृष्णशालौ त्रिस्त्वतिबालिशे ॥ १२५२ ॥

---

१. 'षे त्वा' च. पाठः. २. 'ह्' ग. पाठः. ३. 'नेला' ग. पाठः.

---

† 'मेलानन्दो मषिघटी' (पृ. १३८. श्लो. २५) इति वैजयन्ती ।

बालेयो गर्दभे द्वे स्याद् दैत्ये चाथ खले त्रिषु ।
मृदौ बलिहिते चेति रभसेन समीरितम् ॥ १२९३ ॥

बाहुलस्तु पुमान् मासि कार्त्तिकेऽथ नपुंसकम् ।
बाहुत्राणकयन्त्रे हि योधानां भेद्यवत् पुनः ॥ १२९४ ॥

भवेद् बहुलसम्बन्धिन्यथ क्ली **बार्हतं** फले ।
बृहत्या बृहतीसंज्ञच्छन्दस्यप्यथ भेद्यवत् ॥ १२९५ ॥

बृहत्या बृहतश्चापि सम्बन्धिन्यथ **बान्धवः** ।
द्वे बन्धौ त्रि तु बन्धोः स्यात् सम्बन्धिन्यथ न स्त्रियाम् ॥ १२९६ ॥

बिदलैः पाटिते काष्ठे परे वेणुदले विदुः ।
द्विधाकृते तु मुद्गादौ कश्चिदाचष्ट ना पुनः ॥ १२९७ ॥

बीभत्सुः कथितः पार्थे नाट्यस्थे च रसान्तरे ।
तद्वदर्थे पुनस्त्रि स्यात् क्रूरे चाथ स्त्रियामियम् ॥ १२९८ ॥

बीभत्सा स्याज्जुगुप्सायां **बुक्कणस्तु** शुनि द्वयोः ।
वावदूके पुनस्त्रि स्यादथ स्याद् **बुद्धिमान्** द्वयोः ॥ १२९९ ॥

धूम्याटाख्यस्य शकुनेर्भेदे यस्याह्वयान्तरम् ।
राजभृङ्ग इति त्रिस्तु बुद्धियुक्तेऽथ नप्यदः ॥ १३०० ॥

बृहत्कं सामभेदे स्यादागन्तेत्यृचि गीयते ।
यत् साम तस्मिन् ना तु स्यान्मणिभेदेऽस्य लक्षणम् ॥ १३०१ ॥

अत्र भर्तृहरेः श्लोकं ब्रुवते पूर्वसूरयः ।
प्रविकासिप्रभोऽल्पोऽपि महान् य उपलक्ष्यते ॥ १३०२ ॥

बृहत्क इति तत्रैष मणौ शब्दः प्रयुज्यते ।
इत्येवमथ नब्लिङ्गं बृञ्चूकं स्याज्जले द्वयोः ॥ १३०३ ॥

मातृवाहकसंज्ञे स्याज्जन्तौ सद्योऽङ्कुरे पुनः ।
बैजिको ना शिग्रुतैलहेत्वोस्तु रभसो नपि ॥ १३०४ ॥

---

१. 'स्याद्बाहुलार्णय' क. च. पाठः. २. 'लं' ग. ङ. पाठः. ३. 'स्नुः' क. ग. च. पाठः.

बैजिकादभिसम्बन्धा(दिनिः)* बीजनिमित्तके ।
प्रयोगस्तत्र भेद्यस्य लिङ्गं भवनवाक् तु नप् ॥ १२६५ ॥
उत्पत्तौ च गृहे चान्ये पुनः पुंस्यपि मन्वते ।
द्वयोस्तु स्याच्छुनि शुनि पुनर्द्वे भषणोऽथ नप् ॥ १२६६ ॥
बुक्कनाख्यक्रियायां स्याद् भरणं तु नपुंसकम् ।
वेतने धारणे चैव पोषणे भर्त्सनेऽपि च ॥ १२६७ ॥
ऋचादेर्भृणातेः स्यात् स्त्री तु नक्षत्रे यमदैवते ।
भरणी भूम्नि च प्राहुरन्येऽथो भल्लूकौ द्वयोः ॥ १२६८ ॥
वानरेऽप्यृक्षसंज्ञे च मृगेऽथर्क्षमृगे द्वयोः ।
भल्लूको ना पुनष्टुण्डुसंज्ञवृक्षेऽथ नपूस्त्रियोः ॥ १२६९ ॥
भक्षणाभ्यवहारे स्त्री पुनर्धान्ये हि भक्षणी ।
गवीथुकासमाख्येऽथ भविलं क्ली गृहेऽथ ना ॥ १२७० ॥
मुनिप्रभेदे भव्ये तु त्रिरथो भटिलो द्वयोः ।
शुनि स्यात् सेवके तु त्रिर्भण्डिलस्तु शुनि द्वयोः ॥ १२७१ ॥
पुत्रे चाथ पुमान् वृक्षे शिरीषाख्येऽथ भञ्जनम् ।
आमर्दने क्लीबलिङ्गं जानीयाद् भञ्जना त्वना ॥ १२७२ ॥
अर्थे भञ्जयतेः स्त्री तु विवृत्य वचने भवेत् ।
भञ्जना भरुजस्तु द्वे सृगाले पुंस्त्रियोः पुनः ॥ १२७३ ॥
भक्षभेदे स्नेहमृष्टतण्डुले तत्र च स्त्रियाम् ।
यदा वृत्तिस्तदा रूपं भरुजी भरुजेति च ॥ १२७४ ॥
भ्रमकस्तु द्वयोः क्रोष्टौ सूर्यावर्ते तु पुंस्ययम् ।
अयस्कान्तविशेषे च लोहेभ्रमणकारिणि ॥ १२७५ ॥

---

१. 'द' क., 'दे' ग. पाठः. २. 'छु' ग. पाठः. ३. 'च' च. पाठः. ४. 'हस्य भ्रमका' क. ङ. च. पाठः.

---

* 'दिनि' इत्यस्य स्थाने 'वादि' इति पाठ्यं स्यात् ।

रभसस्त्वेषु वाच्येषु दीर्घादिं आमकं जगौ ।
शब्दस्मृतिविरुद्धत्वात् तदस्माभिरुपेक्षितम् ॥ १२७६ ॥

भ्रमणं तु नपि भ्रान्तौ स्त्रीनपुंसकयोः पुनः ।
भ्रमणा भ्राम्यतेर्हेतुव्यापारेऽथ स्त्रियामियम् ॥ १२७७ ॥

कारुण्डिकायां भ्रमणी* क्रियाद्यायामधीशितुः ।
भ्रमरस्तु द्वयोर्भृङ्गे कामुके त्वभिधेयवत् ॥ १२७८ ॥

भट्टालं तु कपोले क्ली भेद्यलिङ्गं तु सेवके ।
भल्लाटस्तु द्वयोर्ऋक्षमृगेऽथो वास्तुवासिनाम् ॥ १२७९ ॥

देवानां स्यादन्यतमे स च ज्ञातव्य ईदृशः ।
उदक्पार्श्वस्थकोष्ठानां प्रत्यगारभ्य यो भवेत् ॥ १२८० ॥

कोष्ठश्चतुर्थस्तत्रासौ तिष्ठतीत्यथ भेद्यवत् ।
भण्डीरो योद्धरि स्त्री तु शाकवल्लचन्तरे भवेत् ॥ १२८१ ॥

मण्डूकपर्णीसंज्ञे हि भण्डीरी पुंसि तु स्मृतः ।
शाक्यक्षपणकानां स्याद् **भदन्तः** पूजनीयके ॥ १२८२ ॥

सर्वसन्यासिनि त्वाह हर्षनन्दी स सूक्ष्मदृक् ।
ताराभदन्तयुक्ते तु त्रिर्**भवन्तस्तु** ना पुनः ॥ १२८३ ॥

काले भवितरि त्वेष त्रिस्तत्रापि यदा स्त्रियाम् ।
तदा भवन्ती **भरुटः** पुनर्द्वे कुम्भकारके ॥ १२८४ ॥

कपर्दे तु पुमान् ना तु **भगवान्** हरशार्ङ्गिणोः ।
बुद्धे च त्रि तु पूज्येऽथ पार्वत्यां भगवत्यसौ ॥ १२८५ ॥

स्त्रियामथ **भविष्यत्** त्रिर्भाविनि क्ली तु वारिणि ।
भारतं त्वस्त्रियामस्मिन् वर्षेऽथो भरतस्य हि ॥ १२८६ ॥

सम्बन्धिनि त्रिषु स्त्री तु सरस्वत्यां हि भारती ।
रभसस्त्वाह पक्षिण्यामित्यर्थस्तत्र चिन्त्यताम् ॥ १२८७ ॥

---

* 'भ्रमणी स्यादधीशितुः । क्रीडादौ कारुण्डिकायाम्' इति तु हेमचन्द्रः ।

तुलसीनाम्नि च स्तम्बे नाट्यवृत्त्यन्तरेऽप्यथ ।
क्ली महाभारते ना तु **भार्गवो** गजधन्विनोः ॥ १२८८ ॥

शुक्रे परशुरामे च भार्गवी तु स्त्रियामियम् ।
हरिप्रियायां दूर्वायां पार्वत्यां चाथ **भाषणम्** ॥ १२८९ ॥

वचने नबुपालम्भवाचि तु स्त्री हि भाषणी ।
भालाङ्कस्तु[1] शिवे शाकभेदेऽपि करपत्रके ॥ १२९० ॥

महालक्षणसम्पन्नपुरुषे रोहिते च ना ।
कच्छपे तु द्वयोस्त्रिस्तु रोहिते गुणिनि स्मृतः ॥ १२९१ ॥

भावाटस्तु[2] त्रिषु ज्ञेयो भावके कामुकेऽपि च ।
ना तु साधुनिवेशे* स्याद् रभसेनेदमीरितम् ॥ १२९२ ॥

†**भारद्वाजी** तु वन्यायां कार्पास्यां स्त्री पुमान् पुनः ।
भारद्वाजो द्रोणाचार्ये द्वे भरद्वाजवंशजे ॥ १२९३ ॥

भारुण्डस्तु[3] नपि ज्ञेयः सामभेदेषु केषुचित् ।
एकोदरपृथग्ग्रीवे त्वब्धिचारिणि पक्षिणि ॥ १२९४ ॥

द्वयोः स्याद् **भावना** तु स्त्रीनपोरुत्पादने तथा[4] ।
गन्धाधिवासनायां च भाट्टास्तु प्रतिजानते ॥ १२९५ ॥

प्रवर्तनायां **भावज्ञः** पुनस्त्रिर्भाववेदिनि ।
प्रियङ्गुसंज्ञवृक्षे तु भावज्ञौ स्त्री द्वयोः पुनः ॥ १२९६ ॥

भ्रातृव्यो भ्रातृपुत्रे ना पुनः शत्रौ नपि त्वदः ।
भ्रामरं भ्रमरैर्ज्ञेयं कृते मधुनि सा पुनः ॥ १२९७ ॥

पार्वत्यां भ्रामरी स्त्री(तु[1] स्याद्) व(स्त्रे[2] ज्ञे) तु **भिदकं** नपि ।
परशौ तु पुमान् स्त्री तु भेदके **भिदुरं** तु नप् ॥ १२९८ ॥

---

१. 'लम्भस्तु' क. च., 'लाकस्तु' ग. पाठः. २. 'ण्ड' ग., 'ण्डि' ङ. पाठः. ३. 'य ना ।' ग. पाठः. ४. 'ज्ञो' ग. पाठः.

---

* 'भावाटो भावके साधौ निवेशे कामुके नटे' इति तु मेदिनी । † अयं श्लोक इह प्रमादाल्लिखितो भाति ।

कुलिशे भेद्यवत् तु स्याद् भेत्तर्यपि भिदेलिमे ।
भीषणं तु त्रिषु ज्ञेयं भीमे स्त्रीशण्डयोः पुनः ॥ १२९९ ॥

भीषणा भापनायां स्यात् स्त्री तु स्यात् सल्लकीरसे ।
कवाटे चेति रभसो भुवने तु नपुंसकम् ॥ १३०० ॥

पुंस्यप्येके विदुर्लोके क्लीबमेव जले विदुः ।
भुजिष्यस्तु द्वयोर्दासे धने तु (स? क्ली) पुमान् पुनः ॥ १३०१ ॥

आचार्येऽप्योदने चापि रभसो हस्तसूत्रके ।
त्रिस्तु भोक्तरि विज्ञेयमनधीनसहाययोः ॥ १३०२ ॥

भुजङ्गस्तु विटे पुंसि तथैवान्यतमे भवेत् ।
चण्डवृष्टिप्रयातादिदण्डकानां द्वयोस्त्वहौ ॥ १३०३ ॥

भुलिङ्गस्त्वृषिभेदे ना नीवृद्भेदे तु भूम्नि च ।
स्यात् सालवावयवे द्वे तु पक्षिजात्यन्तरेऽथ ना ॥ १३०४ ॥

*__भुरण्यो__ भास्करे विष्णौ वह्नौ क्षिप्रे पुनस्त्रिषु ।
भूमिजस्तु पुमान् दैत्यभेदे नरकसंज्ञके ॥ १३०५ ॥

अङ्गारके च स्त्री तु स्यात् सीतायां भूमिजाथ तत् ।
यत्किञ्चिद् भूमिसम्भूतं तत्र स्याद् भेदलिङ्गकम् ॥ १३०६ ॥

अस्त्री त्वाभरणे ज्ञेयं **भूषणं** भूषणा त्वना ।
अलङ्कृतावथ स्त्री स्याच्चतुर्दश्यां तिथौ तथा ॥ १३०७ ॥

भूतेष्टा वाञ्छिते तु त्रिभूतानामथ सा स्त्रियाम् ।
तीक्ष्णार्जकाख्यस्तम्बे स्याद् **भूतघ्नी** त्रिषु हन्तरि ॥ १३०८ ॥

---

१. 'वो' क. ग. ङ. च. पाठः. २. 'प्य' ग. पाठः ३. 'तु' क. पाठः. ४. 'लज्जिते' क. च. पाठः.

---

* भुरण्यू विष्णुभास्करौ' (पृ. २४३. श्लो. ५९) इति तु वैजयन्ती ।

भूतानाममनुष्येऽथ **भूमिस्पृग्** वैश्यमर्त्ययोः ।
द्वयोः स्प्रष्टरि तु त्रि स्याद् भूमेरथ नृलिङ्गकः ॥ १३०९ ॥

भृङ्गारः कनकाल्वां स्याद् भृङ्गारी तु स्त्रियामियम् ।
झिल्लिकासंज्ञके कीटे चक्रे तु भृमलं नपि ॥ १३१० ॥

ना तु वायौ द्वयोस्तु स्यात् कृमिजात्यन्तरेऽथ नप् ।
भेषजं स्यात् सुखे तोये ह्यौषधे तु हि भेषजी ॥ १३११ ॥

क्लीनपोर्भैरवं तु त्रि(हिं?र्भी,मे स्याद् भैरवी पुनः ।
सप्तानामपि मातृणामेकस्यां मातरि स्मृता ॥ १३१२ ॥

भोजनं तु धने भुक्तौ क्लीबं स्याद् भोजना पुनः ।
नपुंस्त्रियोर्भोजयत्यर्थे **भोगवत्** तु त्रिषु स्मृतम् ॥ १३१३ ॥

भोगयुक्ते द्वयोस्तु स्याद् भुजगे भोगवानथ ।
नद्यां नगर्यां नागानामियं भोगवती स्त्रियाम् ॥ १३१४ ॥

वैजयन्ती तु पातालगङ्गायामित्यभाषत ।
भौरिकः कनकाध्यक्षे त्रिः पुम्भूम्नि तु भौरिकाः ॥ १३१५ ॥

प्राग्देशावस्थिते नीवृद्भेदे समतटाह्वये ।
अथ **मङ्गलमस्त्री** स्यात् कल्याणे त्रि तु तद्वति ॥ १३१६ ॥

मल्लिकागन्धसदृशगन्धयुक्ते च वस्तुनि ।
मङ्गला सितदूर्वायां स्त्रियां रभस उक्तवान् ॥ १३१७ ॥

क्लीबं तु मल्लिकापुष्पगन्धे लब्धार्थरक्षणे ।
पुमांस्त्वङ्गारके ग्रामवास्तुभेदे च केचन ॥ १३१८ ॥

मङ्गल्यं तु निमित्ते स्यान्मङ्गलस्याभिधेयवत् ।
मल्लिकापुष्पगन्धेन युक्ते वस्तुनि चाथ नप् ॥ १३१९ ॥

ज्ञेयं सर्वौषधिस्नाने दध्नि चाथ नृलिङ्गकः ।
बिल्वे मसूरसंज्ञे च धान्ये स्याद् रभसः पुनः ॥ १३२० ॥

अश्वत्थे त्रायमाणायामप्याचष्ट स्त्रियां पुनः ।
मङ्गल्या स्याद् वचायां च मल्लिकापुष्पगन्धिनि ॥ १३२१ ॥

कालागुरुविशेषे च गन्धभेदे च यः स्थितः ।
मल्लिकाकुसुमे तस्मिन् रभसस्तु बहूक्तवान् ॥ १३२२ ॥

रोचनाशम्यधःपुष्पीमसीशुक्लवचास्वपि ।
इत्येवमथ विज्ञेया शब्दज्ञैर्मण्डली त्रयी ॥ १३२३ ॥

बिम्बे चाप्युपसूर्ये च कुष्ठरोगान्तरेऽपि च ।
समूहमात्रे ग्रामौघे देशे द्वादशराजके ॥ १३२४ ॥

युग्मे[1] च शुनि तु द्वे स्यान्मण्डपोऽस्त्री जनाश्रये ।
मण्डस्य तु पिबे त्रि स्यादथ स्यान्नपि **मण्डनम्** ॥ १३२५ ॥

विद्यादाभरणे भूषिक्रियायां तु न ना स्मृता ।
मण्डना रभसस्तु त्रिः शब्दज्ञोऽलङ्करिष्णुनि ॥ १३२६ ॥

मत्सरा तु स्त्रियामाह मक्षिकायां पुमान् पुनः ।
भवेत् परशुभद्वेषे लोभे कोपेऽजयोऽपठीत् ॥ १३२७ ॥

यागसाधनसोमाख्यद्रव्ये च कृपणे पुनः ।
भेद्यवत् परसम्पत्तेरसोढर्यजयः पुनः ॥ १३२८ ॥

निष्क्रयेऽप्याह **मदनः** पुनः पुंसि मनोभवे ।
पिण्डीतकतरौ स्याच्च धुर्धूरे वनकोद्रवे ॥ १३२९ ॥

वृक्षे कुरवकाभिख्ये मधूच्छिष्टवसन्तयोः ।
कस्तूरिकामृगस्याण्डे पुनः स्त्री मदनी तथा ॥ १३३० ॥

सुरायां च नपि त्वेतत् प्रसवेऽत्रोक्तशाखिनाम् ।
मदनं माद्यतेश्चार्थे मदना त्वपुमानसौ ॥ १३३१ ॥

धातोर्मदयतेरर्थे **मन्मथस्तु** पुमानयम् ।
रभसः कामचिन्तायामित्यध्यैष्ट महामतिः ॥ १३३२ ॥

---

१. 'रुक्मे च' ग. पाठः.

कन्दर्पे च कपित्थे च क्लीं तु तत्प्रसवेऽथ नप् ।
मधुकं मधुयष्ट्याख्यभेषजेऽथाजयोऽवदत् ॥ १३३३ ॥
स्त्रियमेनाममुत्रार्थे जातिभेदे तु स द्वयोः ।
मैत्रेयायोगवीजाते वन्दिन्यप्यथ सा स्त्रियाम् ॥ १३३४ ॥
मधुका श्यामकङ्गौ स्यान्मधुपर्ण्या च भाषिता ।
रभसेन बहुज्ञेन **मधुर**स्तु पुमान् रसे ॥ १३३५ ॥
स्वादुसंज्ञे तद्वति तु त्रिषु स्याच्छोभने प्रिये ।
स्त्रियां तु मधुरासंज्ञपुर्यामित्याह यादवः ॥ १३३६ ॥
दूर्वायां मधुयष्ट्यां च मिश्रेयाशतपुष्पयोः ।
मधुकुक्कुटिकासंज्ञमातुलुङ्गान्तरे तथा ॥ १३३७ ॥
मेदायां चेति रभसः क्लीबं तु गरलेऽभ्यधात् ।
अना तु काञ्जिकेऽथ स्यात् त्रयोदश्यां तिथौ स्त्रियाम् ॥ १३३८ ॥
महोग्रा भेद्यवत् तु स्यादत्युग्रेऽथ नृशण्डयोः ।
मलयः शैलभेदे स्याद् देशेऽप्यवयवे गिरेः ॥ १३३९ ॥
आरामे चाप्यथं ज्ञेयं **मञ्जुलं** त्रिषु सुन्दरे ।
द्वयोस्तु पक्षिभेदे स्याज्जलरङ्काह्वयेऽप्यथ ॥ १३४० ॥
‡जलाञ्जले निकुञ्जे च नपुंसकमुपादिशत् ।
मध्यमस्तु नृशण्डः स्याच्छरीरावयवान्तरे ॥ १३४१ ॥
अवलम्बाह्वये ना तु मध्यदेशेश्वरे नृपे ।
सप्तानां च स्वराणां स्यात् षड्जादीनां क्वचित् स्वरे ॥ १३४२ ॥
त्रि तु मध्यभवे स्त्री तु मध्यमा मध्यमाङ्गुलौ ।
स्त्रियां च दृष्टरजसि रभसस्त्वाह शब्दवित् ॥ १३४३ ॥

---

१ 'थो' ग. पाठः

---

‡ 'मञ्जुलं च जलाञ्चले' इति तु हेमचन्द्रः, 'जलाञ्चलं स्वतो वारिनिर्गमे शैवलेऽपि च' इति मेदिनी ।

कर्णिकायां च तस्याश्च बह्वर्थत्वं निरूप्यताम् ।
मर्कटस्तु कपौ द्वे स्यालूतायां च स नपुंस्त्रियोः ॥ १३४४ ॥
कवाटबन्धनार्थायाः सूचेर्विष्कम्भयन्त्रके ।
मर्कटं मर्कटी चेति स्त्रियां त्वेव हि मर्कटी ॥ १३४५ ॥
आत्मगुप्ताख्यवल्लयां च करञ्जाख्यस्य शाखिनः ।
भेदेष्वेकत्र भेदे च मुद्गभेदे तु पुंस्ययम् ॥ १३४६ ॥
वन्यसंज्ञे तुरुष्काख्यनिर्यासे चाथ **मन्थरम्** ।
मन्दे वक्रे पृथौ च त्रिः सूचके मन्दगामिनि ॥ १३४७ ॥
ना तु बाधे बले कोपे मन्थदण्डेऽप्यथो नपि ।
कुसुम्भ्यां मन्थरा तु स्त्री कैकेय्याश्चेटिकान्तरे ॥ १३४८ ॥
मन्दिरं तु पुरे गेहे क्लीबमब्धौ तु पुंस्ययम् ।
मथितं तु क्लीबलिङ्गं निर्जले गोरसे कृते ॥ १३४९ ॥
त्रिस्तु मन्थतिमश्चातिकर्मभूतेषु वस्तुषु ।
मन्दारस्तु पुमान् देववृक्षभेदेऽर्कनाम्नि च ॥ १३५० ॥
गुल्मे स्यात् पारिभद्राख्यवृक्षतद्भेदयोरपि ।
तेषां तु प्रसवे क्लीबमरविन्देऽप्यथ द्वयोः ॥ १३५१ ॥
मदारो हस्तिनि त्रि स्यादलसेऽथ नृलिङ्गकः ।
एकाहक्रतुभेदे स्यान्**मरायो** मूर्त एव च ॥ १३५२ ॥
कुसूलेऽमरदत्तेन कथितस्तस्य नेक्षितम् ।
मूलमस्माभिरर्थे नप् साम्नोः स्यादुभयोरपि ॥ १३५३ ॥
अग्निं नरो दीधितिभिरित्यस्यामृचि गीतयोः ।
महार्घस्त्रिर्महामूल्ये द्वे तु लावकपक्षिणि ॥ १३५४ ॥
मरालस्तु द्वयोर्हंसे मिश्रवर्णे पुनः पुमान् ।
स चाल्पपीतरक्ते स्याद् भेद्यलिङ्गं तु तद्वति ॥ १३५५ ॥

---

१. 'क' क. पाठः.

मन्त्रज्ञस्तु पुमांश्चारे त्रिस्तु मन्त्रविदि स्मृतः ।
†**मक्कण**स्तु पुमान् कालेऽप्यजातरदहस्तिनि ॥ १३९६ ॥

निःश्मश्रुपुरुषेऽप्याह रभसः शब्दवित्तमः ।
ह्रस्वाङ्गे च गजे द्वे तु शय्याकीटेऽथ नप्यदः ॥ १३९७ ॥

जङ्घात्राणार्थयन्त्रे स्याद् योधानां **मर्दनी** पुनः ।
योधानां पादरक्षार्थयन्त्रे स्त्री क्ली तु मर्दनम् ॥ १३९८ ॥

मृद्वात्यर्थे स्त्रियां तु स्यात् क्षुमाधान्ये **मसृण्यथ** ।
अकर्कशे (च ? त्रि)‡ मसृणं स्निग्धे च **मकरस्तु** ना ॥ १३९९ ॥

निधिभेदे च राशौ च दशमे स्याद् द्वयोः पुनः ।
झषसंज्ञे जलचरे **मलिनं** तु मलीमसे ॥ १४०० ॥

त्रि स्त्री पुनरुदक्यायां मलिना **मलद**स्तु ना ।
माषधान्ये भूम्नि चासौ स्थौराख्ये नीवृदन्तरे ॥ १४०१ ॥

भेद्यलिङ्गं तु विज्ञेयं मलस्य स्यात् प्रदातरि ।
मशकस्त्वृषिभेदे ना द्वयोस्तु क्षुद्रपक्षिणि ॥ १४०२ ॥

मलिम्लुचसमाख्ये च **मरुजा** स्त्री मृगान्तरे ।
यथोक्तं मरुजा तूच्चमृदुपाण्डररोमिका ॥ १४०३ ॥

रोमराजिमती मध्ये द्वादशाङ्गुलसम्मिता ।
इत्यस्या लक्षणं भेद्यलिङ्गं तु मरुसम्भवे ॥ १४०४ ॥

मल्लिको नृस्त्रियोर्दीपाधारपात्रे स्त्रियां पुनः ।
मल्लिका पुष्पवल्ल्यां स्याद् यस्या आख्यापि भूपदी ॥ १४०५ ॥

मर्मरस्तु पुमान् वस्त्रपर्णानां [१]स्वनिते तथा ।
मर्मरा भक्षभेदे स्त्री मौडीसंज्ञेऽथ **मस्तक**ः ॥ १४०६ ॥

---

१. 'ध्व' च. पाठः. २. 'ढी' क. ङ. च. पाठः.

---

† 'मत्कुणो निर्विषाणेभे निःश्मश्रुपुरुषेऽपि च । उद्देशे नारिकेले च' इति तु मेदिनी ।
‡ 'मसृणोऽकर्कशे स्निग्धे त्रिषु' इति मेदिनी ।

अस्त्री शिरसि विद्वांसः पुनरन्ये प्रचक्षते ।
शिरसः पूर्वभागस्य मध्य इत्यथ विद्विषि ॥ १३६७ ॥

मलीको[1] ना नपि त्वेतदञ्जने सम्प्रचक्षते ।
मलूको[2] द्वे पक्षिमात्रे सरोजशकुनौ पुनः ॥ १३६८ ॥

शाकटायन आहैनं[3] **मण्डूकस्तु** द्वयोरयम् ।
भेकेऽपि[4] पिकभेदे[5] च मण्डूकी तु स्त्रियामियम् ॥ १३६९ ॥

गजस्थापरपादस्य कृतस्य दशधा तथा ।
उपरिष्टात् समारभ्य तुर्यभागे तथैव च ॥ १३७० ॥

मण्डूकपर्ण्यामप्याह रभसः शब्दवित्तमः ।
लाङ्गलावयवस्यापि भेदेऽथो राजरक्षिभिः ॥ १३७१ ॥

कृते पुरस्य दुर्गस्य बहिर्भूमौ नृलिङ्गकः ।
यन्त्रभेदे **मयूरस्तु** नृस्त्रियोः किरणेऽथ ना ॥ १३७२ ॥

ज्वालादीप्त्यो रथस्याक्षे शङ्खौ चाथ द्वयोरयम् ।
मयूरो बर्हिणे ना तु स्यादपामार्गसंज्ञके ॥ १३७३ ॥

स्तम्बे च तुलसीभेदे चाल्पपत्रसुगन्धिके ।
तं मयूरशिखासंज्ञमेषजे रभसोऽपठीत् ॥ १३७४ ॥

क्ली तु तुत्थाञ्जनेऽथो ना धान्ये मङ्गल्यसंज्ञके ।
केषाञ्चित् स्यान्मयूरोऽयं तथा चर्मासनान्तरे ॥ १३७५ ॥

व्रीहिकङ्काख्यधान्ये तु **मसूरी** स्त्री तथा भवेत् ।
मारिसंज्ञे रोगभेदे वेश्यायां रभसोऽपठीत् ॥ १३७६ ॥

अथ ना **मसुरो** धान्यभेदे चर्मासनेऽपि च ।
रभसस्त्वाह वेश्यायां स्त्रियां व्रीह्यन्तरेऽपि च ॥ १३७७ ॥

अथो नपुंसकं विद्यान्**मधूलं**[6] शब्दकोविदः ।
सौरघादिमधौ ना तु मधूके गिरिसम्भवे ॥ १३७८ ॥

---

१. 'लि' च. पाठः. २. 'लि' ग. पाठः. ३. 'ह स्म म' ग. पाठः. ४. 'च पीतभेके च' ग. पाठः. ५. 'के' क. च. पाठः. ६. 'ल्य' ग. ङ. पाठः. ७. 'स' ग. पाठः.

रसे च मधुराभिख्ये भेद्यलिङ्गं तु तद्वति ।
मठरस्त्वृषिभेदे ना भेद्यवत् त्वलसे पुनः* ॥ १३७९ ॥

मठरं तु द्रवीभूते दध्न्यतीव नपुंसकम् ।
त्रि तु कण्ठगतप्राणे कृमिजात्यन्तरे द्वयोः ॥ १३८० ॥

ना[1] त्वम्नौ **मरे**[2]**तो** जन्तौ द्वे **मन्दाक्षं** पुनर्नपि ।
लज्जायां मन्ददृष्टौ तु त्रिषु मन्देन्द्रियेऽपि च ॥ १३८१ ॥

मत्स्याक्षी तु स्त्रियां ब्राह्मीसंज्ञानूपतृणान्तरे ।
मत्स्याक्षस्तु पुमाञ्छाकस्तम्बे पत्तू[3]रसंज्ञके ॥ १३८२ ॥

पुंस्त्रियोस्तु **मरीचिः** स्याद् गभस्तिमृगतृष्णयोः ।
अष्टके त्रसरेणूनां लिक्षाख्यपरिमाणके ॥ १३८३ ॥

सप्तानामृषिभेदानामयमन्यतमे पुमान् ।
मधुवाक् तु द्वयोर्ज्ञेयः कोकिले भेद्यवत् पुनः ॥ १३८४ ॥

मधुरा यस्य वाक् तत्र **मत्स्यराट्** तु द्वयोरयम् ।
मकराख्ये जलचरे मत्स्यानां त्वधिपे पुमान् ॥ १३८५ ॥

मण्डली तु द्वयोः सर्पजातिभेदेषु केषुचित् ।
षड्विंशतौ मण्डलवदर्थे तु त्रिष्वथ स्त्रियाम् ॥ १३८६ ॥

आवलौ **मालिका**प्याढ्यजनानां मन्दिरान्तरे ।
सप्तलासंज्ञके पुष्पवल्लिभेदेऽप्यसौ स्मृता ॥ १३८७ ॥

भूयोऽपि रभसेनोक्ता चतुर्ष्वर्थेषु मालिका ।
ग्रैवेयके पुष्पमाल्ये पुत्रिकाहस्तिमल्लयोः ॥ १३८८ ॥

आकारान्ताथ सर्वासु पुष्पवल्लीषु मालकी ।
ईकारान्ताथ न स्त्री स्यान्मालकं खेटकाह्वये ॥ १३८९ ॥

---

१. 'जान्वम्नौ' क. च. पाठः. २. 'रुजो ज' च., 'रतौ ज' ग. पाठः. ३. 'त्त' च. पाठः. ४. 'नामधि' ग. पाठः.

---

* 'तथा' इति स्यात् ।

वनदुर्गनिवासे स्याद् भेद्यलिङ्गं तु धारके ।
मागधी तु स्त्रियां यूथीपिप्पल्योः स्याद् द्वयोः पुनः ॥ १३९० ॥

मर्त्यजात्यन्तरे वैश्याज्जाते ब्राह्मणयोषिति ।
वैश्यात् क्षत्रियकन्यायां जाते च स्याच्च वन्दिनि ॥ १३९१ ॥

मगधानां तु ना राज्ञि जीरकेऽप्यथ **माधवः** ।
विष्णौ वैशाखमासे च वसन्ते चाजयो नरि ॥ १३९२ ॥

मध्वासवसमाख्ये तु मद्यभेदे नृशण्डयोः ।
स्त्रियां तु माधवी पुष्पवल्लिजात्यन्तरे भवेत् ॥ १३९३ ॥

अतिमुक्तकसंज्ञे स्यात् सुरायां च तथा विदुः ।
कोशातक्याः प्रभेदे च भवेद् दीर्घफलाह्वये ॥ १३९४ ॥

जयन्त्यामिति च प्रोक्तं केनचित् तन्निरूप्यताम् ।
रभसः शतपुष्प्यां च ब्रवीति मधुशर्कराम् ॥ १३९५ ॥

अर्थत्वेनास्य राज्ञस्तु मधोः पुत्रादिषु त्रिषु ।
मार्ताण्डो रभसेनोक्तः खगे दंष्ट्रिणि च द्वयोः ॥ १३९६ ॥

रवौ तु पुंसि मार्तण्डमार्ताण्डौ यादवोदितौ ।
माकन्दस्तु पुमानाम्रे स्त्री स्यादामलकीतरौ ॥ १३९७ ॥

माणिक्यं तु भवेद् रत्नवरे क्लीबं स्त्रियां पुनः ।
गृहगोधासमाख्ये स्यान्माणिक्या जन्तुभेदके ॥ १३९८ ॥

मार्गरस्तु द्वयोर्मर्त्यजातिभेदे यदुद्भवः ।
आयोगव्यां निषादात् स्यात् कैवर्तेऽप्यथ भेद्यवत् ॥ १३९९ ॥

मार्गस्य दातरि त्रिस्तु **मार्गणो** याचकेऽथ ना ।
बाणे च स्त्रीनपोर्याच्ञाद्वेषयोर्मार्गणाथ ना ॥ १४०० ॥

मार्जनः स्नेहसंज्ञे स्याद् गुणे स्त्रीशण्डयोः पुनः ।
मार्जनं मार्जना चेति माष्टौं विद्वद्भिरीरितम् ॥ १४०१ ॥

---

१. 'च' क. ङ. च. पाठः.

मारिषस्तु पुमानार्ये नाट्योक्तिविषये तथा ।
जीवशाक इति ख्याते शाकभेदेऽपि सा पुनः ॥ १४०२ ॥
दक्षमातरि विज्ञेया स्त्रीलिङ्गा मारिषा बुधैः ।
मार्जिता तु रसालायां स्त्री तस्या लक्षणं विदुः ॥ १४०३ ॥
अपक्वतक्रं सव्योषचतुर्जातगुडार्द्रकम् ।
सजीरकं रसाला स्यादित्येवं त्रि तु शोधिते ॥ १४०४ ॥
मार्जारस्तु बिडाले द्वे पुमांस्त्विङ्गुदपादपे ।
अगस्त्यवृक्षे च स्त्री तु मार्जारी स्यान्मृगान्तरे ॥ १४०५ ॥
कोद्रङ्गसंज्ञे तं चाहुर्मृगज्ञाश्वमराकृतिम् ।
कस्तूरिकामृगस्यापि स्यादण्डे द्वे तु हस्तिनि ॥ १४०६ ॥
मातङ्गः स्याच्च चण्डाले **मारुत**स्तु पुमानयम् ।
वायौ च भीमसेने च हनूमति च नप् पुनः ॥ १४०७ ॥
पुरां भिन्दुर्युवेत्यस्यामृचि गीते हि सामनि ।
त्रिर्मरुद्योगिनि स्यात् तु धुर्धूरे **मातुलः** पुमान् ॥ १४०८ ॥
मदनाख्यद्रुमे चाथ रभसः शब्दवित्तमः ।
मातुर्भ्रातरि च स्त्री तु भार्यायां तस्य मातुली ॥ १४०९ ॥
मातुलानी च भङ्गाख्यधान्ये स्यान्मातुलान्यसौ ।
द्वयोस्तु मालुधानाख्यसर्पजात्यन्तरे स्मृतः ॥ १४१० ॥
माहेन्द्री तु स्त्रियां ज्ञेया सप्तानामेकमातरि ।
मातृणां कदलीजातिभेदे च पृथुदीर्घकम् ॥ १४११ ॥
तत्र यस्य फलं त्रिस्तु स्यान्महेन्द्रस्य योगिनि ।
महेन्द्रदेवते चाथ **माहूरः** पुंसि पर्वते ॥ १४१२ ॥
पूजके तु त्रिषु ज्ञेयो **माहिर**[1]**स्तु** नृलिङ्गकः ।
इन्द्रे क्लीबं तु शयने बाले च क्लीं तु **मानसम्** ॥ १४१३ ॥

---

१. 'हीनस्तु' क. च., 'हिनस्तु' ङ. पाठः.

चित्ते हैमवते चापि सरोभेदेऽपि यज्वनाम् ।
प्रसिद्धे स्तोत्रभेदेऽपि यज्ञगे मनसः पुनः ॥ १४१४ ॥

सम्बन्धिनि त्रिषु क्ली तु **मासिकं** पुंसि केचन ।
मासि श्राद्धे त्रिषु पुनर्मासं भूतभृतादिषु ॥ १४१५ ॥

मानवस्तु मनुष्ये द्वे मनुसम्बन्धिनि त्रिषु ।
माणवस्तु पुमान् हारभेदे षोडशयष्टिके ॥ १४१६ ॥

द्वे तु बाले कुपुरुषेऽप्यथ पुंभूम्नि **मालवाः** ।
अवन्त्याख्ये जनपदे तन्निवासजने द्वयोः ॥ १४१७ ॥

सर्वैश्च वचनैर्योगी मर्त्यजात्यन्तरे तथा ।

पुरातने तु मधुनि **माधुकं** क्ली त्रिषु त्वदः ॥ १४१८ ॥
यत् स्यान्मधुकसम्बन्धि तस्मिन्नथ नृलिङ्गकः ।
माधुरः षोडशेऽरत्नौ मूलादारभ्य यस्य हि ॥ १४१९ ॥

अरत्नयः सप्तदश तस्य यूपस्य स त्रि तु ।
सम्बन्धे मधुरेणाथ मालाकारे हि **मालिकः** ॥ १४२० ॥

द्वे मालवति तु त्रि स्यान्**माक्षिकं** तु नपुंसकम् ।
सारघे मधुनि स्याच्च शैलधात्वन्तरे तथा ॥ १४२१ ॥

चक्रसंज्ञे मक्षिकायाः पुनः सम्बन्धिनि त्रिषु ।
माषाशी तु तुरङ्गे द्वे माषस्य त्वाशके त्रिषु ॥ १४२२ ॥

मिहिरस्तु पुमान् सूर्यवायुमेघेषु नब् जले ।
मिथुनं तु क्लीबलिङ्गं स्त्रीपुंसयुगले तथा ॥ १४२३ ॥

मधुसर्पिर्द्वये राशौ तृतीये स्याद् द्वयोर्गणे ।
युग्माख्ये तद्वति पुनस्त्रिषु स्यान्मिथुनैः* पुनः ॥ १४२४ ॥

---

*'ने पु' इ. च. पाठः.

'जायापती तु मिथुने जम्पती दम्पती इति' (पृ. १७७. श्लो. ४८) इति तु वैजयन्ती ।

दम्पत्योः पुंसि नब्लिङ्गं पुनः स्याच्च घृताञ्जने ।
मिश्रकं यजमानस्य त्रि तु मिश्रयितर्यसौ ॥ १४२५ ॥

मिथुनी तु द्वयोः खञ्जरीटाख्ये पक्षिणि त्रि तु ।
भवेन्मिथुनवत्येव **मुसलस्तु** नृशण्डयोः ॥ १४२६ ॥

अवघातोपकरणदण्डे स्त्री तु मुसल्यसौ ।
गृहगोधासमाख्ये स्याज्जन्तौ कुस्तुम्बुरुण्यपि ॥ १४२७ ॥

तालमूलीसमाख्ये च स्तम्बेऽथ **मुचिरः** पुमान् ।
सूर्ये मेघे च धर्मे च त्रि तु दातरि ना पुनः ॥ १४२८ ॥

मुहिरः पूष्णि कन्दर्पे क्लीबं तु तमसि स्मृतम् ।
मुखरस्तु त्रिषु ज्ञेयो दुर्मुखे स्त्री तु पक्षिणि ॥ १४२९ ॥

मुखरा शारिकासंज्ञे **मुण्डितं**[1] त्वभिधेयवत् ।
उप्तकेशे स्त्रियां त्वेषा श्रमणीति हि विश्रुते ॥ १४३० ॥

भैषज्यशाकस्तम्बेऽथ **मुद्गरो**[2] द्रुहिणे नरि ।
मल्लिकायां च रभसः पुनर्वेण्वादिभेदने ॥ १४३१ ॥

क्लीबं तु मल्लिकाभेदे त्रिषु मुद्गस्य दातरि ।
मुष्टिकस्तु पुमान् स्वर्णकारे स्यात् स्त्री तु मुष्टिका ॥ १४३२ ॥

कर्मारस्योपकरणभेदे ना तु **मुसल्यसौ** ।
बलभद्रेऽश्वभेदे च यस्यैको *[3]द्यैतिकः (?) + + ॥ १४३३ ॥

त्रि स्यान्मुसलवत्यर्थे **मूषिक**स्तु द्वयोरयम् ।
आखुजातौ यदा तु स्यात् स्त्रियां वृत्तिस्तदा भवेत् ॥ १४३४ ॥

मूषिका निर्विषाणां च जातिभेदे जलौकसाम् ।
अनिष्टगन्धे विज्ञेयो मूषिकैः सदृशाकृतौ ॥ १४३५ ॥

---

१ 'तस्त्व' क. च. पाठः. २. 'घ' क. ङ. च. पाठः. ३. 'द्य.....सिकः । यत् स्या' ग., 'द्यसिकः.....त्रि' ङ. पाठः.

---

* 'मुसल्यन्यप्रभैकाङ्घ्रिः' (पृ. ११२. श्लो. ९७) इत्यश्वभेदे वैजयन्ती ।

क्लीबं तु **मूर्छनं** मोहेऽभिव्याप्तौ च स्त्रियां पुनः।
मूर्छना गीतिधर्मे स्यात् क्वचित् स्त्रीशण्डयोः पुनः ॥ १४३६ ॥
मूर्छना मूर्छयत्यर्थे पुन्नपुंसकयोः पुनः।
मूलको वुस्तिकासंज्ञशाकस्तम्बे त्रिषु त्वयम् ॥ १४३७ ॥
मूलनक्षत्रसंयुक्तकालजातेऽथ पुंस्ययम्।
वनस्पतौ स्या**न्मूलेरो** हर्षनन्दी त्वभाषत ॥ १४३८ ॥
शब्दार्थवेदिनामग्र्य आपणीयवनस्पतौ।
क्ली तु पण्ये **मृणाली** तु बिसे लिङ्गत्रयी भवेत् ॥ १४३९ ॥
शाकटायन आह स्म पद्माङ्कुर इतीदृशम्।
पद्मकोरक इत्याह हर्षनन्द्यथ सज्जनः ॥ १४४० ॥
दयितेऽपि मृणालं त्रि**मृदङ्गस्तु** पुमानयम्।
महाकोशातकी स्वल्पफलकोशातकीति च ॥ १४४१ ॥
ख्यातयोर्लतयोर्वाद्यभेदे च मुरजाह्वये।
प्रसवे तूक्तलतयोः क्लीबं स्या**न्मृदुलं** पुनः ॥ १४४२ ॥
भेद्यवन्मृदुनि क्ली[1] तु प्रसिद्धे गन्धवस्तुनि।
अगुर्विति **मृगाक्षी** तु स्त्रीलिङ्गा स्याल्लतान्तरे ॥ १४४३ ॥
इन्द्रवारुणिकासंज्ञे मृगनेत्रेषु तु त्रिषु।
अथ प्राहु**र्मृदुत्वक्** स्याद् भूर्जाह्वयमहीरुहे ॥ १४४४ ॥
मुञ्जे च त्रि तु मृदुलत्वचि मेचकवाक् तु ना।
कृष्णश्यामलयोर्ज्ञेयो गुणमात्रे त्रिषु त्वयम् ॥ १४४५ ॥
कार्ष्ण्ययुक्ते श्यामलत्वयुक्ते चाथ नृशण्डयोः।
मयूरचन्द्रके चापि स्तनस्यापि च चूचुके ॥ १४४६ ॥
मेनादस्तु द्वयोरुछागे स्यान्मार्जारमयूरयोः।
मेहघ्नी तु हरिद्रायां स्त्री त्रिर्मेहस्य हन्तरि ॥ १४४७ ॥

---

१. 'द्वे' ग. पाठः.

अमनुष्ये **मेहनं** तु क्लीबं मेढ्रे च शेफसि ।
मेकलास्तु नृभूम्नि स्युर्विन्ध्यपर्यन्तसंम्भवे ॥ १४४८ ॥
नीवृद्भेदे शीतगुणे पुनः पुंस्येव मेकलः ।
त्रि तु तद्वत्यथ क्लीबं **म्लेच्छास्यं** ताम्रसंज्ञके ॥ १४४९ ॥
लोहे मुखे च म्लेच्छस्य स्यात् तस्य त्वसने स्त्रियाम् ।
म्लेच्छास्या **मेघजं** तु क्ली जले त्रिर्मेघसम्भवे ॥ १४५० ॥
मेधावी तु शुके द्वे स्यान्मेधावति तु भेद्यवत् ।
मैथिलस्तु प्रदोषे ना जनकाख्ये च राजनि ॥ १४५१ ॥
सीतायां तु स्त्रियां ज्ञेया मैथिली शब्दवेदिभिः ।
मोदकस्त्वस्त्रियां पूपभेदे स्याद् भेद्यवत् पुनः ॥ १४५२ ॥
स्यान्मोदयितृमोदित्रोरथ स्यात् पुंसि **मोचकः** ।
शिग्रुवृक्षे मोक्तरि तु त्रिषु क्लीबं तु **मोर**(ग?ट)म् ॥ १४५३ ॥
इक्षुमूले प्रसूत्यादिसप्ताहादूर्ध्वजे गवाम् ।
क्षीरे मोरकसंज्ञेऽन्ये पुनर्गो(चर?रस)‡ऊचिरे ॥ १४५४ ॥
मोरटा तु स्त्रियां मूर्वासंज्ञके भेषजान्तरे ।
सूर्यावर्त्ते पर्णिकाख्यस्तम्बे च क्ली तु **मोरकम्** ॥ १४५५ ॥
प्रसवादिकसप्ताहादूर्ध्वदुग्धे पयस्यदः ।
त्रि तु[3] मोरितरि ज्ञेयः स च संवेष्टकः स्मृतः ॥ १४५६ ॥
मोहनं क्ली रते मोहे मोहिनी[3] तु स्त्रियामियम् ।
नवानां विष्णुशक्तीनामेकशक्तावना पुनः ॥ १४५७ ॥
मोहना मोहयत्यर्थे **मौष्टिक**स्तु पुमानयम् ।
स्वर्णकारे भेद्यवत् तु स्मृतो मुष्टिप्रहारिणि ॥ १४५८ ॥

---

१. 'पर्वते' ग. पाठः. २. 'स्तु' क. च. पाठः. ३. 'हि' च. पाठः.

---

‡ 'दूर्वायां स्त्रीक्षुमूले क्ली गोरसेऽपि च मोरटम्' (पृ. २६२. श्लो. ६५) इति, 'आसप्ताहात् तु पीयूषं ततो मोरटमोरकौ' (पृ. १३५. श्लो. १४६) इति च वैजयन्ती ।

यशोदा त्वग्निचित्याया इष्टकासु च कासुचित् ।
नन्दगोपस्य भार्यायां त्रिस्तु कीर्त्तेः प्रदातरि ॥ १४५९ ॥

यवनस्तु द्वयोर्मर्त्यजातिभेदे यदुद्भवः ।
शूद्रायां क्षत्रियादन्ये पुनराहुर्मनीषिणः ॥ १४६० ॥

वैश्यायां क्षत्रियाज्जात इति पुम्भूम्नि तु स्मृतः ।
नीवृद्भेदे हि यवना हुरुष्कैरसमाख्यके ॥ १४६१ ॥

तद्देशजातमर्त्ये तु द्वयोः सर्ववचस्यपि ।
क्लीबं तु मिश्रणेऽथ स्याद् **यजत्रं** क्लीबलिङ्गकम् ॥ १४६२ ॥

अग्निहोत्रे च यज्ञोपकरणे चाथ भेद्यवत् ।
यजनीयेऽथ नव्लिङ्गं **यमकं** कवयो विदुः ॥ १४६३ ॥

भिन्नार्थवर्णसङ्घातावृत्तिरूपे व्यवस्थिते ।
काव्यालङ्कारभेदे स्यात् तैलसर्पिर्द्वयेऽपि च ॥ १४६४ ॥

रभसस्तु वदत्येतत् संयमे यमलेऽपि च ।
अथो यमयितर्येतद् भेद्यवत् स्याद् द्वयोः पुनः ॥ १४६५ ॥

यज्ञार्हः कृष्णसाराख्यमृगे त्रिर्यागयोग्यके ।
यज्ञियस्तु पुमान् मुञ्जे यज्ञकर्मार्हके त्रिषु ॥ १४६६ ॥

यविष्ठः सवनाहुत्यर्थेऽग्नौ ना भेद्यवत् पुनः ।
भवेद् युवतमेऽथ स्याद् **याजकः** पुंसि ऋत्विजि ॥ १४६७ ॥

स्याद् यष्टृयाजयित्रोस्त्रिरथ स्यात् पुंसि **याज्ञिकः** ।
कुशे च याजके चापि रभसः प्रोक्तवानमुम् ॥ १४६८ ॥

यज्ञविद्यामधीयाने विदत्यप्यथ भेद्यवत् ।
यज्ञेन जयतीत्यादौ **याजन्यस्तु** पुमानयम् ॥ १४६९ ॥

यज्ञे द्वे तु क्षत्रियेऽथ **यापना** नप्स्त्रियोर्भवेत् ।
प्रस्थापने निरसने वर्तने रभसः पुनः ॥ १४७० ॥

---

१. 'स्क' क. ङ. च. पाठः. २. 'शले या' ग. पाठः.

कालक्षेपेऽप्यभाषिष्ट शब्दज्ञो **यामुनं** पुनः ।
क्लीबमञ्जनभेदे स्यात् स्रोतोञ्जनमिति श्रुते ॥ १४७१ ॥

यमुनायाः पुनस्त्रि स्यात् सम्बन्धिन्यथ **यामकौ** ।
स्तः पुनर्वसुनक्षत्रे त्रि तु यन्तरि ना पुनः ॥ १४७२ ॥

यावको यवभेदे स्यात् कुल्माषाख्ये परे पुनः ।
अलक्तकेऽपि त्रिस्तु स्याद् यवितर्यथ **यावनः** ॥ १४७३ ॥

ना तुरुष्काख्यनिर्यासे स्त्रीनपोस्तु हि यावना ।
अर्थे यावयतेर्ना तु **युञ्जानः** सारथौ त्रि तु ॥ १४७४ ॥

योक्तरि ब्राह्मणे तु द्वे **युतकं**[1] तु नपुंसकम् ।
यौतके युगले चापि संश्रये वसनाञ्चले ॥ १४७५ ॥

शूर्पाग्रे योषितो वस्त्रभेदे युक्ते तु मेद्यवत् ।
युग्मावयवयोश्चाथ **योजनं** परमात्मनि ॥ १४७६ ॥

क्लृप्यध्वमाने चतुष्क्रोशे मगधादिषु भूमिषु ।
अष्टक्रोशं तु देशेषु कोसलादिषु मन्वते ॥ १४७७ ॥

तथा युक्तिक्रियायां च लतापूगे तु पुंस्यथ ।
पित्रादेः कन्ययासार्थे लेख्ये च नपि **यौतकम्**[2] ॥ १४७८ ॥

त्रिस्त्वात्मीयेऽथ **रसनं** क्लीं कषायद्रवान्नयोः ।
स्नेहे विषे फले चापि निर्यासे हेमरूप्ययोः ॥ १४७९ ॥

आस्वादने तु जिह्वायामपि स्याद् रसना न ना ।
शब्दने च **रसज्ञा** तु जिह्वायां स्त्री त्रिषु त्वसौ ॥ १४८० ॥

रसस्य ज्ञातरि स्यात् तु (नै ? वै)क्लृन्त* इति विश्रुते ।
अयोभेदे पुमान् सारे त्वयसो **रसकः** पुमान् ॥ १४८१ ॥

---

१. 'क' ग. पाठः. २. 'क्त' ग. पाठः.

---

* 'वैक्लृन्तः स्याद् रसवरो रसज्ञो व्योमधारणः' (पृ. ४३. श्लो. ३५) इति वैजयन्ती ।

मांसस्य च स्यान्निष्क्वाथे भेद्यलिङ्गं तु कर्तरि ।
धातो रसयतेः स्यात् तु रसज्ञे **रसिकस्त्रिषु** ॥ १४८२ ॥

ना तु मद्यविशेषे स्यादपक्वेक्षुरसैः कृते ।
रसितं मेघनिर्घोषे रुते च स्यान्नपुंसकम् ॥ १४८३ ॥

त्रिषु त्वास्वादिते चैव स्वर्णादिखचितेऽपि च ।
वस्त्रनिर्णेजके तु द्वे शुके च **रजकस्त्रि** तु ॥ १४८४ ॥

मृगाणां स्याद् रमयितर्यथ क्ली **रजतं** विदुः ।
पुंस्यप्येके विदू रूप्यहारयोः शोणिते ह्रदे ॥ १४८५ ॥

त्रि तु श्वेतेऽथ **रजनं** रागद्रव्ये नपुंसकम् ।
रजनी तु हरिद्रायां स्त्री नील्यां चौषधौ निशि ॥ १४८६ ॥

वल्लिभेदे च जतुकृत्संज्ञे क्लीबं तु **रञ्जनम्** ।
स्याद् रक्तचन्दने स्त्री तु नीलीति प्रथितौषधौ ॥ १४८७ ॥

मनःशिलायां च ज्ञेया हरिद्रायां च रञ्जनी ।
स्यात् तु रञ्जयतेरर्थे रञ्जना स्त्रीनपुंसकम् ॥ १४८८ ॥

रसालस्तु पुमानिक्षौ चूते च वरुणद्रुमे ।
सम्मिश्ररसभेदे च कटुतिक्तकषायके ॥ १४८९ ॥

त्रि तु स्यात् तद्वति स्त्री तु रसाला पानकान्तरे ।
अपक्वतक्रं सव्योषचतुर्जातगुडार्द्रकम् ॥ १४९० ॥

सजीरकं रसाला स्यादिति तस्याश्च लक्षणम् ।
जिह्वायामपि दूर्वायां रभसः प्रोक्तवानिमाम् ॥ १४९१ ॥

रल्लकस्तु पुमाञ्ज्ञेयः कम्बले स्याद् द्वयोः पुनः ।
मृगभेदे **रसोनस्तु** पुमाल्लँशुनभेषजे ॥ १४९२ ॥

रसहीने पुनस्त्रि स्याद् **रक्ताक्षस्तु** द्वयोरयम् ।
राक्षसे महिषे चापि रभसस्त्वाह शब्दवित् ॥ १४९३ ॥

---

१. 'ष्पक्वे मे' क. पाठः. २. 'षं' ग. च. पाठः

पारावते चकोरे च बहुव्रीहौ तु भेदवत् ।
रक्ताङ्गस्तु पुमान् भौमे विद्रुमे तु नपुंसकम् ॥ १४९४ ॥
कांम्बिल्यजीवन्त्योस्त्वाह स्त्रीलिङ्गं रभसः कविः ।
अर्थलिङ्गसमासांश्च तर्केयेदिह पूर्ववत् ॥ १४९५ ॥
रहस्या तु नदीभेदे स्त्रियां त्रिस्तु रहोभवे ।
रवणस्तु पुमाञ्छब्दे पटोलाख्यलतान्तरे ॥ १४९६ ॥
वल्लभे रभसः प्राह तस्य मूलं विचिन्त्यताम् ।
कांस्यसंज्ञकलोहे तु क्ली रुते रभसः पुनः ॥ १४९७ ॥
पटोलमूलेऽप्यपठीत् त्रिस्तु शब्दनशीलके ।
उष्ट्रगर्दभयोस्तु द्वे भ्रमरे चाप्यधीयते ॥ १४९८ ॥
रपेठस्तु द्वयोर्ज्ञेयो मण्डूके विदुषि त्रि तु ।
रभसस्तु पुमान् वेगे हर्षसंरम्भयोरपि ॥ १४९९ ॥
त्रिस्तु स्यान्महति द्वे तु म्लेच्छे **रमठ** इत्ययम् ।
त्रिस्तु क्रीडनशीले स्याद् **रमणं** तु नपुंसकम् ॥ १५०० ॥
क्रीडायां पुंसि तु धवे स्त्रीभेदे तु स्त्रियामियम् ।
रमणी रमयत्यर्थं पुनः स्याद् रमणा न ना ॥ १५०१ ॥
रथाङ्गं रथचक्रे क्ली स्यन्दनावयवेऽपि च ।
चक्रवाकाह्वये चापि पक्षिभेदे द्वयोरयम् ॥ १५०२ ॥
अथ विद्याद् **रक्तिका** तु कृष्णलाख्यलतान्तरे ।
स्त्रीलिङ्गा ना तु बन्धूके ब्रूते म्लाने तु कश्चन ॥ १५०३ ॥
रक्षोघ्नस्तु पुमाञ्छ्वेतसर्षपे त्रि तु हन्तरि ।
अमनुष्ये रक्षसः स्याद् **रसवत्** त्वभिधेयवत् ॥ १५०४ ॥
रसयुक्ते रसवती पुनः स्त्री स्यान्महानसे ।
पञ्चरात्रे तु नत्रलिङ्गं **रात्रकं** रभसोऽपठीत् ॥ १५०५ ॥

---

१. 'कम्पिल्लजी' क. ङ. च. पाठः. २. 'पा' क. च. पाठः. ३. 'ब्जू' क. ङ. च. पाठः. ४. 'गेहे ह' क. ङ. च. पाठः. ५. 'पि' क. पाठः.

स एवाह नृलिङ्गं तं वेश्यावेश्माब्दवासिनि ।
राघवस्तु महामत्स्यविशेषे द्वे तथा रघोः ॥ १५०६ ॥
वंश्ये द्वे रघुसम्बन्धिमात्रे तु त्रिषु भाषितः ।
राजीवं त्वम्बुजे क्लीबं त्रिस्तु तद्वर्णवस्तुनि ॥ १५०७ ॥
अजयस्त्वाह राजोपजीविनि द्वे तु मन्यताम् ।
मत्स्यभेदे पक्षिभेदे मृगभेदे स चेदृशः ॥ १५०८ ॥
हरिणाख्यो राजियुतो **राजार्हं** तु नपुंसकम् ।
कस्तूर्यण्डे भेद्यवत् तु राजयोग्ये स्त्रियां पुनः ॥ १५०९ ॥
राजिका क्षवसंज्ञाके विज्ञेया सर्षपान्तरे ।
केदारेऽपि च पङ्क्तौ च राजकं तु नपुंसकम् ॥ १५१० ॥
राजवृन्दे राजितरि पुनस्त्रिरथ **राक्षसः** ।
द्वे यातुधाने स्त्री तु स्याद् राक्षसी गन्धवस्तुनि ॥ १५११ ॥
चण्डासंज्ञे त्रिषु पुना रक्षःसम्बन्धिनि स्मृतः ।
शिशिरर्तुनिशायां तु **राजसी** स्त्री त्रिषु त्वयम् ॥ १५१२ ॥
रजःसम्बन्धिनि क्ली तु **रात्रिजं** तारके त्रि तु ।
रात्रिजाते **रामकस्तु** मर्त्यजात्यन्तरे द्वयोः ॥ १५१३ ॥
त्रि तु रन्तरि ना तु स्याद् **रागवान्** पूगपादपे ।
त्रि तु रागयुते ना तु **रुचको** भूषणान्तरे ॥ १५१४ ॥
निष्के तु रभसः प्राह मातुलुङ्गाख्यभूरुहे ।
फले तु तस्य विज्ञेयं नव्लिङ्गं **रुचिरः**[1] पुनः ॥ १५१५ ॥
सुन्दरे भेद्यवच्छन्दोवृत्तभेदे तु सा स्त्रियाम् ।
रुचिरातिजगत्यां स्यात् तद्वृत्तमथ पुंस्ययम् ॥ १५१६ ॥
रुधिरोऽङ्गारके क्ली तु शोणिते कुङ्कुमेऽपि च ।
रुचिष्यं[2] तु स्वादमाने त्रिः खद्योते पुनर्द्वयोः ॥ १५१७ ॥

---

१. 'रं' च. पाठः. २. 'स्व' ग. पाठः.

रुवथो ना ध्वनौ द्वे तु कुक्कुटे शाकटायनः ।
पुनरद्भूत शकुनौ **रेवटं** तु नपुंसकम् ॥ १९१८ ॥

दक्षिणावर्तशङ्खे च रेणुवातूलयोः पुमान् ।
विषवैद्ये पुनर्द्वे स्याद् **रेचनं** तु नपुंसकम् ॥ १९१९ ॥

रिक्तौ रेचयतेस्त्वर्थे रेचना न पुमानथ ।
रेचनी स्त्री त्रिवृत्संज्ञलतायां रभसः पुनः ॥ १९२० ॥

दन्तिकासंज्ञके गुल्मे कम्पिल्लेऽप्यथ[1] **रेचितम्** ।
क्लीबं वियोजने चापि तथा संपर्चनेऽपि च ॥ १९२१ ॥

तथा रेचयतेरर्थे कृतायामेकया भ्रुवा ।
भ्रूकुटौ तुरगाणां च गतिभेदेषु पञ्चसु ॥ १९२२ ॥

धारासंज्ञेषु कस्मिंश्चिद् गतिभेदेऽस्य लक्षणम् ।
आवक्रद्भुतगत्यात्मेत्यथ तद्गति भेद्यवत् ॥ १९२३ ॥

कर्मभूते रेचयतेः सम्पृक्ते च वियोजिते ।
रैवतस्तु पुमान् वारिवाहभूधरयोः स्मृतः ॥ १९२४ ॥

आरग्वधे शैलभेदे **शङ्करे** रभसोऽपठीत् ।
रेवतीकालजाते च तथा मेद्वति स्मृतः ॥ १९२५ ॥

नपुंसकपदार्थे तु शण्डलिङ्गः स्त्रियां पुनः ।
जातार्थे रेवतीत्येव लुप्यते[2] ह्यत्र तद्धितः ॥ १९२६ ॥

सम्बन्धिनि तु रेवत्या भेद्यलिङ्गं हि रैवतम् ।
रोचना तु स्त्रियां रक्तकल्हारेऽपि वरास्त्रियाम् ॥ १९२७ ॥

ईकारान्ता तु संज्ञेया रोचनी त्रिवृदाह्वये ।
लताभेदे परेऽन्ये तु कृष्णात्रिशृति मन्वते ॥ १९२८ ॥

---

१. 'ल्ये' ग. पाठः. २. 'त' क. ङ. च. पाठः

मनःशिलायां काम्बिल्यसंज्ञवृक्षे च ना पुनः ।
रोचनः कूटशल्मल्यां§ रोचनं तु नपुंसकम् ॥ १५२९ ॥
रोचत्यर्थे रोचयतेः पुनरर्थे न ना मता ।
रोचना रोहितस्तु स्याद् वृषभे रक्तवर्णके ॥ १५३० ॥
रक्ते च वर्णे त्रिस्तु स्यात् तद्वदर्थे यदा तदा ।
तत्रापि स्यात् स्त्रियां वृत्तौ रोहिता रोहिणीति च ॥ १५३१ ॥
द्वयोस्तु मत्स्यभेदे स्यान्मृगभेदे च यो मृगः ।
स्याच्छ्वेतराजिमांस्तत्र शाश्वतस्तु ब्रवीत्यमुम् ॥ १५३२ ॥
ऋश्यसंज्ञमृगे स्त्री तु रोहिणी सुरभौ स्मृता ।
पण्डितै रक्तवर्णायां रोहितं तु नपुंसकम् ॥ १५३३ ॥
स्याद्दर्जौ शक्रचापे च तृणे च क्ली तु **रोदनम्** ।
रुदितेऽश्रुणि च स्त्री तु दुःस्पर्शे रोदनी स्मृता ॥ १५३४ ॥
रोहन्तस्तु पुमान् वृक्षे रोहन्ती तु स्त्रियामियम् ।
लतायां भेद्यवत् तु स्याद् रोहतादिति कर्तरि ॥ १५३५ ॥
रोचकस्तु पुमान् हस्तिकर्ण इत्यतिविश्रुते ।
कम्बलस्य प्रभेदे स्यात् त्रि तु रोचितरि स्मृतः ॥ १५३६ ॥
रोषाणस्तु पुमान् स्वर्णकषणप्राण्णि पारदे ।
रोषणे भेद्यवत् प्रोक्तो रोषशीलो हि रोषणः ॥ १५३७ ॥
ऊषणे* रभसः प्राह तस्य मूलं विचिन्त्यताम् ।
रोमशस्त्वृषिभेदे ना निम्बवृक्षेऽप्यथ द्वयोः ॥ १५३८ ॥
मेषे स्याल्लोमशे तु त्रि स्त्रियां तु रभसोदिता ।
काकजङ्घासहामेदामांसीषु पुनरप्ययम् ॥ १५३९ ॥

---

१. 'ष' ग. पाठः.

---

§ 'अथ कूटशाल्मलौ' । रोचनः (पृ. ५२ श्लो. ९१) इति तु वैजयन्ती । * 'रोषाणो रोषणे हेमवर्षे पारद ऊषरे' इति तु हेमचन्द्रः ।

कासीसे शूकशिम्ब्यां च **रोपण**स्तु शरे पुमान् ।
रोहणासाधने तु त्रिरथो स्याद् रोपणा न ना ॥ १९४० ॥

रोपणायां **रोहिष**स्तु मृगभेदे द्वयोरयम् ।
विज्ञेयो गर्दभाभासे मत्स्यभेदे च नप् पुनः ॥ १९४१ ॥

कत्तृणाकाशयोः स्त्री तु वात्यायां रोहिषी स्मृता ।
रोहिणं त्वष्टसङ्ख्यानां लेख्यानामेकभेदके ॥ १९४२ ॥

क्ली रोहिण्यृक्षजाते तु पुंसि भेद्बति स्मृतः ।
क्लीबं तु शण्डे स्त्र्यर्थे तु रोहिण्येव न तद्धितः ॥ १९४३ ॥

रौहिणस्तु पुमान् वारिवाहभूधरयोः स्मृतः ।
भेद्यलिङ्गं तु रोहिण्याः सम्बन्धिन्यथ **रौरवः** ॥ १९४४ ॥

पुमान् नरकभेदे स्यात् क्ली तु सामान्तरे त्रि तु ।
रुरुसम्बन्धिनि तथा रभसस्तु भयङ्करे ॥ १९४५ ॥

ललामस्त्वस्त्रियां ज्ञेयः प्रभावे पुरुषे नृपे ।
ध्वजे चिह्ने च पुच्छे च पशुशृङ्गे च भूषणे ॥ १९४६ ॥

छत्रे धामनि पुण्ड्रे च भेद्यलिङ्गं तु लिङ्गिनि ।
श्रेष्ठे च द्वे तु घोटेऽथ नकारान्तं **ललाम** वै ॥ १९४७ ॥

एष्वेवार्थेषु विज्ञेयं **ललनं** तु नपुंसकम् ।
विलासे ललना तु स्त्री कामिन्यां रभसः पुनः ॥ १९४८ ॥

जिह्वायां नाडिभेदे च **लवण**स्तु पुमानयम् ।
दैत्यभेदे पटुरसे त्रि तु तद्वति वस्तुनि ॥ १९४९ ॥

लवणद्रव्यसंसृष्टेऽप्यथ क्ली सैन्धवादिषु ।
लताभेदे तु लवणी स्त्रियां स्यादथ **लक्षणम्** ॥ १९५० ॥

जानीयात् कार्षिके चिह्ने नाम्नि मुद्राङ्गसम्पदोः ।
क्लीबं स्याल्लक्षणा तु स्त्री भक्त्यां स्यादपुमान् पुनः ॥ १९५१ ॥

दर्शने च विजानीयादङ्कने चाथ **लक्ष्मणः** ।
रामानुजे पुमान् द्वे तु सारसाभिख्यपक्षिणि ॥ १९५२ ॥

अन्ये तु सारसस्यैनां प्रियायां लक्ष्मणां विदुः ।
स्त्रियां लतान्तरे पुत्रजननीनाम्नि लक्ष्मणा ॥ १५५३ ॥
ज्योतिष्मतीसंज्ञके तु स्थावरे रभसोऽपठीत् ।
त्रि तु लक्ष्मवति ज्ञेयं **लडह**स्तु पुमानयम् ॥ १५५४ ॥
विलासे भेद्यलिङ्गं तु सुन्दरे शब्दवित् पुनः ।
व्याचष्टे हर्षनन्दीमं विलासवति नप् पुनः ॥ १५५५ ॥
ललन्तिकासमाख्ये स्याद् भूषणं **लम्बनं** तथा ।
स्याल्लम्बनक्रियायां च शकुने तु द्वयोरयम् ॥ १५५६ ॥
ललितं हारभेदे क्ली लसितेऽथ त्रिरीप्सिते ।
लङ्घनं तु गतौ क्लीबं लङ्घनी तु स्त्रियामियम् ॥ १५५७ ॥
वस्त्रलम्बनदण्डे स्यात् तिरश्चीने गृहादिषु ।
लङ्घनं तूपवासे स्यान्न नातिक्रमणेऽपि च ॥ १५५८ ॥
राज्ञोपजीविनि पुनर्**लङ्घको** द्वे त्रिषु त्वयम् ।
स्याल्लङ्घितरि **लज्जालुः** पुनर्लज्जनशीलके ॥ १५५९ ॥
त्रिषु स्त्री तु नमस्कारीसंज्ञक्षुद्रलतान्तरे ।
अनूपजे जलोद्भूतवल्लिभेदे च यस्य वै ॥ १५६० ॥
शमीफलेति संज्ञा स्याल्लक्ष्मीवांस्तु नृलिङ्गकः ।
कतकाख्यद्रुमे त्रिस्तु श्रीमति क्ली तु **लाङ्गलम्** ॥ १५६१ ॥
गृहदारुविशेषे च पुष्पभेदे हलेऽपि च ।
अथ स्याल्लाङ्गली तोयपिप्पलीसंज्ञभेषजे ॥ १५६२ ॥
स्त्रियामग्निशिखासंज्ञलतायां च पुमान् पुनः ।
शालिप्रभेदेऽथ क्लीबं **लाङ्गूलं** मेढ्रपुच्छयोः ॥ १५६३ ॥
लाङ्गूली तु स्त्रियां पृश्निपर्ण्याख्यस्थावरान्तरे ।
लालसा तु न नौत्सुक्ये प्रार्थनायां न दौहृदे[2] ॥ १५६४ ॥

---

१. 'श्वा' च. पाठः. २. 'दोहळे' ग., 'दोहने' क. च. पाठः.

अतिमात्राभिलाषे च **लावण**स्तु पुमानयम् ।
लवणाब्धौ त्रि लवणसम्बन्धिन्यथ **लासिका** ॥ १५६५ ॥
स्त्री नर्तक्यां लासकस्तु त्रिषु स्याल्लसितर्यथ ।
बालानुकृतिशब्दे ना **लालकः** स्त्री तु लालिका ॥ १५६६ ॥
नासारज्जौ तुरङ्गाणां स्यात् त्रिस्तु ललितर्यथ ।
लालनो ना सर्जरसे लालना त्वपुमानियम् ॥ १५६७ ॥
क्रियायां स्याल्लालयतेर्लाञ्छनं तु नपुंसकम् ।
अङ्कने चैव चिह्ने च संज्ञायां रभसोऽपठीत् ॥ १५६८ ॥
लाञ्छनी तु स्त्रियामेषा मुद्रायां **लाङ्गली** तु ना ।
नालिकेरद्रुमे चापि बलभद्रेऽप्यथ त्रिषु ॥ १५६९ ॥
विद्याल्लाङ्गलवत्यर्थे **लुशंभं**[1] तु वने नपि ।
ना तु मत्तगजे स्त्री तु वाद्यभेदे हि **लुम्बिका** ॥ १५७० ॥
भक्षेभेदेऽप्युलुम्बाख्ये त्रि तु लुम्बितरि स्मृतः ।
लुम्बनं त्वर्दनं ज्ञेयं **लेखनी** तु स्त्रियामियम् ॥ १५७१ ॥
स्याच्चित्रतूलिकायां क्ली पुनर्लेखनमित्यदः ।
क्रियायां लिखतेस्त्रिस्तु साधने लेखकर्मणः ॥ १५७२ ॥
लेहनस्तु शुनि द्वे स्याच्चौर्यग्राहिणि तु त्रिषु ।
सौवर्चलद्रवे त्वक्ली (लेहितो? लोहिते)* जारणाह्वये ॥ १५७३ ॥
त्रिस्तु लेहयतेः कर्मभूते स्याल्लेढिकर्तरि ।
लोभनं तु सुवर्णे क्ली लोभे लोभयतेः पुनः ॥ १५७४ ॥
अर्थे स्त्रीशण्डयोर्विद्याल्लोमनं लोभनेति च ।
लोचनं त्वक्षणि क्लीबं पश्यत्यर्थे तु सा न ना ॥ १५७५ ॥

---

१. 'भशं तु' क. ङ. च. पाठः. २. 'क्ष्य' ग. पाठः.

---

* 'सौवर्चलं द्रवस्तु स्याज्जारणं लोहितोऽस्त्रियाम्' (पृ. १३३. श्लो. १२६) इति वैजयन्ती ।

लोचनं लोचना चेति स्त्रियामेव तु लोचना ।
विचारोक्ताविदं प्रोक्तं वैजयन्त्यां मनीषिणा ॥ १९७६ ॥

लोहलस्तु त्रिरव्यक्तभाषिणि स्यात् पुमान् पुनः ।
शृङ्खला(वीप्सा)†र्थे इत्याह रभसः शब्दवित्तमः ॥ १९७७ ॥

लोटना तु स्त्रियां सानुसारवाचि नपि त्वदः ।
विलोटने **लोहितं** तु रुधिरे क्लीं द्वयोः पुनः ॥ १९७८ ॥

आवतारिकसंज्ञे स्यान्मत्स्यभेदे पुमान् पुनः ।
रक्तशालौ रक्तवर्णेऽप्यथ स्यात् तद्वति त्रिषु ॥ १९७९ ॥

तत्रापि स्व्यर्थवृत्तित्वविवक्षास्ति यदा तदा ।
लोहिनी लोहिता चेति द्वैरूप्यं **लोचकस्तु** ना ॥ १९८० ॥

रक्तांशुके मांसपिण्डे नीलिन्यां चर्मणि भ्रुवि ।
अजयस्तु पठत्येनं नीलीरक्तांशुके त्रि तुं ॥ १९८१ ॥

दुष्टबुद्धावथ प्राह निर्बुद्धावजयस्तथा ।
स्याल्लोचितर्यथ क्लीबं लोहे स्यात् कांस्यसंज्ञके ॥ १९८२ ॥

लोहजं भेद्यवत् तु स्याल्लोहसम्भूतवस्तुनि ।
लोमशा तु स्त्रियां मांस्यां लोमशस्तु त्रि रोमशे ॥ १९८३ ॥

वर्णकोऽस्त्री प्रकारे स्याच्चन्दनेऽङ्गविलेपने ।
प्रकारे तु स्त्रियां चाह वर्णिकां शाकटायनः ॥ १९८४ ॥

त्रिस्तु वर्णयितर्येष **वलजा** तु स्त्रियामियम् ।
अपूतधान्यराशौ स्याद् रूपवत्यां च योषिति ॥ १९८५ ॥

अना तु पुरगेहादेर्द्वारे क्षेत्रेऽप्यथापरः ।
सस्येऽप्याहाथ रभसः क्लीबं युद्धेऽप्यभाषत ॥ १९८६ ॥

---

१. 'षु' क. च. पाठः. २. 'शं त्रिस्तु रो' क. च. पाठः.

---

† 'लोहलोऽस्फुटवादिनि । शृङ्खलाधार्ये' इति हेमचन्द्रः ।

अथ पुंसि भवेन्मिश्ररसभेदेऽस्य लक्षणम् ।
लवणोष्णकटुस्वादुतिक्तात्मत्वं[1] त्रिषु त्वदः ॥ १९८७ ॥
तद्वति स्यात् तथैवायं वलजातेऽपि ना पुनः ।
रज्जौ **वराटः** पद्मस्य बीजकोशेऽप्यधीयते ॥ १९८८ ॥
खड्गभेदेऽपि चैरण्डबीजाभपुलकावलौ[2] ।
नीचेऽथ[3] द्वे कपर्दाख्यजलजन्तौ त्रिषु त्वयम् ॥ १९८९ ॥
सेवकेऽथ **वरालो** ना मिश्रवर्णान्तरे भवेत् ।
सितपिङ्गाणरूपेऽथ तद्वति त्रिषु सा पुनः ॥ १९९० ॥
वराला हंसकान्तायां स्त्री भैषज्यान्तरे तु नप् ।
वमनस्तु पुमान् वृक्षे विज्ञेयोऽङ्कोठसंज्ञके[4] ॥ १९९१ ॥
छर्दनार्दनयोस्तु स्यात् क्लीत्येवं रभसोऽपठीत् ।
वयःस्था तु स्त्रियां ब्राह्मीकाकोल्यामलकीषु च ॥ १९९२ ॥
सूक्ष्मैलायां हरीतक्यां तरुणे त्वभिधेयवत् ।
व्यलीकस्त्वप्रिये पुंसि स्यादकार्ये च नप् पुनः ॥ १९९३ ॥
पीडायां च विलक्षे चाप्यपराधे विपर्यये ।
केचित् त्वाहुर्भेद्यलिङ्गमप्रिये **व्यञ्जनं** पुनः ॥ १९९४ ॥
क्लीबं श्मश्रुणि निष्ठाने चिह्नावयवयोरपि ।
व्यनक्त्यर्थेऽथ ना यज्ञपशुसंस्कारकर्मणि ॥ १९९५ ॥
अस्त्री हलसमाख्येषु वर्णेषु स्यादथास्त्रियाम् ।
वलयं कटके ना तु महोदर्याख्यमुस्तके ॥ १९९६ ॥
तथा पश्चिमराश्यर्धे **वनजं** तु नपुंसकम् ।
स्यादुत्पलप्रभेदे हि कंसोत्पलमिति श्रुते ॥ १९९७ ॥
पद्मे च स्त्री तु वनजा मुद्गपर्ण्याह्वयौषधौ ।
रभसस्त्वाह पुल्लिङ्गं मुस्तके शब्दवित्तमः ॥ १९९८ ॥

---

१. 'म्ल' ग. पाठः. २. 'ह्वये ।' च., 'वये ।' क. पाठः. ३. 'ले' क. पाठः. ४. 'र' क. च. पाठः.

वनोद्भवे तु त्रिष्वेतद् **वलनं** तु नपुंसकम् ।
आवर्तने स्यात् तन्त्वादेः संवृतौ चलनेऽपि च ॥ १५९९ ॥

अना तु वलयत्यर्थे वलनाथ द्वयोर्मृगे ।
हरिणादौ **वत्सल**स्तु त्रिषु प्रेमवति स्मृतः ॥ १६०० ॥

स्त्रियां तु वत्सला वत्सकामायां गवि नप् पुनः ।
वल्गितं वल्गनेऽश्वानां गतिभेदेऽप्यथ त्रिषु ॥ १६०१ ॥

तद्वत्यथ **वदालो** द्वे मत्स्यभेदे यदाह्वयः ।
सहस्रदंष्ट्र इत्येष तथा मत्स्यान्तरेऽपि च ॥ १६०२ ॥

पाठीन इति यस्याख्या वैजयन्त्यां हि कीर्तितौ ।
सहस्रदंष्ट्रपाठीनशब्दौ भिन्नाभिधेयकौ ॥ १६०३ ॥

वराङ्ग मूर्ध्नि गुह्ये च हस्ते चोचास्त्यभेषजे ।
क्ली वराङ्गा चतुर्वर्षसुरभौ स्त्री द्वयोः पुनः ॥ १६०४ ॥

वरुटः प्राक्प्रसूतस्वजातौ स्यात् क्षत्रियस्त्रियाम् ।
मर्त्यजात्यन्तरे व्रात्याज्जातेऽथो शाकटायनः ॥ १६०५ ॥

निरुच्यौष्ठ्यबकारादिमेनं तस्यार्थमाह हि ।
मेदं मेदो हि वैदेहान्निषाद्यां जात उच्यते ॥ १६०६ ॥

वल्लवस्तु द्वयोः सूपकारगोपालयोर्भवेत् ।
वर्तकस्तु पुमानश्वखुरे पक्ष्यन्तरे पुनः ॥ १६०७ ॥

वर्तिका व(र्ति?र्ते)का च स्त्री त्रि तु वर्तितरि स्मृतः ।
वर्तनं तु तुरङ्गस्य क्ली धूलिलुठने तथा ॥ १६०८ ॥

जीविकायां प्रवृत्तौ च मुहुर्वचन एव च ।
व्यावर्तने कुटीपिण्डे वर्तना तु न ना भवेत् ॥ १६०९ ॥

धातोर्वर्तयतेरर्थे पिण्डीकरण एव च ।
स्याद् भेद्यवत् तु वर्तिष्णौ **वरेण्य**ं त्वभिधेयवत् ॥ १६१० ॥

---

१. 'रूप्यौष्ठ्य' क. ङ. च. पाठः.

श्रेष्ठे नपुंसकं त्वन्ये **वराह**स्तु पुमान् गिरौ ।
मेघेऽङ्गिरःसु प्रवरेऽप्यहनि द्वे तु सूकरे ॥ १६११ ॥

वर्धनं छेदने वृद्धिक्रियायां भेद्यवत् पुनः ।
स्याद् वृद्धिसाधने चापि वर्धिष्णौ च स्त्रियां पुनः ॥ १६१२ ॥

गलन्तिकायामपि च सम्मार्जन्यां च वर्धनी ।
वर्धना तु न ना धातोरर्थे वर्धयतेरथ ॥ १६१३ ॥

वाशिकं भेद्यवत् तुच्छे क्लीबं तु गुरुणि स्मृतम् ।
वंशिकं त्वगुरौ क्लीबमध्वमानान्तरे तु ना ॥ १६१४ ॥

दशस्तोमात्मके द्वे तु वैनाशूद्रसमुद्भवे ।
मर्त्यजात्यन्तरे स्त्री तु वंशिका वंशवाद्यके ॥ १६१५ ॥

कश्चित् तु वंशजालेऽपि ब्रूतेऽथ **वपनं** नपि ।
बीजवापे मुण्डने च वपनी तु स्त्रियामियम् ॥ १६१६ ॥

‡खरुकुट्याख्यवपनशालायां **वयुन**स्तु ना ।
यज्ञे क्ली तु प्रशस्ते च वैदुष्येऽप्यथ स द्वयोः ॥ १६१७ ॥

देवब्राह्मणयोः †क्ली तु प्रज्ञाकान्त्योरथ त्रिषु ।
स्याद् धूर्ते **वञ्चको** द्वे तु सृगाले ना तु **वञ्चथः** ॥ १६१८ ॥

मार्गे काले च दम्भे च द्वे तु कारौ च कोकिले ।
व्रश्चनं छेदने क्लीबं ना पत्रपरशौ त्रि तु ॥ १६१९ ॥

साधने छेदनस्याथ **वर्चुष्यं** तु त्रि वक्करि ।
नकुले तु द्वयोराह कश्चिच्छब्दविचक्षणः ॥ १६२० ॥

वसिरं त्वब्धिजे क्लीबं लवणे रभसः पुनः ।
किणिहीहस्तिपिप्पल्योरपि प्राह पुमान् पुनः ॥ १६२१ ॥

---

१. 'णी' क. ङ. च. पाठः. २. 'पु' ग. ङ. पाठः.

‡ 'वपनी स्यात् खरकुटी शिल्पा' (पृ. १३१. श्लो. ५०) इति तु वैजयन्ती । † **'स्त्री तु'** इति स्यात् ।

सिंहोक्तो हस्तिपिप्पल्यां कार्पासास्थि तु **वर्वरः**।
लुब्धके ना पारसीकजने तु द्वे स्त्रियां पुनः ॥ १६२२ ॥
भार्यायां वर्वरी नद्यां केशविन्यसनान्तरे।
भेद्यवत् त्वधमे वक्रकेशे च **वरकस्तु** ना ॥ १६२३ ॥
वनमुद्गे कोद्रवस्य प्रभेदे रूक्षणाह्वये।
अस्त्रियां तु द्विखण्डाख्ये भवेत् प्रावरणान्तरे ॥ १६२४ ॥
वठरस्तु शठे स्थूले त्रिषु वर्षे तु पुंस्ययम्।
वधकस्तु पुमान् व्याधौ पद्मबीजे तु नप्यदः ॥ १६२५ ॥
भेद्यवद् घातके ना तु **वरणः** पादपान्तरे।
तिक्तशाकाह्वये चैव प्राकारे चैव नप्यदः ॥ १६२६ ॥
सम्भक्तावावृतौ चाथ **वरुणो** ना प्रचेतसि।
वरुणाह्वयवृक्षे च महोदररुजान्तरे ॥ १६२७ ॥
जलोदराख्ये क्ली त्वप्सु प्रसवेऽत्रोक्तशाखिनः।
वसन्तस्त्वृतुभेदे ना सुरभ्याख्ये त्रिषु त्वयम् ॥ १६२८ ॥
क्रियायां वसतेर्धातोः कर्तर्यत्रापि च स्त्रियाम्।
यदा वृत्तिस्तदा रूपं वसन्तीति पुमान् पुनः ॥ १६२९ ॥
वहन्तो रथरेणौ स्यात् त्रि तु वाहक्रियाकृति।
तत्र स्वार्थे यदा वृत्तिर्वहन्तीति तदा भवेत् ॥ १६३० ॥
ना विस्तृतकरे हस्ते क्ली ताम्रे मंकरेऽपि च।
वल्लूरं तु वनक्षेत्र ऊषरे वाहने च नप् ॥ १६३१ ॥
वल्लूरा तु त्रयी शुष्कमांससूकरमांसयोः।
वधूलस्तु गजे द्वे स्याद्दर्षिभेदे तु पुंस्ययम् ॥ १६३२ ॥
स्याद् रसायनतन्त्रस्य कर्तरि स्यात् तु भेद्यवत्।
वरिष्ठः स्यादुरुतमे तथा वरतमेऽपि च ॥ १६३३ ॥

'त' ङ. पाठः.

द्वे तु तित्तिरिसंज्ञे स्यात् पक्षिजात्यन्तरेऽथ सा ।
वडवा घोटकान्तायां स्त्रीभेदेऽपि च विश्रुते ॥ १६३४ ॥

कामतन्त्रविदां कुम्भदास्यां च रभसस्त्वमुम् ।
द्विजाङ्गनायां च प्राह शब्दज्ञोऽथ नृलिङ्गकः ॥ १६३५ ॥

यं पुमांसं वृषं सन्तमारोहन्ति यियप्सवः ।
गावस्तत्र गुदे तु स्याद् **वनिष्ठु**[1]र्ना द्वयोः पुनः ॥ १६३६ ॥

अश्वे त्रिषु तु सम्भक्ते ***वचक्रु**[2]स्तु पुमानयम् ।
आचार्ये श्रोत्रिये चाथ ब्राह्मणे द्वे त्रि वाग्मिनि[3] ॥ १६३७ ॥

वन्दना तु न ना स्तुत्यामभिवादन एव च ।
वर्षाभूस्तु द्वयोर्भेके वर्षाभ्वीति यदा तदा ॥ १६३८ ॥

वृत्तिः स्याद् योनिमत्यर्थे तथा गण्डूपदेऽपि च ।
भेकोक्तन्यायभावः स्यात् परेषां तु मतं विदुः ॥ १६३९ ॥

पुनर्नवासमाख्यायामोषधौ स्त्रीति तत् पुनः ।
स्यात् संशयितमस्माभिर्यतश्छन्दसि दृश्यते ॥ १६४० ॥

अनादिसम्प्रदायात्ते प्रयोगे कण्ठजोष्मवान् ।
व्युत्पन्नो ह्वयतेर्धातोर्वर्षाह्वशब्द एष वै ॥ १६४१ ॥

उन्नम्भयेति वर्षाह्वा जुहोतीति ततश्च सः ।
अपभ्रष्ट उताहोस्विद् वर्षाभूरिति चापरः ॥ १६४२ ॥

पुनर्नवायां शब्दोऽस्ति व्युत्पन्नो भवतेरिति ।
व्युत्पाद्यमानो भवतेर्मण्डूके सावकाशकः ॥ १६४३ ॥

तस्मात् पुनर्नवायां स्यादयमोष्ठ्यभकारवान् ।
सन्दिग्धोऽथ त्रिषु ज्ञेयो **वसुमान्** वसुसंयुते ॥ १६४४ ॥

---

१. 'ष्कं ना' क. पाठः. २. 'क्त' क. पाठः. ३. 'दि' ग. पाठः.

---

* वचक्नुरिति अभिधानान्तरे लिखितम् ।

भूम्यां तु स्त्री वसुमती **वलभित्** तु पुमानयम् ।
पुरन्दरे तथैकाहक्रतुभेदे च नपुं पुनः ॥ १६४५ ॥

स्यादारण्यकयोः सामभेदयोर्ऋचि गीतयोः ।
उपत्वाजामयोगिर इत्यस्यामथ स द्वयोः ॥ १६४६ ॥

वनश्चा क्रोष्टरि व्याघ्रे रभसोक्तोऽथ स द्वयोः ।
वयोधा यून्यथ त्रि स्याद् वयसो धातरि त्रि तु ॥ १६४७ ॥

वनौका वनवास्तव्ये मर्कटे तु द्वयोरयम् ।
वासन्तस्तु पुमाञ्ज्ञेयो वृक्षे कुरवकाह्वये ॥ १६४८ ॥

वासन्ती तु स्त्रियां पुष्पवल्लीभेदेऽतिमुक्तके ।
यूथिकायां च रभसोऽवहिते तु त्रिषु स्मृतः ॥ १६४९ ॥

वसन्तजाते च तथा वसन्ते पुष्पजातिषु ।
वसन्तसम्बन्धिनि च **वार्ताकी** तु स्त्रियामियम् ॥ १६५० ॥

त्रिष्वित्येके शाकफलस्तम्बे वातिङ्गणाह्वये ।
प्रसहाख्ये क्षुद्रफलस्तम्बे च प्रसवे पुनः ॥ १६५१ ॥

तयोः क्लीबमथ द्वे स्याद् **वानरो** मर्कटेऽथ ना ।
तुरुष्कसंज्ञे निर्यासे **वाटिका** तु स्त्रियामियम् ॥ १६५२ ॥

पूगवृक्षे त्रिषु पुनर्वाटको वेष्टकेऽथ ना ।
वाडबो वडबावह्नौ ब्राह्मणे तु द्वयोस्त्रि तु ॥ १६५३ ॥

वडबायोगिनि प्राह रभसः पुत्रपुंसकम् ।
वडबानां गणे द्वे तु **वारणः** कुञ्जरे त्रि तु ॥ १६५४ ॥

विकारे वरणाख्यस्य तरोर्वरणयोगिनि ।
ना तु सेतौ स्त्रीनपोस्तु वारणा स्यान्निवारणे ॥ १६५५ ॥

अथात्र रभसेनोक्तः श्लोकोऽयं पठ्यते यथा ।
विशारदे ग(दा?ता)तङ्के मुमुक्षौ बडवेष्टके ॥ १६५६ ॥

---

१. 'प्यदः ।' क. ग. पाठः.

निर्जरेऽपि विशाले च **वा(गु?ग)†रो** वारके पुमान् ।
इत्येवमत्र लिङ्गानि व्यवस्थाप्यानि यत्नतः ॥ १६९७ ॥

क्ली तु स्याद् **वाहनं** युग्ये वाहनी तु स्त्रियामियम् ।
पुरस्य राजमार्गे स्यादुपनिष्करसंज्ञके ॥ १६९८ ॥

अना तु वाहयत्यर्थे वाहना **वागुरा** पुनः ।
स्त्रियां स्यान्मृगबन्धन्यां मर्त्यजात्यन्तरे पुनः ॥ १६९९ ॥

वैश्यवेनीसमुद्भूते **वानकं** तु नपुंसकम् ।
ब्रह्मचर्ये त्रिषु पुनर्वनितर्यथ **वापनी** ॥ १७०० ॥

स्त्रियामोदनभिक्षायां ग्रासमाच्यामना पुनः ।
वापना वापयत्यर्थे **वार्तिकस्तु** द्वयोरयम् ॥ १७०१ ॥

दूते विवाहविख्यातधूलिभक्ते तु तन्नपि ।
व्याख्याग्रन्थविशेषे च **वारुणी** तु स्त्रियामियम् ॥ १७०२ ॥

उमायां च प्रतीच्यां च सुरायां च लतान्तरे ।
भेद्यलिङ्गं तु वरुणसम्बन्धिन्यथ **वारिजम्** ॥ १७०३ ॥

पद्मे सामुद्रलवणे क्लीबं शङ्खे तु पुंस्ययम् ।
वामनस्तु पुमान् विष्णोरवतारान्तरे बलेः ॥ १७०४ ॥

द्वेष्टरि द्रुमभेदे च मदनाख्ये तथा भवेत् ।
दिग्गजे यमकाष्ठास्थे ह्रस्वे तु त्रिष्वथ स्मृतः ॥ १७०५ ॥

वातूलः पुंसि वात्यायां त्रि तु वातासहे तथा ।
वातलेऽप्यथ काके द्वे **वायसः** स्त्री तु वायसी ॥ १७०६ ॥

काकोदुम्बरिकायां च काकमाच्यां च भाषिता ।
भेद्यलिङ्गं तु विज्ञेयं वयस्सम्बन्धिमात्रके ॥ १७०७ ॥

---

† 'वागरस्तु गतातङ्के मुमुक्षौ वातवेष्टके । विशारदे विषाणेऽपि निर्णये वारकेऽपि च ॥' इति मेदिनी, 'वागरो वारके शाणे निर्नरे बाडवे वृके । मुमुक्षौ पण्डिते चापि परित्यक्तभयेऽपि च ॥' इति हेमचन्द्रश्च ।

वालकं त्वस्त्रियां ज्ञेयं वलयेऽप्यङ्गुलीयके ।
ह्रीबेरे तु नपि स्त्री तु वालिका सिकतासु च ॥ १६६८ ॥

ऊर्मौ च कर्णपृष्ठस्थे विज्ञेया भूषणान्तरे ।
वलये चाङ्गुलीये च पुमांसं रभसोऽब्रवीत् ॥ १६६९ ॥

वासुकस्तु पुमानर्कनामधेयमहीरुहे ।
रौमकाख्ये तु लवणे विजानीयान्नपुंसकम् ॥ १६७० ॥

क्ली तु सन्देशवाचि स्याद् **वाचिकं** त्रि तु वाकृते ।
गिरा चाभिनये ना तु **वातघ्नो** भूरुहान्तरे ॥ १६७१ ॥

एरण्डसंज्ञे त्रिषु तु वातघ्नी वातघातके ।
अमनुष्ये **वाजिनं** तु नवामिक्षाजवस्तुनि ॥ १६७२ ॥

वाजिसम्बन्धिनि त्वेतत् त्रिरथो **वासिकं** नपि ।
गृहच्छदिष्काष्ठभेदे सन्धिकाष्ठाह्वयेऽथ सा ॥ १६७३ ॥

वासिका स्त्री माल्यदात्रि **वार्षिकं** तु नपुंसकम् ।
त्रायमाणासमाख्ये स्यात् स्थावरे भेद्यवत् पुनः ॥ १६७४ ॥

वर्षासु भवजातादौ निर्वृत्तं यच्च किञ्चन ।
वर्षेण वर्षाभिर्वा स्यात् तत्राधीष्टादिकेऽपि तत् ॥ १६७५ ॥

वासवस्तु पुमानिन्द्रे द्वादशे चाप्यरत्निके ।
भवेत् सप्तदशारत्नेर्यूपस्य स्यात् तु भेद्यवत् ॥ १६७६ ॥

वसुसम्बन्धिनि द्वे तु **वातिको** विषवैद्यके ।
त्रि तु वातस्य शमने कोपने चापि वस्तुनि ॥ १६७७ ॥

वालुका तु स्त्रियामुक्ता सिकतासु नपि त्वदः ।
एलावालुकसंज्ञे स्याद् भेषजेऽपि विषान्तरे ॥ १६७८ ॥

पुण्डरीकसमाख्येऽथ **वाचालो** भेद्यलिङ्गकः ।
बहुगर्ह्यगिरि स्त्री तु शारिकासंज्ञपक्षिणि ॥ १६७९ ॥

वाचाला **वासर**स्त्वस्त्री दिवसे ना तु पार्वके ।
कामे प्रावृषि चाथ स्युर्वाहिकाः पुंसि भूम्नि च ॥ १६८० ॥

टैंकसंज्ञे* जनपदे वाहिकं तु नपुंसकम् ।
तुलासंज्ञोन्मानभेदाद्दक्षं दशगुणं स्मृतम् ॥ १६८१ ॥

वृद्ध्या दशगुणं तस्मात् स्थितेष्वाचितकादिषु ।
अष्टासु परिमाणेषु षट्के स्यात् परिमाणके ॥ १६८२ ॥

वाहकस्तु द्वयोः सर्पप्रभेदेऽजगराह्वये ।
ना त्वग्नौ सुनिषण्णाख्यशाके च जलनिर्गमे ॥ १६८३ ॥

भेद्यलिङ्गस्तु वहनकर्माजीवे बुधैः स्मृतः ।
वारङ्गस्तु द्वयोर्ज्ञेयः शकुनौ पुंसि तु स्मृतः ॥ १६८४ ॥

खण्डैकदेशे **वाराहं** पुनः सामसु केषुचित् ।
क्लीबं वराहमुनिना पुनर्ग्रन्थे कृते त्रिषु ॥ १६८५ ॥

वराहसम्बन्धिनि च वाराही तु स्त्रियामियम् ।
विष्वक्सेनप्रियानामन्योषधौ च लतान्तरे ॥ १६८६ ॥

वाराहकन्दसंज्ञे स्यादन्यस्यां क्वापि चौषधौ ।
सप्तानां चैव मातृणामेकस्यामपि मातरि ॥ १६८७ ॥

वाशु(कीर)स्तु द्वयोर्ज्ञेयः शकुनौ स्त्री तु वाशुरा† ।
रात्रौ क्लीबं तु **वादित्रं** वाद्यनिर्घोषवाद्ययोः ॥ १६८८ ॥

वदितुस्तु त्रि सम्बन्धिन्यथ स्याद् **वादना** न ना ।
अर्थे वादयतेः क्ली तु वाद्यनिर्घोष ईरितम् ॥ १६८९ ॥

वाद्ये तु **वादिकं** क्लीबं भेद्यलिङ्गं तु कर्तरि ।
अण्यन्तवदतेर्ण्यन्तवदतेः कर्म यः स्मृतः ॥ १६९० ॥

---

१. 'दपे ।' ग. पाठः. २. 'भक्कसं' ङ., 'षट्कसं' ग. पाठः. ३. **'स्यां चापि'** ग. पाठः.

---

* "टर्कवाहीककाश्मीरतुरुष्केषु ससिन्धुषु । वाह्लीका वाह्लिकाः कीराः शाखयो दारदाः क्रमात्" (पृ. ३७. श्लो. २७) इति तु वैजयन्ती । † 'वासुरा वासितारात्र्योः' इति तु हेमचन्द्रः ।

वासना तु न ना गन्धधूपाद्यैर्भावनाविधौ ।
तथा निवासयत्यर्थे वस्तेर्हेतुकृतावपि ॥ १६९१ ॥

वासनस्तु पुमान् गेहावयवे बिन्दुसंज्ञके[1] ।
वासनासाधने तु त्रि स्त्रीलिङ्गा तु स्मृता बुधैः ॥ १६९२ ॥

वार्धुषिस्त्वृणवृद्धौ स्त्री वृद्ध्याजीवे तु भेद्यवत् ।
वारिणि[2]स्तु पशौ द्वे स्यात् पशुवृत्त्यां तु सा स्त्रियाम् ॥ १६९३ ॥

विजयस्तु जये पुंसि तथा मध्यमपाण्डवे ।
खड्गे च स्त्री तु विजया हरीतक्यामथ त्रिषु ॥ १६९४ ॥

विबुधो विदुषि द्वे तु देवेऽथो पुन्नपुंसकम् ।
विलग्नं मध्यसंज्ञे स्याच्छरीरावयवे त्रि तु ॥ १६९५ ॥

सक्तेऽथ **विरलं** त्रि स्यादघने विरला त्वियम् ।
स्त्रियां गृध्रनखीसंज्ञलताजातावथ स्त्रियाम् ॥ १६९६ ॥

विशल्याग्निशिखानाम्न्यामोषधौ स्यात् तथैव सा ।
दन्तिकायां गुडूच्यां च निश्शल्ये त्वभिधेयवत् ॥ १६९७ ॥

विशिखस्तु पुमान् बाणे विशिखा तु स्त्रियामियम् ।
रथ्यायां रभसस्त्वेनां खनिञ्यामिति चोक्तवान् ॥ १६९८ ॥

भगवद्यादवोक्तं तु चेतसि क्लीबलिङ्गकम् ।
निश्शिखे तु त्रिषु स्त्री तु **विशाखा** तारकान्तरे ॥ १६९९ ॥

धारासंज्ञे पादपस्यावयवान्तर एव च ।
ना तु देवविशेषे स्यात् स्कन्ददेवस्य पृष्ठजे ॥ १७०० ॥

स्कन्ददेवे वदन्त्यन्ये विशाखाकालजे पुनः ।
भेद्यवत् स्याद् **विषाणा** तु पशुशृङ्गेभदन्तयोः ॥ १७०१ ॥

लिङ्गत्रये स्त्रियां तु स्यादजशृङ्गीति विश्रुते ।
लताभेदे विषाणीति ङ्यन्ता स्त्री तु **विषघ्न्य**सौ ॥ १७०२ ॥

---

१. 'वि' ङ. च. पाठः. २. 'ण' ङ. पाठः.

गुडूच्यां वृश्चिकाल्यां च *भार्ङ्गीनाम्नि[1] च भेषजे ।
त्रिवृतासंज्ञवल्ल्यां च शिरीषे तु पुमानयम् ॥ १७०३ ॥

श्लेष्मातकाख्ये च तरौ विषघ्नस्त्रि तु हन्तरि ।
अमनुष्ये विषस्य स्याद् **विनय**स्तु शमे भवेत् ॥ १७०४ ॥

त्रि तु वीतनये स्त्री तु बलायां विनयाथ सः ।
विहग[2]**ो** भेद्यलिङ्गः स्याच्छठे स तु नृलिङ्गकः ॥ १७०५ ॥

ऋषिभेदे भवेन्नौ[3] तु **विपक्षः** शात्रवे तथा ।
पक्षिपक्षे भेद्यवत् तु वीतपक्षे पुमान् पुनः ॥ १७०६ ॥

वितर्क आशङ्कायां स्याद् वीततर्के तु भेद्यवत् ।
विपिनं क्ली वने हर्षनन्दी तु विवृणोत्यदः ॥ १७०७ ॥

जलदुर्गे भेद्यवत् तु गहने **विप्रियं** तु नप् ।
अपराधे भेद्यवत् तु विज्ञेयं विगतप्रिये ॥ १७०८ ॥

विष्किरस्तु द्वयोः पक्षिमात्रे कुक्कुटपक्षिणि ।
मयूरे च **विराग**स्तु वैराग्ये ना त्रिषु त्वयम् ॥ १७०९ ॥

वीतरागे **विषाद**स्तु विषस्यात्तरि भेद्यवत् ।
चित्तावसादे तु पुमान् **विश्वस्ता** तु स्त्रियाँ[3]मियम् ॥ १७१० ॥

विधवायां शाश्वतस्तु त्रिषु विश्वासयोग्यके ।
विपन्नस्तु द्वयोः सर्पे भेद्यवत् तु विपद्गते ॥ १७११ ॥

अथो **वितुन्न**मानूपशाकस्तम्बे नपुंसकम् ।
सुनिषण्णाह्वये तुत्थाञ्जनाख्ये चाञ्जनान्तरे ॥ १७१२ ॥

तामलक्यां तु ना ना तु **विदण्डो** मार्गरोधिनि ।
अर्गलासंज्ञकाष्ठे च वीतदण्डे तु भेद्यवत् ॥ १७१३ ॥

---

१. 'भार्गीना' क. ङ. च. पाठः. २. 'ना' ग. पाठः. ३. 'यां स्त्रियाम्' क. ङ. च. पाठः.

---

* 'भार्गी ब्राह्मणयष्टिका' इति त्वमरः ।

विलेपस्तु पुमाञ्ज्ञेयः स्यात् क्रियायां विलिम्पतेः ।
तथानुलेपनद्रव्ये विलेपी तु स्त्रियामियम् ॥ १७१४ ॥

घनद्रवायां विज्ञेया यवागूवामथ सा स्त्रियाम् ।
घनद्रवयवागूवां स्याद् **विलेप्या** भेद्यवत् पुनः ॥ १७१५ ॥

विलेपद्रव्ये **विशेष**स्तु ना भेदेऽतिशये त्रि तु ।
वीतशेषे पक्षिमात्रशेषेऽप्यथ नृभूमनि ॥ १७१६ ॥

विदेहास्तीरभुक्त्याख्यनीवृद्भेदे त्रिषु त्वयम् ।
वीतदेहे **विद्रुतं** तु क्लीबं विद्रवणे त्रि तु ॥ १७१७ ॥

पलायिते विलीने च **विकृतं** तु नपुंसकम् ।
वैजयन्त्यां तु पुंस्याह बीभत्साख्ये रसे त्रि तु ॥ १७१८ ॥

तद्वत्यर्थे पक्षिकृतविकारापन्नयोरपि ।
तथा वीतकृतेऽपि स्याद् रोगिदूरूपयोरपि ॥ १७१९ ॥

नानाविधक्रिये चाथ क्लीबं नानाविधे कृते ।
विकृतौ चोचितस्यापि लज्जादिभिरभाषणे ॥ १७२० ॥

स्त्रीणां भावप्रभेदेऽथ **विभ्रमः** संशये पुमान् ।
शृङ्गारचेष्टाभेदे च द्राग्विपर्यासरूपके ॥ १७२१ ॥

शोभायामपि च भ्रान्तौ वेर्भ्रमे च त्रिषु त्वयम् ।
वीतभ्रमे **विग्रह**स्तु विस्तारे युद्धदेहयोः ॥ १७२२ ॥

वेर्ग्रहे चाजयस्त्वाह विस्तारात् पृथगेव वै ।
वाक्यप्रभेदेऽप्येतत् तु केचिन्नेच्छन्ति सूरयः ॥ १७२३ ॥

विस्तारेण गतार्थत्वात् त्रि तु स्याद् विगतग्रहे ।
विभूतिस्तु स्त्रियामूतौ विभोरैश्वर्यसम्पदोः ॥ १७२४ ॥

भेद्यलिङ्गा तु कथिता शब्दागमविचक्षणैः ।
वीतभूतौ **विभक्ति**स्तु स्त्री विभागेऽपि सुप्तिङोः ॥ १७२५ ॥

प्राग्दिशीयप्रत्यये च वीतभक्तौ तु भेद्यवत् ।
विट्पतिस्तु द्वयोर्देवे ना तु जामातरि त्रि तु ॥ १७२६ ॥

विशां पत्यौ **विधाता** तु विरिञ्चे (तु? ना) त्रिषु त्वयम् ।
कर्तृमेधाविनोः स्यात् तु **विधुवन्नृनपोरयम्** ॥ १७२७ ॥

समरात्रिन्दिवे काले क्रतुभेदे तु पुंस्ययम् ।
विवस्वांस्तु पुमान् सूर्ये द्वे तु देवे नरेऽपि च ॥ १७२८ ॥

वायुदिग्गजहस्तिन्यां पुनः स्त्री स्याद् विवस्वती ।
विश्वात्मा तु पुमान् सूर्ये विरिञ्चेऽप्यथ भेद्यवत् ॥ १७२९ ॥

बहुव्रीहौ **विजन्मा** तु मर्त्यजात्यन्तरे द्वयोः ।
शूद्रपूर्वकवैश्यायां व्रात्याज्जाते त्रिषु त्वयम् ॥ १७३० ॥

‡(सूर्ये?) जन्मन्यथो पुंसि **विरोधी** शात्रवे त्रि तु ।
विरोद्धरि **विपाकी** तु यवक्षारे पुमांस्त्रि तु ॥ १७३१ ॥

विपाकवति ना तु स्याद् **विषाणी** वृषभे गजे ।
विषाणवति तु त्रि स्याद् **विषयी** तु महीपतौ ॥ १७३२ ॥

विषयस्थजने पुंसि मन्मथेऽप्यथ भेद्यवत् ।
विज्ञेयो विषयोपेते ब्रूते त्वजय[1] ईदृशम् ॥ १७३३ ॥

विषयासक्तपुरुष इति नप् त्विन्द्रियेऽथ ना ।
विधर्मा ह्यहिते हर्षनन्दी त्वाह महामतिः ॥ १७३४ ॥

व्यतीचार इति त्रिस्तु भवेद् विगतधर्मके ।
सामप्रभेदे तु क्लीबं पुन्नपुंसकयोः पुनः ॥ १७३५ ॥

विहायाः[2] वियति द्वे तु विहगे महति त्रिषु ।
स्तेने च ना तु **वीरोज्झो** योऽग्निहोत्रं स्वयं नहि ॥ १७३६ ॥

---

१. 'विषय ईदृशः ॥' च. पाठः. २. 'यो' ङ. पाठः.

---

‡ 'गर्ह्यजन्मनि' इति स्यात् ।

अग्निहोत्री जुहोत्यब्दं *तंज्मिन्(?) वीरस्य तूज्झके।
मेधवद् वीरहा तु स्यादुत्सन्नाग्न्यग्निहोत्रिणि ॥ १७३७ ॥

पुमांस्त्रिषु तु वीरस्य हन्तरि स्यादथ द्वयोः।
वृषलो (द्वे?ऽधे)† भवेच्छूद्रे वृषभे तु पुमांस्त्रि तु ॥ १७३८ ॥

स्याल्लातरि वृषार्थस्य **वृजिनं** तु बले नपि।
पापे च ना तु केशे स्यात् कुटिले त्वभिधेयवत् ॥ १७३९ ॥

वृश्चिकस्तु द्वयोः क्षुद्रजन्तौ द्रुण इति श्रुते।
पुच्छकण्टकसंयुक्ते तथा स्याच्छूककीटके ॥ १७४० ॥

स्त्रीपुंसयोस्तु खर्जूरसंज्ञके विषकीटके।
द्राघिष्ठे वृश्चिका ना तु राशिभेदेऽपि चाष्टमे ॥ १७४१ ॥

भौमाय सूर्यदत्ते स्याद् या तु श्वेता पुनर्नवा।
तस्यां च **वेदना** तु स्याज्ज्ञानेऽनुभवपीडयोः ॥ १७४२ ॥

अना क्लीबं तु सत्तायां भवेल्लाभविचारयोः।
वेणुकं गजतोत्रे क्ली वेणुका तु स्त्रियामियम् ॥ १७४३ ॥

वाद्यभेदे वंशसंज्ञे मर्त्यजात्यन्तरे पुनः।
द्वे निषादीक्षत्रियजे **वेजनस्तु** पुमानयम् ॥ १७४४ ॥

भवेत् सप्तदशारत्नेर्यूपस्यारत्निके तथा।
मूलात् सप्तदशे क्ली तु भये च चलनेऽपि च ॥ १७४५ ॥

अना तु वेजयत्यर्थे **वेधकं** तु नपुंसकम्।
लवणे सैन्धवाभिख्ये त्रि तु व्यद्धरि नप् पुनः ॥ १७४६ ॥

वेधनं व्यधने स्त्री तु वेधनी या तु विश्रुता।
आस्फोटनीति तत्र स्याद् **वेत्रवांस्त्वभिधेयवत्** ॥ १७४७ ॥

---

१. 'तद्वीरस्तस्य' ख. ग., 'द्वीरस्य' ङ. च. पाठः.

---

* 'तस्मिन् वीरस्य तूज्झके' इति पाठः समञ्जसः। † 'वृषलस्तुरगे शूद्रे' इति हेमचन्द्रः।

वेत्रयुक्ते वेत्रवती पुनः स्त्री निम्नगान्तरे ।
वैदर्भी तु स्त्रियां काव्यरीतिभेदे दुरालभा ॥ १७४८ ॥
इति प्रतीतस्तम्बे च वैदर्भं त्वभिधेयवत् ।
विदर्भदेशसम्बन्धे **वैदेही** तु स्त्रियामियम् ॥ १७४९ ॥
रोचनायामपि प्राह रभसः शब्दवित्तमः ।
मैथिल्यामपि पिप्पल्यां स्याद् विदेहनृपे तु ना ॥ १७५० ॥
मर्त्यजात्यन्तरे तु द्वे वैश्यायां शूद्रजे तथा ।
ब्राह्मण्यां वैश्यजाते च **वैतस**स्तु पुमानयम् ॥ १७५१ ॥
स्यात् पुंस्प्रजनने त्रिस्तु विकारे वेतसस्य हि ।
वैदिकस्तु पुमान् ब्रह्मचारिणि स्यादधीतवान् ॥ १७५२ ॥
यो वेदं तत्र वेदे तु भवे स्याद् भेद्यलिङ्गकः ।
वैशाखस्तु पुमान् मन्थदण्डे माधवमासि च ॥ १७५३ ॥
अस्त्री तु धानुष्काणां स्यात् स्थितिभेदे स चेदृशः ।
त्रिवितस्त्यन्तरौ पादौ यत्र तत्र स्त्रियां पुनः ॥ १७५४ ॥
पौर्णमास्यां विशाखाख्यनक्षत्रयुजि सा तथा ।
गजस्य पूर्वपादस्य नखादूर्ध्वं हि सप्तधा ॥ १७५५ ॥
कृतस्योर्ध्वस्थभागे च भेद्यलिङ्गं तु **वैष्णव**म् ।
विष्णुभक्ते तथा विष्णुदेवते विष्णुयोगिनि ॥ १७५६ ॥
ना तु सप्तदशारत्नेर्यूपस्यारभ्य मूलतः ।
ज्ञेयस्त्रयोदशेऽरत्नौ वैष्णवी तु स्त्रियामियम् ॥ १७५७ ॥
सप्तानामपि मातॄणामेकस्यां स्यात् तथैव सा ।
नवानां विष्णुशक्तीनामेकस्यामपि नप् पुनः ॥ १७५८ ॥
तवाहंसोमवर्गस्य साम्नोः प्रथमयोः स्मृतम् ।
वैणवस्तु द्वयोर्मर्त्यजातिभेदे यदुद्भवः ॥ १७५९ ॥

---

१. 'द' ग. च. पाठः.

ब्राह्मण्यां तत्र माहिष्यात् त्रिस्तु वेणुविकारके ।
क्ली तु स्वर्णविशेषे स्याद् वेणूतटसमुद्भवे ॥ १७६० ॥

कर्णिकारप्रभेऽथो ना **शम्बरो** गिरिमेघयोः ।
दैत्यभेदे च विज्ञेयो यो बिभर्त्युरसा स्त्रियम् ॥ १७६१ ॥

द्वे तु स्यान्मृगभेदेऽल्पहरिणे मत्स्य एव च ।
क्लीबं तु सलिले बौद्धव्रतभेदे बलेऽप्यथ ॥ १७६२ ॥

शबरो मर्त्यजातेर्द्वे प्रभेदे यस्य सम्भवः ।
शूद्राद् भिल्लस्त्रियां स्त्री तु शबरी तापसस्त्रियाम् ॥ १७६३ ॥

रामायणप्रसिद्धायां पुल्लिङ्गस्तु महेश्वरे ।
नपुंसकं तु सलिले **शबल**स्तु नृलिङ्गकः ॥ १७६४ ॥

चित्रवर्णवृषे चित्रवर्णे च त्रि तु तद्वति ।
शबली तु स्त्रियां चित्रवर्णगव्यामथ द्वयोः ॥ १७६५ ॥

शफरो मत्स्यभेदे स्यात् प्रोष्ठीसंज्ञे स्त्रियां पुनः ।
शफरी वृक्षभेदे स्यादश्मन्तक इति श्रुते ॥ १७६६ ॥

शलली नपुंस्त्रियोः श्वाविल्लोम्नि श्वाविधि तु द्वयोः ।
शण्डिलस्त्वृषिभेदे ना पार्वत्यां शण्डिली स्त्रियाम् ॥ १७६७ ॥

जलशुक्तौ तु **शम्बूको** द्वे शम्बूका तु सा स्त्रियाम् ।
गजस्य मुखमध्यस्य पार्श्वाधोदेशयोरथ ॥ १७६८ ॥

ना सूक्ष्मे तण्डुलकणे तण्डुलस्य मलेऽपि च ।
शल्यकस्तु पुमान्श्वेतखदिरे कदराह्वये ॥ १७६९ ॥

शल्यकी तु द्वयोर्ज्ञेया मृगभेदेऽथ **शस्त्रकः** ।
पुंसि स्याट्टङ्कणक्षारे क्ली त्वयस्यथ स द्वयोः ॥ १७७० ॥

शरभः सिंहशत्रौ स्यादष्टपात्संज्ञके मृगे ।
मृगान्तरे च रभसः करभे चोक्तवानमुम् ॥ १७७१ ॥

स्त्रियां तु शरभा कन्यास्वविवाह्यासु कुत्रचित् ।
विशीर्णाङ्ग्यां द्वयोस्तु स्याच्छकुलो मत्स्यभेदके ॥ १७७२ ॥

स्त्री तु कूश्माण्डवल्ल्यां स्याच्छकुला शमनस्तु ना ।
यमे क्लीबं तु शान्तौ स्यादना तु शमना भवेत् ॥ १७७३ ॥

वधेऽपि शमयत्यर्थे त्रि तु स्याच्छान्तिसाधने ।
श्वसनस्तु पुमान् वायौ मदनाख्ये च पादपे ॥ १७७४ ॥

क्ली तु श्वासक्रियायां स्याच्छ्वपचस्तु द्वयोरयम् ।
मर्त्यजात्यन्तरे विप्राचण्डालप्रभवे तथा ॥ १७७५ ॥

निष्ठचादनन्यपूर्वायां किरात्यां जनिते त्रि तु ।
शुनः पक्तर्यथ द्वे स्याच्छ्वपाको मनुजान्तरे ॥ १७७६ ॥

विप्रयामम्बष्ठजे क्षत्तुर्जाते चोग्रस्त्रियामथ ।
उग्रात् क्षत्रस्त्रियां जात इति केचित् पुमान् पुनः ॥ १७७७ ॥

शुनः पाके पुमांस्तु स्याच्छ्वशुरो जनके भवेत् ।
भार्या(मातरि? या अपि) पत्युश्च रभसस्त्वत्र भाषते ॥ १७७८ ॥

स्त्रीलिङ्गा श्वशुरा ब्राह्मचामित्येवं शब्दकोविदः ।
देवरे तु श्वशुर्यो ना द्वे तु स्याले पुमान् पुनः ॥ १७७९ ॥

शशाङ्के शयुनः स्वप्ने द्वयोस्त्वजगरेऽथ ना ।
प्रदोषे शयथो मृत्यौ मत्स्ये त्वजगरे द्वयोः ॥ १७८० ॥

भेद्यलिङ्गस्तु निद्रालौ शयनं तु नृशण्डयोः ।
शय्यायां क्ली तु सुरते सावेशे शरठं तु नप् ॥ १७८१ ॥

आयुधे चैव चापे[2] च क्रीडाशीले तु भेद्यवत् ।
शकलस्त्वृषिभेदे ना खण्डे[3] तु नरशण्डयोः ॥ १७८२ ॥

रागद्रव्यविशेषे च वल्कलेऽप्यथ भेद्यवत् ।
शकलो मूर्खधनिनोर्नीवृद्भेदे नृभूमनि ॥ १७८३ ॥

---

१. 'ङ्गं तु' क. ग. ङ. पाठः. २. 'पा' क. ङ. च. पाठः. ३. 'ण्डला न' ग. पाठ.

शकुंट[1]स्तु पुमाञ्छाकस्तम्बभेदे स्त्रियां पुनः ।
हस्तिनः पश्चिमं भागं विभज्य दशधोर्ध्वतः ॥ १७८४ ॥

आरभ्य पञ्चमे भागे शकुंटाथ[2] **शकोट**वाक् ।
बाहौ ना भेद्यवच्छक्ते **शताङ्ग**स्तु रथे पुमान् ॥ १७८५ ॥

पूर्ववत् स्यात् समासादि **श्रपणा** तु न पुंस्यसौ ।
धातोः श्रपयतेरर्थे श्रपणी तु स्त्रियामियम् ॥ १७८६ ॥

स्यात् सुग्विशेषेऽग्निहोत्रहवणीसंज्ञकेऽथ नप् ।
श्रान्तौ स्याच्छ्र**मण**ं स्त्री तु श्रमणी मुण्डिकाह्वये ॥ १७८७ ॥

भैषज्यस्तम्बभेदे स्याद् रभसस्त्वाह शब्दवित् ।
दध्याल्याख्यलतायां च द्वे तु क्षपणकेऽथ नप् ॥ १७८८ ॥

श्रवणं स्याच्छृणोत्यर्थे श्रोत्रे चाथ नृलिङ्गकः ।
विष्णुदेवतनक्षत्रे तद्युक्ते कालमात्रके ॥ १७८९ ॥

श्रवणा तु स्त्रियां रात्रिविशेषे पूर्णिमान्तरे ।
प्राणिभेदे पुनर्द्वे स्याच्छ्र**विष्ठा** तु स्त्रियामियम् ॥ १७९० ॥

वसुदेवतनक्षत्रे तद्युक्ते कालमात्रके ।
जाते तु तत्र त्रिरथो **शत्रुघ्नो** ना कनीयसि ॥ १७९१ ॥

काकुत्स्थस्य सुमित्राजे त्रिस्तु शत्रोर्निहन्तरि ।
शर्वरो ना महादेवे चन्द्रे च तमसि त्वदः ॥ १७९२ ॥

स्त्री स्त्री तु शर्वरी रात्रौ सन्ध्यायामपि योषिति ।
अथ स्त्री **शमिता** चूर्णे गोधूमस्येति यादवः ॥ १७९३ ॥

असाध्विव तदाभाति शब्दज्ञानां यदग्रणीः ।
गोधूमचूर्णे समिधं धान्तं पुल्लिङ्गमुक्तवान् ॥ १७९४ ॥

शाकटायन आचार्यस्तस्यापभ्रंश[3] इत्ययम् ।
भासते सोपि साध्वी चेदीप्स्ये शमयतेस्त्रिषु ॥ १७९५ ॥

---

१. 'क' क. ग पाठः. २. 'क' क. पाठः. ३. 'द' ग. पाठः. ४. 'चा' ङ. पाठः.

शकुन्तस्तु द्वयोः पक्षिमात्रे भासाख्यपक्षिणि ।
शकुनस्तु विहङ्गे द्वे पुंसि त्वजय उक्तवान् ॥ १७९६ ॥
मित्रे क्ली तु निमित्ताख्ये शुभादेः सूचकेऽथ ना ।
शकुनिर्धृतराष्ट्रस्य पक्ष्ये पूर्वनृपान्तरे ॥ १७९७ ॥
द्वे तु पक्षिणि चिल्लाख्ये पक्षिमात्रेऽप्यथ द्वयोः ।
शयालुः क्रोष्टरि त्रिस्तु निद्रालावथ पुंस्ययम् ॥ १७९८ ॥
उदुम्बरद्रुमे ज्ञेयः शयालुरपरे पुनः ।
वृक्षावयवभेदे च क्ली तूदुम्बरजे फले ॥ १७९९ ॥
गन्धद्रव्यविशेषे च फले त्वामे[1] त्रि[2] शाखिनाम् ।
श्रद्धालुस्तु त्रिषु श्रद्धाशीले स्त्रीलिङ्गवाक् पुनः ॥ १८०० ॥
स्त्रीविशेषे विजानीयात् प्राज्ञो दोहदसंयुते ।
शर्कलू[3]**र्देवताभेदे** स्त्रियां पुंसि त्वधीयते ॥ १८०१ ॥
वनस्पतिविशेषेऽथ **शब्दप्राट्** शिष्यके द्वयोः ।
त्रि तु शाब्देऽथ **शतपाच्छताङ्घ्रौ** त्रि स्त्रियां पुनः ॥ १८०२ ॥
ज्ञेया शतपदी कर्णजलौकायामथ द्वयोः ।
मत्स्ये स्याच्छ**कली** त्रिस्तु शकलेन समायुते ॥ १८०३ ॥
शारदस्तु पुमान् पीतमुद्गे संवत्सरेऽपि च ।
त्रिस्त्वधृष्टे च शुद्धे च शरत्पर्कादिकेषु च ॥ १८०४ ॥
शारस्य दार्तयेपि च रभसोऽप्रतिभेऽपि च ।
प्रत्यग्रे च स्त्रियां तु स्यात् सप्तपर्णाख्यपादपे ॥ १८०५ ॥
शारदी तोयपिप्पल्यामप्यथो **शार्वरं** नपि ।
स्यादन्धतमसे त्रिस्तु घातुकेऽथ त्रि **शार्करः** ॥ १८०६ ॥
शर्करावति नप् तु स्याद् योनोवर्गसमुत्थयोः ।
साम्नोर्माध्वीकसंज्ञे तु मधुमद्ये पुमानयम् ॥ १८०७ ॥

---

१. 'थामे' क. च. पाठः. २. 'त्र' क. च. पाठः. ३. 'तन्धूर्दे' ग. पाठः ४. 'क्षा' क. ङ. च. पाठः.

दुग्धे फेने च[1] रभसः प्रोक्तवाञ्छब्दवित्तमः ।
शाण्डिल्यस्त्वृषिभेदे ना स्याद् बिले पावकान्तरे ॥ १८०८ ॥
शण्डिलस्य त्वपत्ये द्वे गोत्रे स्त्री तत्र शाण्डिली ।
शारिका तु स्त्रियां शारी[2]संज्ञे पक्ष्यन्तरे तथा ॥ १८०९ ॥
वाद्यवादनदण्डे च *शाकटस्तु त्रि हिंसके ।
शालेयस्तु पुमाञ्ज्ञेयो मिश्रेयासंज्ञभेषजे ॥ १८१० ॥
चाणक्यमूलकेऽप्याह कश्चित् क्षेत्रे तु भेद्यवत् ।
शाल्युद्भवोचिते क्ली तु चर्मपर्णीसमाह्वये ॥ १८११ ॥
शार्ङ्गाष्ठं स्याल्लताभेदे शार्ङ्गाष्ठा तु स्त्रियामियम् ।
प्रसिद्धे स्थावरे दासीषडश्रादिपदैरथ ॥ १८१२ ॥
श्यामलोऽश्वत्थवृक्षे ना काष्ण्यें च त्रि तु तद्वति ।
श्यामिका मृगभेदे स्त्री श्यामला षोडशाङ्गुला ॥ १८१३ ॥
श्वेतबिन्दुरिति प्रोक्तं लक्षणं तस्य सा तथा ।
ज्ञेया हेममले ना तु श्यामाकाह्वयधान्यके ॥ १८१४ ॥
श्यामकः **शाकट**स्तु स्यात् पुमान् पलशतात्मनः ।
तुलासंज्ञस्य मानस्य विंशत्यात्मकभारके ॥ १८१५ ॥
शाकटीनापराभिख्ये यत् तु मानं व्यवस्थितम् ।
उक्ता(द्) दशगुणं तस्मात् तथा दशगुणं हि यत् ॥ १८१६ ॥
तस्माच्च यद् दशगुणं तस्मिन् क्ली भेद्यवत् पुनः ।
शकटेः शकटस्यापि सम्बन्धिनि तथा स्मरेत् ॥ १८१७ ॥
वाहके शकटस्याथ शाकटी स्त्रीति बुध्यताम् ।
अर्थे निदानकारेण प्रयुक्ते **शाकर**स्तु ना ॥ १८१८ ॥

---

१. 'तु' ग. ङ. च. पाठः. २. 'रि' ग. ङ. पाठः.

---

* 'शारकस्तु' इति पाठः स्याद् अर्थसामञ्जस्यात्, शाकटशब्दस्योपरिष्टाद्वक्ष्यमाणत्वाच्च ।

वृषभे शक्करीसंज्ञच्छन्दसि त्वेतदीरितम् ।
क्ली त्रिस्तु शक्करीयोगिन्यथ स्याच्छाम्बरं[1] त्रिषु ॥ १८१९ ॥
शम्बरेण हि सम्बद्धे शाम्बरी तु स्त्रियामियम् ।
मायायामथ पुल्लिङ्गः **श्रावकः** कण्ठजे गुणे ॥ १८२० ॥
गायकानां गुणश्चायं यो दूराच्छ्रावयेद् ध्वनिम् ।
स स्यात् त्रिस्तु भवेच्छ्रोतृश्रावयित्रोरथ द्वयोः ॥ १८२१ ॥
व्याघ्रे सिंहे च **शार्दूलो** ना भागोत्तरवर्धिनाम् ।
हिङ्ग्वादीनां दशानां स्याच्चूर्णेऽथो पुंसि **शाबरः** ॥ १८२२ ॥
लोध्रे क्ली त्वपराधे च पापे च शबरस्य तु ।
सम्बन्धिनि त्रि ना तु स्यान्मासि श्रावणिके तथा ॥ १८२३ ॥
श्रावणः श्रावणी तु स्त्री पौर्णमास्यां हि या भवेत् ।
श्रवणाह्वयनक्षत्रयुक्ता तस्यां तथा भवेत् ॥ १८२४ ॥
मुण्डीसंज्ञकभैषज्यस्तम्बेऽथ रभसोऽपठीत् ।
दध्या(दि ? ली)‡संज्ञके वल्लिभेदेऽथ श्रवणस्य यत् ॥ १८२५ ॥
सम्बन्धि तत्र त्रिः शीतगुणे तु **शिशिरः** पुमान् ।
त्रि तु तद्वति शैखाख्ये त्वृतुभेदे नृशण्डयोः ॥ १८२६ ॥
शिखरोऽस्त्री गिरेः शृङ्गे वृक्षाग्रे रभसः पुनः ।
पक्वदाडिमबीजाभमाणिक्यशकलेऽभ्यधात् ॥ १८२७ ॥
पुलकेऽपि स एवाह भेद्यलिङ्गं तु बोधत ।
वर्तुले यत् त्विदं प्रोक्तं कैश्चिच्छोभनवाचकैः[2] ॥ १८२८ ॥
बुधैः शिखरशब्दोऽयमित्यसत् तदमूलकम् ।
शिशुकस्तु द्वयोर्बाले शिंशुमारे तथैव च ॥ १८२९ ॥

---

१. 'रम्बिषु' ग. ङ. च. पाठः. २. 'कम्' ग. पाठः.

---

‡ 'दध्याख्यां श्राव(णा ? णी) मता' इति मेदिनी ।

उलूपीसंज्ञके चापि जलजन्तौ पुमान् पुनः ।
द्रुमभेदे स्त्रियां तु स्याच्छिशुका +++++ ॥ १८३० ॥

शिथिलं त्वदृढे त्रि स्याच्छिथिली तु स्त्रियामियम् ।
वह्निकासदृशे पिङ्गवर्णे कीटान्तरे भवेत् ॥ १८३१ ॥

अयोमले तु **शिङ्घाणं** क्लीबलिङ्गं प्रतीयताम् ।
नासामले तु स पुमान् **शिखण्ड**स्तु पुमानयम् ॥ १८३२ ॥

मयूरपिञ्छे स्त्री तु स्याच्छिखायां हि शिखण्ड्यसौ ।
शिखण्डी तु द्वयोर्ज्ञेयो मयूरेऽपि च कुक्कुटे ॥ १८३३ ॥

शिखण्डिनी तु स्त्री यूथ्यां गुञ्जायां च पुमान् पुनः ।
कलायसंज्ञे धान्येऽपि रभसः प्रोक्तवानमुम् ॥ १८३४ ॥

ऋषिभेदे क्वचिच्चापि पुरुषे भारतश्रुते ।
शिखण्डवति तु त्रि स्याच्छिखरी तु पुमान् गिरौ ॥ १८३५ ॥

अपामार्गसमाख्ये च स्तम्बे रभस उक्तवान् ।
तरौ च स्त्री तु विज्ञेया छन्दस्यत्यष्टिसंज्ञके ॥ १८३६ ॥

वृत्तभेदे शिखरिणी मार्जितासंज्ञके तथा ।
संस्कृते तक्रभेदे स्याच्छीतक्रस्त्वलसे त्रिषु ॥ १८३७ ॥

ज्वालाभेदे शीतिका स्त्री **शीकर**स्तु पुमानयम् ।
*वाताद्य(स्ते) स्नेह(कणे) हस्त्यायुर्वेदिनः पुनः ॥ १८३८ ॥

हस्तिहस्तसमुद्भूतदानवारिण्यधीयते ।
गुणे च शबले शीतगुणे च स्यात् त्रिषु त्वयम् ॥ १८३९ ॥

गुणयोरेतयोरेकयुक्ते स्याच्छीत**ल**स्तु ना ।
चम्पकाख्ये पुष्पतरौ तथा शीतगुणे त्रि तु ॥ १८४० ॥

तद्वत्यथ स्त्रियां रक्तवर्णायां गवि शीतला ।
श्रीफलस्तु पुमान् बिल्वे श्रीफली तु स्त्रियामियम् ॥ १८४१ ॥

---

* 'शीकरं सरले वातसृताम्बुकणयोः पुमान्' इति मेदिनी, 'अथ शीकरः । वातास्त-जलेऽम्बुकणे' इति हेमचन्द्रः ।

नील्याख्यायामोषधौ स्यादामलक्यां तु शब्दवित् ।
रभसोऽथ **श्रीघनः** स्याद् बुद्धे ना क्ली तु दध्नयदः ॥ १८४२ ॥

श्रीपर्णं त्वग्निमन्थाख्यस्थावरे कमले च नप् ।
श्रीपर्णी तु स्त्रियां वृक्षे काष्मर्ये कट्फलेऽपि च ॥ १८४३ ॥

शीर्षण्यं ‡तु शिरस्त्राणे योधानां शीर्षकाह्वये ।
केशे ¶तु विशदे त्रि स्यान्मुख्ये मूर्धभवेऽपि च ॥ १८४४ ॥

अवैदिकास्तु शब्दज्ञम्मन्याः केचिदधीयते ।
तालव्योष्मादिरस्त्रीति **शु(षु?षि)**रध्वनिरस्य ते ॥ १८४५ ॥

अर्थं वदन्ति विवरं रभसस्तु नखाह्वये ।
भेषजेऽप्यपठीद् वाद्यभेदे त्वजय उक्तवान् ॥ १८४६ ॥

पाशादिके छिद्रयुक्ते पुनस्त्रिरिति चोक्तवान् ।
एतच्चासाम्प्रतं यस्मात् *(तालव्योष्मादिरेव?) हि ॥ १८४७ ॥

वैदिका अनुमन्यन्ते तस्य चार्थाः पृथक् कृताः ।
शुनकस्त्वृषिभेदे ना शुनि द्वे $(तु नृलिङ्गकः?) ॥ १८४८ ॥

मर्त्यजात्यन्तरे विप्राच्छूद्रायां व्यभिचारतः ।
जाते शूलवति त्वेतत् त्रिरथो **शृङ्खला** त्रयी ॥ १८४९ ॥

कटिसूत्रे भवेत् पुसां पादबन्धनवस्तुनि ।
अपि स्याद् दन्तिनां ना तु **शृङ्गारः** स्याद् रसान्तरे ॥ १८५० ॥

नवानां नाट्यविख्यातरसानामुज्ज्वलाह्वये ।
गजमण्डनभेदे च क्लीबं तु रभसोऽपठीत् ॥ १८५१ ॥

लम्पटे चापि सिन्दूरचूर्णे चाथ नपुंसकम् ।
शृङ्गाटं यन्त्रभेदे च योधानां स्याच्चतुष्पथे ॥ १८५२ ॥

---

१. 'छा' ङ. च. पाठः. २. 'ष्क' ग. पाठः.

---

‡ 'क्ली' इति स्यात्। ¶ 'ना' इति स्यात्। * 'दन्तजोष्मादिमेव' इति पठितव्यं भाति। $ 'ना तु शूलिकः' इति स्यात्।

पुल्लिङ्गं तु विजानीयात् स्तम्बे सलिलसम्भवे ।
दन्तबीज इति ख्याते शृङ्गारी तु पुमानयम् ॥ १८९३ ॥
पूगवृक्षे सुवेषे तु त्रिरथो श्लेष्मलः पुमान् ।
गोधूमधान्ये त्रिषु तु श्लेष्मवच्छ्लेष्मकारिणोः ॥ १८९४ ॥
श्लेष्मघ्नी तु स्त्रियामुक्ता पिण्यामल्ल्योर्मनीषिणा ।
रभसेन त्रिषु त्वेष श्लेष्मणो हन्तरि स्मृतः ॥ १८९५ ॥
शैलूषस्तु नटे द्वे स्यात् कितवे च पुमान् पुनः ।
शण्डजातौ च बिल्वे च शैशवं तु नपुंसकम् ॥ १८९६ ॥
शिशुत्वेऽप्युभयोः साम्नोरुच्चैतागीतयोस्त्रि तु ।
शिशुसम्बन्धिनि क्ली तु शैलेयं तार्क्ष्यशैलके ॥ १८९७ ॥
कालानुसार्यसंज्ञे च धातुभेदे तथैव तत् ।
सिन्धूत्थलवणे द्वे तु मधुपे स्यात् त्रिषु त्वतः ॥ १८९८ ॥
शैवली शैवलवति स्त्री तु शैवलिनी धुनौ ।
शैलाटस्तु द्वयोः सिंहे किराते च पुमान् पुनः ॥ १८९९ ॥
देवले शुक्लकाचे च रभसेनेदमीरितम् ।
अथ क्ली शोभनं हेम्नि धातोरर्थे च शोभ(ने ! तेः) ॥ १९०० ॥
त्रि तु स्यात् सुन्दरे क्ली तु शोधनं शुद्धिकर्मणि ।
अना तु शोधयत्यर्थे शोधना ना तु शोधनः ॥ १९०१ ॥
अङ्कोलवृक्षे स्त्री तु स्यात् सम्मार्जन्यां हि शोधनी ।
त्रिस्तु स्यात् साधने शुद्धेः शोषकस्तु पुमानयम् ॥ १९०२ ॥
वास्तुदेवविशेषे स्यात् कोष्ठश्रेणौ हि पश्चिमे ।
आरभ्य दक्षिणात् कोष्ठात् कोष्ठे तिष्ठति सप्तमे ॥ १९०३ ॥
यस्तत्र त्रिः पुनः शोष्टशोषयित्रोरथो पुमान् ।
करञ्जभेदे षड्ग्रन्थः षड्ग्रन्था तु स्त्रियामियम् ॥ १९०४ ॥

---

१ 'वा' ङ. च. पाठः· २. 'का' ग. पाठः. ३. 'तु' च. पाठः·

भेषजे पिप्पलीमूलसंज्ञे स्यादपरे पुनः ।
आहुः शुक्लवचायां तां वचामात्रे परे विदुः ॥ १८६५ ॥

शंड्यां चाथ **षडश्रा** स्त्री स्यादागलकपादपे ।
प्रसिद्धे चापि शार्ङ्गष्ठादासीप्रभृतिभिः पदैः ॥ १८६६ ॥

स्थाव(रैः स्त्री ? रे त्रि) तु षट्कोणे **षाडवस्तु** पुमानयम् ।
गतिप्रभेदे स्यादम्लमधुरोन्मिश्रिते रसे ॥ १८६७ ॥

एतद्रससमायुक्तं यत् तत्रायं त्रिषु स्मृतः ।
षाण्मासी तु स्त्रियां श्राद्धे कर्तव्ये मासि सप्तमे ॥ १८६८ ॥

प्रेतस्य त्रि तु सम्बद्धे षण्मास्याः **षाष्टिकं** तु नप् ।
व्रतभेदे षष्ठकालभोजने च प्रवर्तते ॥ १८६९ ॥

भेद्यवत् तु क्रतुर्हतषष्ठाहभववस्तुनि ।
सर्वज्ञो ना महादेवे बुद्धेऽप्येकेऽथ भेद्यवत् ॥ १८७० ॥

सर्ववेदिन्यथो पुंसि **समयो** नपि चापरे ।
सङ्केताचारसिद्धान्तकालेषु शपथे तथा ॥ १८७१ ॥

क्रियाकारे चाजयस्तु ब्रूते निर्देशसम्पदोः ।
भाषायां च वयं त्वेनं ब्रूमहे सङ्गमे नरि ॥ १८७२ ॥

सङ्गरस्तु प्रतिज्ञायां क्रियाकारे च नापदि ।
युद्धे विषे तु रभसः क्लीबं तु स्याच्छमीफले ॥ १८७३ ॥

सगरस्तु पुमान् पूर्वराजभेदे नपि त्वदः ।
व्योम्नि त्रिर्गरलेन स्यात् सहितेऽथ नृलिङ्गकः ॥ १८७४ ॥

सन्नाह्यः कुञ्जरे युद्धयोग्येऽथो भेद्यलिङ्गकः ।
सन्नद्धव्ये **स्पन्दनं** तु क्ली किञ्चिच्चलनेऽथ[3] ना ॥ १८७५ ॥

तिमिशाख्यद्रुमे क्ली तु **स्यन्दनं** स्रवणे जले ।
रथे तु ना स्यन्दनी तु स्त्रीलिङ्गा स्याद् ग्रहभ्रमे ॥ १८७६ ॥

---

१. 'षष्ठयां चा' ग. च. पाठः. २. 'भृ' ङ. पाठः. ३. 'ने तथा' ग. पाठः.

स्पर्शनं तु नपि स्पृष्टौ दाने च प(त?व)ने तु ना ।
अना तु स्पर्शयत्यर्थे स्पर्शना परिकीर्तिता ॥ १८७७ ॥

$सर्गकं त्वतिवाले स्याद् (बध्नी? दधि)* यत्रोप्तमात्रकम्[1] ।
संयावनं तत्र भेद्यलिङ्गं तु स्रष्टरि स्मृतम् ॥ १८७८ ॥

अथात्र रभसः प्राह पुल्लिङ्गे वचनं यथा ।
नालिकेरस्य सस्याभमणौ खड्गे च **सस्यकः** ॥ १८७९ ॥

भागवृत्तिकृता तूक्तं सस्यसम्पन्नवस्तुषु ।
व्रीहिशाल्यादिकेष्वेव स्थावरेष्वत्र भेदवत् ॥ १८८० ॥

यत् त्विदं गुणसम्पन्ने जयादित्येन भाषितम् ।
अतिलोकतया तस्य विरसत्वादुपेक्षितम् ॥ १८८१ ॥

संहितं तु त्रि संश्लिष्टे संहिता तु स्त्रियामियम् ।
शास्त्रग्रन्थजातिभेदे वेदभागेऽपि च क्वचित् ॥ १८८२ ॥

अतीव सन्निकर्षे च वर्णानां क्ली तु सामनि ।
षष्ठे च नवमे चैव खादिष्ठावर्गगीतके ॥ १८८३ ॥

सप्तकस्तु पुमान् सङ्घे सप्तानां क्ली तु सप्तकम् ।
मृगयाक्षादिषु स्त्री तु सप्तकी काञ्चिदामनि ॥ १८८४ ॥

सप्तमं तु त्रि सप्तानां पूरणे सप्तमी पुनः[2] ।
स्यात् सप्तमविभक्तौ च दुर्गादेव्यास्तिथावपि ॥ १८८५ ॥

सङ्कोचने तु **सङ्कोचः** पुमान् क्लीबं तु कुङ्कुमे ।
सम्बाधस्तु भगे स्त्रीणां पुमान् भेदे च सज्जनः ॥ १८८६ ॥

कारायां सङ्कटेऽन्ये तु सङ्कटे त्रिषु मन्वते ।
संस्कृतं त्वाहितोत्कर्षे कृत्रिमे निर्मलीकृते ॥ १८८७ ॥

---

१. 'मात्रे स्या' ग. पाठः. २. 'प' क. च. पाठः.

$ सर्जकमिति स्यात् । * 'संजावने तूप्तमात्रे प्राड्मन्दात् सर्जकं दधि' (पृ. १३४. श्लो. ८०) इति वैजयन्ती ।

त्रिषु स्याल्लक्षणोपेते भाषाभेदे तु पण्डिताः ।
नपुंसकं विजानन्ति **संसर्प**स्तु पुमानयम् ॥ १८८८ ॥
अहीनक्रतुभेदे स्यात् संसृप्तौ च नपि त्वदः ।
महासर्पसमाख्येषु सामसु स्याद् दशस्वपि ॥ १८८९ ॥
सञ्जयस्तु पुमाञ्ज्ञेयः पुरुषे भारतश्रुते ।
क्लीबं तु सामभेदे स्यादिन्द्रन्नरक्रुचि स्थिते ॥ १८९० ॥
विश्वाधनानीत्यारभ्य तथाहीनमखान्तरे ।
सहस्र पुनरस्त्री स्याच्छतानां दशके भवेत् ॥ १८९१ ॥
बहुन्यपि **सहाय**स्तु द्वे सख्यौ त्रि तु सेवके ।
सर्वौघस्तु पुमान् राज्ञां सर्वसन्नहनेऽथ नप् ॥ १८९२ ॥
मधुभेदे समासानां भेदाल्लिङ्गादि योजयेत् ।
समङ्गस्तु त्रि मङ्गेन सहितेऽथ नृलिङ्गकः ॥ १८९३ ॥
प्राणिद्यूते समङ्गा तु स्त्री नमस्कारिकाह्वये ।
आनूपवल्लिस्तम्बे स्यात् क्षुद्रेऽथ **सचिवः** पुमान् ॥ १८९४ ॥
मन्त्रिणि स्यात् सहाये च चेटे चेत्यथ[1] **संवृतम्** ।
क्लीबं संवरणे वर्णधर्मभेदे च तत् त्रि तु ॥ १८९५ ॥
तद्वतिच्छादिते चाथ **सवनं** क्लीबलिङ्गकम् ।
सोमाभिषवणे स्नाने काण्डेऽथो शाकटायनः ॥ १८९६ ॥
आह कालविशेषेऽमुं स्यात् प्रातस्सवनादिषु ।
यज्ञस्य ना तु यागेऽथ वनेन सहिते त्रिषु ॥ १८९७ ॥
संहारो नरकस्य स्याद् भेदे संहरणे च ना ।
स्यान्महाप्रलये चाथ स्त्री संहारी कर ++ * ॥ १८९८ ॥

---

१. 'च त्यथ' ड. पाठः.

---

* 'सम्धिस्तु कुड्यच्छदिषोः कावातायनिका कला । अपशाला तु संहारी' (पृ. १६२ श्लो. ३८) इति वैजयन्ती ।

सरकोऽस्त्री मणौ शीधुपाने चषकशीधुनोः।
भेद्यवत् तु भवेत् साधु सर्तर्यथ **सगोत्र**वाक् ॥ १८९९ ॥

एकगोत्रे द्वयोस्त्रिस्तु गोत्रेण[3] सहितेऽथ नप्।
सहजं स्यात् स्वभावे क्लीपुंस्येनं रभसोऽभ्यधात् ॥ १९०० ॥

सहोत्पन्ने विजानीयात्[2] **सग**(र्ह्यं? भ्यं) चापि भेद्यवत्।
अथात्र धीरैः **सन्दष्ट**शब्दः पुंसि प्रकीर्तितः ॥ १९०१ ॥

गाथकानां कण्ठदोषभेदे सम्मिश्ररूपके।
त्रिस्तु सन्दंशनस्य स्यात् कर्मभूते तथैव च ॥ १९०२ ॥

यमकस्य प्रभेदे च **सरट**स्तु द्वयोरयम्।
कृकलासे स्त्रियां तु स्यात् सरटी नीलिका[3]ह्वये* ॥ १९०३ ॥

लोहभेदेऽथ **सरलः** पूतिकाष्ठाह्वयद्रुमे।
पुमान् विदग्धे तु त्रि स्याद्दक्षौ च प्रियवादिनि ॥ १९०४ ॥

पुनर्हर्षः समाचष्टे **सरण्ड**स्तु पुमानयम्।
तृणानां समवायेऽथ कृमिजात्यन्तरे द्वयोः ॥ १९०५ ॥

स्तम्बजं तु क्लीबलिङ्गमुशीरे भेद्यवत् पुनः।
स्तम्बजातेऽथ पुंसि स्यात् **स्रवणः** कतकाह्वये ॥ १९०६ ॥

वृक्षे क्ली तु सुतौ क्ली तु **सलज्जं** स्यात् सुगन्धिके।
स्तम्बे दमनकाख्ये स्याल्लज्जावति तु भेद्यवत् ॥ १९०७ ॥

समुद्रस्तु पुमानब्धौ छन्दस्युत्कृतिसंज्ञके।
आकाशे च तथा सङ्ख्याभेदे चैवंविधः स च ॥ १९०८ ॥

†शताद् दशगुणं या स्यात् सङ्ख्या यत्र त्रयोदश(?)।
शाश्वतस्तु नपि प्राह समुद्रं देहलक्षणे ॥ १९०९ ॥

---

१. 'त्रैश्च स' क. ङ. च. पाठः. २. 'तु' क. ङ. च. पाठः. ३. 'ल' क. च. पाठः.

---

* 'मीलिकायां तु सरटी' (पृ. ४३. श्लो. २७) इति तु वैजयन्ती। † 'अथ परे दशगुणोत्तराः। शतं सहस्रमयुतं नियुतं प्रयुतार्बुदे। न्यर्बुदं बृन्दखर्वे च निखर्वे शङ्खमम्बुजम्। समुद्रो मध्यमन्तं च परार्धं च यथाक्रमम्।' (पृ. १८८. श्लो. २७. २८. २९) इति वैजयन्ती.

त्रिस्तु स्यान्मुद्रया युक्ते **समुद्गस्तु** पुमानयम् ।
सम्पुटे त्रिस्तु सहिते मुद्गेनाथ नपुंसकम् ॥ १९१० ॥

शरस्यारोपणे चापे **सन्धानं** काञ्जिकादिनः ।
अभिषुत्यां काञ्जिके च श्लेषणे चाथ सा स्त्रियाम् ॥ १९११ ॥

सन्धानी रूप्यशालायां वार्ताक्याश्च तथान्तरे ।
गिरिप्रियासमाख्येऽथ भेद्यवत् सन्धिसाधने ॥ १९१२ ॥

समानस्तु पुमान् वायुभेदे देहान्तरस्थिते ।
त्रिस्तु साध्येकतुल्येषु मानेन सहिते तथा ॥ १९१३ ॥

सज्जनस्तु पुमान् साधौ कुलीने भेद्यलिङ्गकम् ।
क्लीबं तु रभसो ब्रूत उपरक्षणघट्टयोः ॥ १९१४ ॥

स्त्रियां तु सज्जना हस्तिकल्पनायामथो पुमान् ।
सर्षपस्त्वोषधीभेदे तुन्दुभाख्ये स्त्रियां पुनः ॥ १९१५ ॥

सर्षपी फलिनीसंज्ञवृक्षे व्याध्यन्तरे तथा ।
स्वस्तिकस्तु पुमान् गेहवास्तुविन्यसनान्तरे ॥ १९१६ ॥

त्रिकोणसंज्ञके चापि स्त्रीणां स्याद् भूषणान्तरे ।
सुनिषण्णाह्वये शाकस्तम्बे पङ्कसमुद्भवे ॥ १९१७ ॥

द्वे तु चाषसमाख्ये स्यात् पक्षिभेदेऽथ पुंस्ययम् ।
स्वरितः स्वरभेदे स्यादुच्चनीचद्वयात्मके ॥ १९१८ ॥

त्रि तु तद्वत्यपि स्याच्च स्वर्गते स्व(रस[1]सर)[§]स्तु ना ।
भ्रातरि क्ली तु दिवसे गेहे चाथ द्वयोरयम् ॥ १९१९ ॥

सवर्णो ब्राह्मणाज्जाते क्षत्रियायां विवाहतः ।
मर्त्यजात्यन्तरे त्रिस्तु मर्त्ये स्यादेकवर्णके ॥ १९२० ॥

---

१. 'न्द' क. च. पाठः.

---

§ 'सहजः स्वसरो भ्राता' (पृ. १७५. श्लो. ३१) इति वैजयन्ती ।

तुल्यवर्णकमात्रे च **संक्रम**स्त्वस्त्रियामयम् ।
स्याद् दुर्गसञ्चरे ना तु पूर्वाधिष्ठितमाश्रयम् ॥ १९२१ ॥

उज्झित्वान्याश्रयप्राप्तौ शब्दशास्त्रविदामपि ।
गुणवृद्धिनिषेधस्य निमित्ते प्रत्यये तथा ॥ १९२२ ॥

अथात्र पठ्यते सद्भिः पुन्नपुंसकयोरयम् ।
सङ्गमो मेलके ना तु व्रतभेदे तपस्विनाम् ॥ १९२३ ॥

पञ्चरात्रं पयःपाने **सङ्ग**(म?त)*स्तु पुमानयम् ।
दिवसस्य विभक्तस्य चतु(र्थी?र्धी)शे द्वितीयके ॥ १९२४ ॥

पञ्चरात्रपयःपानव्रतेऽथ मिलिते त्रिषु ।
सङ्करोऽभिचटत्कारे सम्मार्जन्यवपुञ्जिते ॥ १९२५ ॥

सङ्कीर्णे **सङ्करी**[1]† तु स्त्री कन्याभेदे नृदूषिते ।
‡**सहर्षस्तु** पुमान् वायौ त्रि स्पर्धनसमानयोः ॥ १९२६ ॥

सरणिस्तु पुमान् सूर्ये स्त्री तु स्यात् पङ्क्तिमार्गयोः ।
सङ्घाते च सिरायां च **संकृति**स्तु पुमानयम् ॥ १९२७ ॥

ऋषिभेदे द्वयोस्तु स्यात् तद्वंश्येषु स्त्रियां पुनः ।
षण्णवत्यक्षरे छन्दोभेदेऽपि द्वादशाक्षरे ॥ १९२८ ॥

क्ली त्वारण्यकसाम्नि स्यात् स्वादोरित्येत्यृचि स्थिते ।
समाधिस्तु पुमान् ध्याने नीवाके च समर्थने ॥ १९२९ ॥

प्राणिद्यूते प्रतिज्ञायां तुल्यत्वे भेदवत् पुनः ।
सम आधिर्भवेद् यस्य तत्र स्यात् तु द्वयोरयम् ॥ १९३० ॥

---

१. 'दोषे नृ' क. ङ. च. पाठः ।

---

* 'पञ्चरात्रं पयःपानं सङ्गमः सङ्गतश्च सः' (पृ. ९१८. श्लो. १४७) इति, 'दिनार्धो प्राह्णपूर्वाह्णौ ततः सङ्गतसङ्गवौ' (पृ. २२. श्लो. ६४) इति च मेदिनी । † 'सङ्करी भुक्तकन्यायाम्' इति तु हेमचन्द्रः, 'नवदूषितकन्यायां सङ्करी पुनरुच्यते' इति मेदिनी च । ‡ 'संहर्षस्तु प्रमोदेऽपि स्पर्धायां च प्रभञ्जने' इति तु मेदिनी, 'संहर्षः पवने मुदि । स्पर्धायां च' इति हेमचन्द्रश्च ।

सनाभिर्हि सपिण्डेऽन्ये सोदर्येऽथाङ्गुलौ स्त्रियाम् ।
त्रिर्नाभिसहिते ना तु **सरण्यु**र्वायुमेघयोः ॥ १९३१ ॥

स्त्री तु + + + + + + + + + + + + + + ।
स्वयम्भूस्तु विरिञ्चे ना क्ली स्वयम्भु विहायसि ॥ १९३२ ॥

सरस्वांस्तु समुद्रे ना नदे चाथ नपुंसकम् ।
धनञ्जयेन पठितमाकाशेऽथ स्त्रियामियम् ॥ १९३३ ॥

सरस्वती नदीभेदे नदीमात्रे च वाचि च ।
गङ्गायां गवि मेदिन्यां स्त्रीरत्ने च वचस्यपि ॥ १९३४ ॥

तथा तृणलतास्तम्बे मत्स्याक्षीसंज्ञकेऽपि सा ।
मत्स्याक्षी चापि विज्ञेया ब्राह्मीति ग्रथिता लता ॥ १९३५ ॥

भेद्यलिङ्गं तु रसिके रभसेन समीरितम् ।
सरोयुक्ते च जानीयात् सत्ययुक्ते तु **सत्यवत्** ॥ १९३६ ॥

त्रिषु सत्यवती तु स्त्री वेदव्यासस्य मातरि ।
ब्राह्मीसंज्ञतृणस्तम्बेऽप्यथ **सारङ्ग** इत्ययम् ॥ १९३७ ॥

पुमान् शबलवर्णे स्याद् भेद्यलिङ्गं तु तद्वति ।
स्त्यर्थे तत्रापि सारङ्गी द्वे तु चातकभृङ्गयोः ॥ १९३८ ॥

कुञ्जरे कृष्णसाराख्यमृगभेदे च ना पुनः ।
सारसो यामिनीनाथे क्लीबं तु सरसीरुहे ॥ १९३९ ॥

द्वे तु पुष्करसंज्ञे स्यात् पक्षिभेदेऽथ **सात्त्विकम्** ।
त्रिषु सत्त्वेन निर्वृत्ते सात्त्विकी तु स्त्रियामियम् ॥ १९४० ॥

नाट्यवृत्तिविशेषाणां कैशिकीत्यादिसंज्ञिनाम् ।
वृत्तौ कस्यामपि द्वे तु **सात्वतः*** प + + + + ॥ १९४१ ॥

क्षत्रपूर्वकवैश्यायां व्रात्याज्जाते नरान्तरे ।
सत्त्वतश्च तथापत्ये बलभद्रे तु पुंस्ययम् ॥ १९४२ ॥

---

* 'पूजके हरेः' इति पूरणीयं स्यात् । तथा च वैजयन्ती 'सात्त्वतः पूजयेद्विष्णुमुक्तो भागवतश्च सः ।' (पृ. ८०. श्लो. १०५)

साधनं तु धने शेफे सिद्धावनुगतौ गतौ।
मारणे मृतसंस्कारेऽप्युपायेऽप्यर्थदापने ॥ १९४३ ॥

सेनाङ्गे यातनायां च क्लीबं स्यादपुमान् पुनः।
निर्वर्तनायां मन्त्रादेरभीष्टफलदीकृतौ ॥ १९४४ ॥

साधनं साधना चेति रूपद्वयमिह स्मरेत्।
साहसं (तु?त्व)स्त्रियां दण्डशब्दपर्यायके दमे ॥ १९४५ ॥

क्ली तु तत् स्याद् बलात्कारे वयं तु ब्रूमहे परम्।
अतर्कितप्रवृत्तौ च साहसं क्लीत्यथाजयः ॥ १९४६ ॥

कृतकार्ये त्रिरित्येवं **साहस्रं** तु नपुंसकम्।
सहस्राणां समूहेऽथ त्रिः सहस्रवति स्मृतम् ॥ १९४७ ॥

सहस्रेण च निर्वृत्त एकाहक्रतुषु त्वयम्।
चतुर्षु पुंसि साहस्रः **सामज**स्तु द्वयोर्गजे ॥ १९४८ ॥

त्रि तु सामसमुद्भूते **सावन**स्तु पुमानयम्।
संवत्सरविशेषे स्यात् षष्टित्रिशतवासरे ॥ १९४९ ॥

सवनस्य तु सम्बन्धिन्येष त्रिः सहिते तथा।
अवनेनाथ **सामुद्र**मब्धिसम्बन्धिनि त्रिषु ॥ १९५० ॥

क्ली देहलक्षणेऽथ त्रिः **सावित्रः** सवितुर्भवेत्।
सम्बन्धिनि स्त्रियां तु स्यात् सावित्री द्विजविश्रुते ॥ १९५१ ॥

विश्वामित्रेण दृष्टे स्याद्भभेदेऽनामिकाङ्गुलौ।
सायकस्तु शरे खड्गे वज्रे ना त्रिस्तु (घा?सा)तरि ॥ १९५२ ॥

सारिका तु स्त्रियां *काश्यवीणाशब्देन विश्रुते।
वीणाभेदे त्रिषु त्वेष सारकः सर्तरि स्मृतः ॥ १९५३ ॥

---

* "काण्डवीणा कुवीणा च ढक्कारी किन्नरीति च। सारिका कुड्खुणी चाथ" (पृ. १४६. १२८) इति तु वैजयन्ती।

तथा सारयितर्येष **सारणी** तु स्त्रियामियम् ।
अन्ये पद्मात्मके ना तु सारणो [†]वैरुणात्मजे ॥ १९९४ ॥
शरद्धायौ चापुमांस्तु सारणा सारिकर्मणि ।
स्थायुकस्तु त्रिषु स्थास्नौ ना तु ग्रामाधिकारिणि ॥ १९९५ ॥
स्थापनी तु स्त्रियां पाठासंज्ञवल्ल्यामना पुनः ।
स्थापना स्थापयत्यर्थे त्रि तु तत्साधनेऽथ ना ॥ १९९६ ॥
(सित[१]स्यात्)सर्षपे च **सिद्धार्थो** बुद्धेऽर्थेन युतेऽ(ह्य[२]न्य)वत् ।
सिताभ्रस्तु स कर्पूरे ना क्ली त्वभ्रे सिते स्मृतः ॥ १९९७ ॥
सिध्मला तु स्त्रियां मत्स्यविकृतौ रभसोदिता ।
कस्याञ्चिद्दोषधावन्ये त्रि तु सिध्मवति स्मृतः ॥ १९९८ ॥
सिंहास्यस्त्वटरूषे ना सिंहस्य तु मुखे नपि ।
सलम्बस्त्वृषिभेदे ना तन्तुवाये पुनर्द्वयोः ॥ १९९९ ॥
सिलिन्ध्रस्तु पुमान् वृक्षभेदे छत्राक एव च ।
छत्राके तु नपि प्राह रभसोऽथ द्वयोरयम् ॥ २००० ॥
मत्स्यभेदे नपि त्वेतत् कदलीकुसुमे तथा ।
सिलिन्ध्रवृक्षप्रसवे स्त्री तु गण्डूपदीमृदि ॥ २००१ ॥
स्त्रीप्रियस्तु पुमानाम्रपादपेऽशोकपादपे ।
क्ली तयोः प्रसवे त्रिस्तु बहुव्रीहौ तथा भवेत् ॥ २००२ ॥
स्त्रीणां प्रिये **सीमिकं** तु क्ली वल्मीके तथा तरोः ।
शाखायां च द्वयोस्त्वेष विज्ञेयः सलिलक्रिमौ ॥ २००३ ॥
*सीद्गुण्डस्तु पुमान् म्लेच्छां मर्त्यजात्यन्तरे पुनः ।
पराजक्यां द्वयोर्जाते ब्राह्मणात् **सीवनी** पुनः ॥ २००४ ॥

---

१. 'रावणात्म' ग. पाठः. २. 'ते भेदवत्।' ङ. च. पाठः.

---

† 'सारणो राक्षसान्तरे' इति मेदिनी । * 'सीहुण्ड' इति त्वमरसिंहः ।

स्त्रियामुपस्थस्याधस्तात्सूत्रे सूच्यां च नप् पुनः।
स्यूतौ सीवनमेतच्च केषाञ्चिन्मतमीरितम् ॥ १९६५ ॥

अथो परमशोभायां **सुषमा** स्त्री त्रि सुन्दरे।
सुषिरं तु नपिच्छिद्रे वैजयन्त्यां समीरितम् ॥ १९६६ ॥

वाद्यभेदे च वंशादौ सुषियुक्ते तु[1] भेद्यवत्।
स्याद् विद्रुमलतायां तु सुषिरा स्त्री नटे तु ना ॥ १९६७ ॥

सर्पाण्डे तु **सुनारो** ना शुनीस्तनपयस्यपि।
विद्याच्छोभननारादौ समासादीनि पूर्ववत् ॥ १९६८ ॥

गरुडे तु **सुपर्णो** ना किरणे च द्वयोः पुनः।
अश्वे गरुडवै(द्)[2] ज्ञेयः पक्षिजात्यन्तरेऽथ सा ॥ १९६९ ॥

सुपर्णी विनतायां स्त्री **सुवर्ण**स्त्वस्त्रियामयम्।
हेम्नि हेम्नश्च कर्षे‡ + + + ++ ++ स्त्रियाम् ॥ १९७० ॥

सुकन्दस्तु पलण्डौ ना त्रि तु शोभनकन्दके।
सुव्रता सुखसन्दोह्या या गौस्तत्र स्त्रियां त्रि तु ॥ १९७१ ॥

सद्व्रते †**सुवहा** तु स्त्री सल्लकीराखयोरपि।
शेफालिकायामपि च तथा गोधापदीति या ॥ १९७२ ॥

ओषधि + + + + + + + + + **सुकेश्य**सौ।
स्त्रियां स्यादप्सरोभेदे त्रि तु शोभनमूर्धजे ॥ १९७३ ॥

स्त्री तु स्यात् **सुकृतं** पुण्ये सत्क्रियायां च तत् त्रि तु।
कृते सुष्ठु पुमांस्तु स्याद् बुद्धे **सुगत** इत्ययम् ॥ १९७४ ॥

त्रि शोभनगते स्त्री तु (**सुरूपं** शाल्मलीफले)।
स्त्रियां तु मल्लिकाभेदे सुरूपा वेश्यसंज्ञके ॥ १९७५ ॥

---

१. 'च' ग. पाठः. २. 'वि' ग. पाठः.

---

‡ 'स्यात् कृतुभेदे तु सा' इति पूरणीय भाति। 'सुवर्णा च मखान्तरे' इति विश्वः।

† 'सुवहा सल्लक्येलापर्णीगोधापदीषु वीणास्याम्।
राखाशेफालिकयोः स्त्री सुखवाणेऽन्यलिङ्गः स्यात् ॥' इति मेदिनी।

सुलभं तु त्रिष्वयत्नलभ्ये ना तु द्विजन्मनाम् ।
विज्ञेयः पाकयज्ञाग्नौ **सुनीथस्तु** पुमानयम् ॥ १९७६ ॥

पूर्वे राजनि कस्मिंश्चित् कश्चित् त्वाह + + + + ।
+ + + + + + + + + + ङ्गभेदे यदाह्वयः ॥ १९७७ ॥

बीजपूर इति त्रिस्तु बहुव्रीहावथो पुमान् ।
सुपार्श्वो गर्दभाण्डाख्यपादपे सम्प्रकीर्तितः ॥ १९७८ ॥

मेरोरुत्तरविष्कम्भपर्वतेऽप्यथ भेद्यवत् ।
बहुव्रीहौ **सुगन्ध** + + + + + + + + + ॥ १९७९ ॥

+ + + + + वायां च **सुभिक्षा** तु स्त्रियामियम् ।
धातकीसंज्ञके वृक्षे त्रिस्त्वनाढ्येऽथ नप्यदः ॥ १९८० ॥

सुनालं रक्तकुमुदे बहुव्रीहौ तु भेद्यवत् ।
अथो लतावृ + + + + + + + + + + + ॥ १९८१ ॥

+ + + + क्ष्यतनयनागराजविशेषयोः ।
सुराष्ट्रः पीतमुद्गे ना न स्त्री राष्ट्रे हि शोभने ॥ १९८२ ॥

नीवृद्भेदे तु पुंभूम्नि सुराष्ट्राः पश्चिमोदधेः ।
समीपे **सुरसा** तु स्त्री महाजम्बूसमाख्यके ॥ १९८३ ॥

जम्बु + + + + + + + + + + + + + + ।
सुषेणस्तु पुमान् विष्णौ करमर्दाख्यपादपे ॥ १९८४ ॥

सुग्रीववैद्येऽप्याहैनं रभसो नप् प्रसूनके ।
करमर्दतरोः क्लीबं सुषेणा तु स्त्रियामियम् ॥ १९८५ ॥

कृष्णत्रिवृत्समाख्यायां लतायामथ सा स्त्रियाम् ।
सू + + + + + + + + + + + + + + + + ॥ १९८६ ॥

वास्तुदेवविशेषे च कोष्ठश्रेणौ हि पश्चिमे ।
आरभ्य दक्षिणात् कोष्ठात् तृतीये तत्र यः स्थितः ॥ १९८७ ॥

ग्रीवायां शोभनायां स्त्री बहुव्रीहौ तु भेद्यवत्।
सुगन्धिस्तु पुमान् सूक्ष्म + + + + + + + के ॥ १९८८ ॥
वास्तुदेवविशेषे च + + + + + + श्रुतः।
कलमाले च गन्धे च तत्र यो घ्राणतर्पणः ॥ १९८९ ॥
त्रि तु तद्वति चारौ च श्रेष्ठे च स्यात् स्त्रियां पुनः।
+ + + + + वह्नौ स्यात् तथा चैत्रवसन्तयोः ॥ १९९० ॥
रभसश्चम्पके जातिफले चापि बहु + + ।
+ + + + + + + + + भेद्यवच्छस्तपर्वते ॥ १९९१ ॥
सुमना तु स्त्रियां ज्ञेया मालत्यां कुसुमे पुनः।
क्लीभूम्नि स्यात् सुमनसस्त्रि तु स्याच्छुभचेतसि ॥ १९९२ ॥
पण्डिते च द्वयोस्तु स्याद् देवे क्ली तु शुभे हृदि।
सुमेधा तु स्त्रियां ज्ञेया + + + + + + + + + ॥ १९९३ ॥
गृहस्योपरिभूमौ या स्थूणा तस्यामथ त्रिषु।
सूचकः पिशुने हस्तभ्रूभङ्गाद्यैश्च बोधके ॥ १९९४ ॥
द्वे तु श्वक्रोष्टुकाकेषु सूचना तु न ना भवेत्।
रभसस्त्वाह वृष्टौ च गन्धने च विचक्षणः ॥ १९९५ ॥
व्यथने + + + + + + + + + + + + + + ।
+ + + + + + + + + + + + रभसस्त्विदम् ॥ १९९६ ॥
जन्मन्यप्याह सततं नृनपोराह पारदे।
स्त्रियां तु स्यात् प्रसूतायां **सूतका सूतिकापि च** ॥ १९९७ ॥
सृणीकस्त्वन्यशन्योर्ना सृणीका तु स्त्रियामियम्।
लालायां त्रिषु तून्मत्ते **सृमरस्तु** मृगान्तरे ॥ १९९८ ॥
द्वे त्रिस्तु गत्वरे + + **सृगालस्तु** पुमानयम्।
दैत्यभेदे द्वयोः क्रोष्टौ (ध ? ड)*मरे तु स्त्रियामियम् ॥ १९९९ ॥

---

* 'सृगालो वञ्चके दैत्यभेदे ना उमरे स्त्रियाम्।' इति मेदिनी।

इत्याह रभसो ना तु **मृदाकुः** पावके मतः ।
गोत्रकृत्यृषिभेदे च शकुनौ तु द्वयोरयम् ॥ २००० ॥

क्ली तु तोये **सेवनं** तु क्लीबं स्यात् स्यूतिसेवयोः ।
अना तु सेवयत्यर्थे सेवना **सेवकः** पुनः ॥ २००१ ॥

स्यूते प्रसेवसंज्ञे ना त्रि तु सेवितरि स्मृतः ।
सेनानीस्तु पुमान् स्कन्दे त्रि तु सेनापतौ स्मृतः ॥ २००२ ॥

स्वेदनी तु स्त्रियां कन्दुसंज्ञभाण्डे नपि त्वदः ।
स्वित्तौ स्यात् स्वेदनं नप्स्त्री पुनः स्यात् स्वेदना तथा ॥ २००३ ॥

अर्थे स्वेदयतेरस्त्री पुनः स्याल्लवणोत्तमे ।
सैन्धवं पुंसि तु प्राहुर्धीमन्तस्तज्जयद्रथे ॥ २००४ ॥

द्वे त्वश्वेऽश्वप्रभेदे च सिन्धुदेशजमानुषे ।
क्ली तु वस्त्रे च जाले च राष्ट्रे चाह त्रिषु त्वयम् ॥ २००५ ॥

सिन्धुसम्बन्धिनि द्वे तु **सैरिन्ध्रो** मानुषान्तरे ।
दस्योरायोगवीजाते सैरिन्ध्री तु स्त्रियामियम् ॥ २००६ ॥

परवेश्मस्थिता या स्त्री स्ववशा शिल्पकारिका ।
तस्यामथाह रभसो नामार्थज्ञानकोविदः ॥ २००७ ॥

तां स्त्रीमतल्लिकायां च **सैकतं** तु त्रिषु स्मृतम् ।
सिकतावति नप् तु स्यात् पुलिने सिकतामये ॥ २००८ ॥

सैरिकस्तु पुमान् स्वर्गे त्रिस्तु सीरस्य योगिनि ।
सीरस्य वोढर्यपि च **स्रोतस्वी** त्वभिधेयवत् ॥ २००९ ॥

स्रोतोयुक्ते स्त्रियां तु स्यान्नद्यां स्रोतस्विनीत्यथ ।
सौवीरं काञ्जिके स्रोतोञ्जने बदरिकाफले ॥ २०१० ॥

पुमांस्तु गोपघोण्टायां सौवीरास्तु नृभूमनि ।
नीवृद्भेदेऽथ **सौरभ्यं** सौगन्ध्ये गुणगौरवे ॥ २०११ ॥

मनोज्ञतायां च क्लीबं भेद्यलिङ्गं तु कीर्तितम् ।
मनोज्ञे **सौरतस्तु** स्यान्मृदुवायौ नृलिङ्गकः ॥ २०१२ ॥

त्रिस्तु सम्बन्धिनि रतेः **सौमिकस्तु** त्रिषु स्मृतः ।
सोमयागभवे स्त्री तु सौमिकी याज्ञिकैः स्मृता ॥ २०१३ ॥

इष्टौ स्याद् दीक्षणीयायां **सौराष्ट्री** तु स्त्रियामियम् ।
सौराष्ट्रदेशविख्याते मृद्भेदे हि यदाह्वयः ॥ २०१४ ॥

आढकीति नपि त्वेतत् सौराष्ट्रं कांस्यसंज्ञके ।
लोहेऽथ **हरितः** पुंसि स्यान्मुद्गऋषिभेदयोः ॥ २०१५ ॥

पालाशवर्णे च त्रिस्तु तद्वत्यर्थे हि तत्र च ।
यदा तदा स्त्रियां वृत्तिर्हरिता हरिणीति च ॥ २०१६ ॥

द्वे तु सिंहेऽथ हरिता हरेः स्त्री भावकर्मणोः ।
हरिणस्तु द्वयोर्ज्ञेयस्ताम्रवर्णमृगेऽथ सा ॥ २०१७ ॥

प्रतिमायां हिरण्मय्यां हरिणी स्त्री तथैव सा ।
चारुस्त्रिया च काथिता रभसेन हरिण्यसौ ॥ २०१८ ॥

अत्यष्टिच्छन्दसि ज्ञेया वृत्तभेदेऽथ कीर्तिता ।
पूर्वं हरितशब्दे हि स्त्यर्थे वर्णे तु पाण्डुरे ॥ २०१९ ॥

पुमांस्तद्वति तु त्रि स्यात् तत्र स्त्यर्थे कथं भवेत् ।
अन्तोदात्ततया (ङीपा न हि भा)व्यमंसंशयम् ॥ २०२० ॥

हरिणे (त्रीन? ङीष)जन्त(त्वाच्चित्)स्वरोऽन्तेऽस्य हि स्थितः ।
उदात्तो द्वे तु **हर्यक्षः** सिंहे वैश्रवणे तु ना ॥ २०२१ ॥

त्रिः पुनः कपिलाक्षेऽथ हर्ष(र्ष? र्षु)लो§ ना बुधग्रहे ।
द्वे पुनः शिल्पिनि मृगे भेद्यलिङ्गं तु कामिनि ॥ २०२२ ॥

हर्षशीले हासशीले **हरणं** तु नपुंसकम् ।
नाट्यप्रसिद्धे करणसंज्ञे चेष्टान्तरे तथा ॥ २०२३ ॥

---

§ 'अथ **हर्षुलः** । बुधः' (पृ. १९. श्लो. ३२) इति, 'हर्षुलो मृगकामिनोः' (पृ. २६४. श्लो. ९३) इति च वैजयन्ती ।

हेमलस्तु \$(ल)घद्भेदे नाथ द्वे कृकलासके ।
त्रिस्तु स्वर्णह्रे द्वे तु हेरम्बो महिषेऽथ ना ॥ २०४४ ॥

प्रमथानां प्रभेदे च हेरम्बो विघ्ननायके ॥ २०४५ ॥

इति व्यक्षरकाण्डे नानालिङ्गाध्यायः ॥

व्यक्षरकाण्डः समाप्तः ।

\$ 'हेमलः स्वर्णकारे स्यात् कृकलासे शिलान्तरे' इति मेदिनी ।

Ready for sale.

भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah. 1 0 0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni. 1 0 0

No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni. 0 2 0

No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa. 0 4 0

No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita. 2 0 0

No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary. 2 12 0

No. 6 — दुर्घटवृत्तिः (Vyâkarana) by Saraṇadeva. 2 0 0

No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî. 2 4 0

No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa. 1 0 0

No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin. 0 8 0

No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha. 0 8 0

No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 4 0

No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda. 0 8 0

No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 0 0

No. 14 — नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya. 3 8 0

No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. 2 8 0

No. 16—प्रतिज्ञायौगन्धरायणम् (Do.) Do. 1 8 0

No. 17—पञ्चरात्रम् (Do.) Do. 1 0 0

No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya. 4 0 0

No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita. 1 4 0

No. 20—अविमारकम् (Nâtaka) by Bhâsa. 1 8 0

No. 21—बालचरितम् (Do.) Do. 1 0 0

No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa 1 8 0

No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas) 1 12 0

No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. 1 0 0

No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri 0 12 0

No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa 0 12 0

No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinatha and Vivarana of Nârayaṇâ Pandita (1 & 2 Sargas) 1 12 0

No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas 0 8 0

No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswamin (3rd Kanda) 2 4 0

Apply to:—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.